उत्तरवेधरहितः श्रवणो द्वादशीयुतः ।
व्याप्नोति यदि मध्याह्नं कुर्यात्तस्यामुपोषणम् ॥

इति चातुर्मास्यकल्पे,

द्वादशीसंयुतां श्रोणां पूर्वसङ्गविवर्जिताम् ।
अप्रातर्दिनमध्यात्यव्यापिनीं समुपोषयेत् ॥

इति कालादर्शे ॥

End :

उदयात्पूर्वकाले षत्पञ्चाशद्घटिकायां यदा दशमीसम्बन्धः एकादश्यां प्रतीयते तदा सैकादशी विद्धैकादशीति नोपोष्येति तत्पर्यम् ॥

Colophon :

कृष्णाचार्यकृतैकादशीनिर्णयः ॥

846

Sl. No. 7764 एकादशी(वेधा)निर्णयः (श्रीनिवासाचार्यीयः) Ms. No. P. 4201/2

Beginning :

अर्कोदयादधश्चोर्ध्वं दृश्यते द्वादशी तु या ।
तस्याः प्राक् पादशेषे तु नादनीयाद्धरिवासरे ॥
एकादश्याः प्रान्त्यभागः द्वादश्याः पूर्व एव च ।
हरिवासरनामाऽसौ सर्वकालोत्तमः स्मृतः ॥

End :

पञ्चपञ्चाशद्घटिकोपरि त्रिंशद्विनाड्यो भवन्ति तदा वेध इत्यतिवृद्धा वालयुगमित्यस्यार्थो ज्ञातव्यः ॥

Colophon ;

पूर्णबोधार्यशिष्येण श्रीनिवासाख्यसूरिणा ।
कोनेरिसूरिपुत्रेण कृतोऽयं वेधनिर्णयः ॥

847

Sl. No. 7768 **एकादशीनिर्णयः** (एकादशीप्रमाणसङ्ग्रहः) Ms. No. P. 4201/10

Beninning:

एकादशीश्रवणद्वादशी अतिरिक्तद्वादशी कृष्णजन्माष्टमी तज्जयन्तीनां हरिप्रियदिनत्वेन हरिदिनशब्दवाच्यत्वात्तत्र श्राद्धोपासनतर्पणादीनि न कार्याणि ।

तच्चोक्तं मैत्रावरुणोपनिषदि– अथेदानीं ज्ञानोपसर्गाः । राजन् ! मोहजालस्येति वैयोनि-रित्युक्त्वा कांश्चन उपसर्गानुक्त्वा येऽये व्रतविलोपिनो विकर्मस्था हरिदिने ह वै । नित्य-नैमित्तिकादिश्राद्धहोमतर्पणाधिकारिण इत्यादिना ॥

End :

तदुपरि संस्कारः तत्प्रमाणम्–

संस्कारहीनं त्रिदिनं यः करोति नराधमः ।
स वै नरकमाप्नोति यावदिन्द्रश्चतुर्दश ॥

इति विष्णुरहस्योक्तप्रमाणात्संस्कारः कर्तव्यः ॥

Colophon :

– – –

848

Sl. No. 7772 **एकादशीनिर्णयः** (एकादशीव्रतानुष्ठानक्रमः) Ms. No. P 5726/54

Beginning :

व्रतानुष्ठानक्रमः–

नित्योपवासे दशमीद्वादश्योः एकभक्तभावः । काम्योपवासे दशमीद्वादश्योः एकभक्तभावे अपूर्वसिद्धिर्भवति ॥

End :

स्तोत्रैः नानाविधैर्दिव्यैः गीतवाद्यमनोहरैः ।
दण्डवत्प्रणिनत्याद्यैः स च शब्दैस्तथोत्तमम् ॥

एवं सम्पूज्य विधिवत् रात्रौ कृत्वा प्रदक्षिणम् ।
यो हि विष्णोः पदं स्थानं नरो याति न संशयः ॥

Colophon :

— — —

849

Sl. No. 7781 एकादशीनिर्णयः (एकादशीवेधप्रकारः) Ms. No. C. 1886/2

Beginning :

कर्णाटकभाषया लिख्यते वेधप्रकार –

ಆರುಘಳಿಗೆ ವೃದ್ಧಿಯಲ್ಲಿ ಸಿದ್ಧಾಂತಘಳಿಗೆ ೫೭ ವಿಘಳಿಗೆ ೪೨ ಕಂಡರೆ ಆರ್ಯಮಾನಘಳಿಗೆ ೩ ವಿಘಳಿಗೆ ೨ ॥

End :

ಈ ವೇಧೀಮಾರ್ರೇಣ ಆರ್ಯಮಾನ ಗಣಿತಜ್ಞರು ಇದ್ದರೆ ತನ್ಮುಖದಿಂದ ಗಣಿತಮಾಡಿದ ಘಳಿಗೆ ಸಹ ಕಂಡು ತಮ್ಮ ತಮ್ಮ ಗುರೂಕ್ತಮಾರ್ಗದಿಂದ ವೇಧೀಮಾಡತಕ್ಕದ್ದು. ಗಣಿತಜ್ಞರು ಇಲ್ಲದಿದ್ದರೆ ನಾವು ಬರದದ್ದು ನೋಡಿ ಸಿದ್ಧಾಂತಪಂಚಾಂಗಗಳು ವಿಚಾರಿಸಿ ಆಚಾರ್ಯರವರ ಸಂಪ್ರದಾಯಾಭಿಜ್ಞರಿಂದ ವೇಧೀ ಮಾಡತಕ್ಕದ್ದು ॥

Colophon :

— — —

850

Sl. No. 7783 एकादशीश्राद्धनिषेधनिर्णयः Ms. No. P. 1364/70

Beginning :

त्र्यहमुष्णं पिबेद्वारि त्र्यहमुष्णं पयः पिबेत् ।
त्र्यहमुष्णं पिबेत्सर्पि वायुभक्षो दिनत्रयम् ॥

+ + + वायुभक्ष उपवासः । + + +

तथा च ब्रह्मकैवर्ते–

एकादश्यां प्रासवत्यां मातापित्रोर्मृतेऽहनि ।

एकादशीं परित्यज्य द्वादश्यां श्राद्धमाचरेत् ॥

कुर्याच्छ्राद्धादिकं कर्म प्रत्यहं पद्मसम्भव ।
ये कुर्वन्ति महीपाल श्राद्धमेकादर्शादिने ॥
त्रयस्ते नरकं यान्ति दाता भोक्ता विधायकः ॥

Colophon :

— — —

851

Sl. No. 7788 एकादशीश्राद्धनिषेधनिर्णयः Ms. No. P. 5055/2

Beginning :

आद्यश्राद्धं हरिदिने यदि कुर्यात्प्रमादतः ।
रेतोमूत्रपुरीषादि स पितृभ्यः प्रयच्छति ॥
साब्दश्राद्धं(?)हरिदिने यदि कुर्याद्विमोहतः ।
कर्णप्र × × ग्रहीता च उभौ + रकगौ मतौ ॥

End :

तयोर्वैकादशीश्राद्धं विदध्याद्द्वादर्शादिने ।
ब्रह्महत्यादिपापानि ब्रह्माण्डे यानि कानि च ॥
अन्नमाश्रित्य तिष्ठन्ति सम्प्राप्ते हरिवासरे ।
वैष्णवानामय धर्मः सततं परिकीर्तितः ॥

इति वाराहे ॥

Colophon :

— — —

852

Sl. No. 7792 एकोदरविवाहनिर्णयः Ms. No. P. 5951/62

Beginning :

एकोदरं भ्रातृविवाहकृत्ये श्वश्रुश्च पाणिग्रहणं विधेयम् ।
षण्मासमध्ये मुनयस्समूचुः समेपिके चोपनयं च कुर्यात् ॥

End :

पितैवोपनयेत् पुत्र तदभावे पितुः पिता ।
तदभावे पितृभ्राता तदभावे तु सोदरः ॥

Colophon :

— — —

853

Sl. No. 7793 **एकोद्दिष्टकारिका** Ms. No. P. 3646/42

Beginning :

एकोद्दिष्टे तु सम्भासे विप्राभावे कथं तदा ।
लौकिकाग्निं प्रतिष्ठाप्य पूजयेत्तं यथाविधि ॥
पायसं घृतसंमिश्रं हस्तेन ग्राससम्मितम् ।
अध्वर्युर्वाग्यतो भूत्वा प्रसव्यं दक्षिणामुखः ॥

End :

यमाय सोममित्येतत् द्वात्रिंशज्जुहुयाच्चरुम् ।
ग्रा ×× स ×× म ×++ तप्रीतिकरं भवेत् ॥
एवमुक्तं गौतमेन प्रेतप्रीतिकराय च ॥

Colophon:

— — —

854

Sl.No. 7794 **एकोद्दिष्टकारिका** (अपरक्रमदीपिका) Ms. No. C. 4175/4

Beginning :

एकोद्दिष्टविधानेन पुनश्श्राद्धमसौ इति (?) ।
अनुज्ञाकल्पवरुणं आज्यदर्वीश्च संस्कृतम् ॥
अर्घ्यशुद्धिस्थलं चैव क्षाळनावाहनं तथा ।
अर्घ्यदानमलङ्कारं परिपिन्थ्यायमाहुतिः ॥

End :

एवं बलोचिता प्रोक्ता अपरक्रमदीपिका ।
प्रथमेहनि – – – – रोमाण्यनन्तरम् ॥
नवमे वीर्यसम्पत्तिः दशमे क्षुत्परिक्षयात् ।
दशमेन तु पिण्डेन तृप्तिः प्रेतस्य जायते ॥

Colophon :

— — —

85

Sl. No. 7800 औपासननिर्णयः Ms. No. P. 4212/35

Beginning :

होतव्यं वह्निजिह्वायां सज्वाला रसना स्मृता ।
कर्णादिषु प्रदेशेषु हुतं स्यान्निष्फलं भवेत् ॥
यत्र काष्ठं तु तच्छ्रोत्रं यत्र धूमं तु नासिका ।
यत्राल्पज्वलनं नेत्रं यत्र भस्मनि तच्छिरः ॥

End :

शान्तिकर्मणि सर्वायां(?) एवं जिह्वाफलं भवेत् ।
सप्तजिह्वामविज्ञाय यः कुर्यादग्निसंनिधौ ।
होमो निष्फलतां याति होता च नरकं व्रजेत् ॥

Colophon:

— — —

856

Sl. No. 7805 और्ध्वदैहिकविचारः Ms. No. P. 8697/3

Beginning :

अर्वाग्विंशतिवर्षश्च मातापित्रोर्मृते श्रुते ।
कृतक्रियेति पुत्राणां दशाहं सूतकं भवेत् ॥

End :

इत्याशौचमध्ये पुनस्संस्कारे दिनं नैव शोध्यम्। कालान्तरे दिनशोधनं कार्यमेवेत्यर्थः॥

'आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठति'

मलिम्लुचे मासि मृतस्य पुंसः

त्रयोदशे तु प्रथमाब्दिकं स्यात्।

मध्ये विमानस्य मृतस्य तद्व-

- - - - - - - - - - - - - - ॥

Colophon :

— — —

857

Sl. No. 7808 कन्यकाशौचप्रकरणम् **Ms. No. P. 7639/17**

Beginning :

श्रेयोदस्तसमस्तान्तरायतामिस्रभास्कर।

नमद्रक्षोविपक्षद्रो (?) श्रीमद्गणपते नमः॥

श्रीमद्गुरुपदाब्जाभ्यां ताभ्यां ये श्रीविलासिनी।

बुधमानसभाव्याभ्यां मङ्गलाभ्यामिदं नमः॥

ओम्। नीलकण्ठीये अथ कन्याशौचम्॥

End :

अनन्यविषयतया नियमितस्याभावाच्च नानादेशस्थशिष्टाचारस्य बाजकमान्यताभावाच्च (?) तत्रापि विशेषेण दाक्षिणात्यानां स्त्रीमापिण्ड्यं त्रिपुरुषम्। सपिण्डानां दशरात्राशौचम्। सोदकानां त्रिरात्रमिति सिद्धान्तः॥

Colophon :

श्रीमत्काशीस्थिताशेषविद्वज्जनविनिर्मिता।

कन्यकाजननाशौचनिर्णयः पर्यपूर्यत॥

इति श्रीमत्काशीस्थितानेकविद्वज्जनकृता (?) वरैः।

कृतं कन्याशौचप्रकरणमिदं पूरितमभूत्॥

858

Sl. No. 7809 कन्यादानसङ्कल्पविधिः Ms. No. P. 4959/4

Beginning :

एवंगुणविशेषणविशिष्टायां तिथौ श्रीलक्ष्मीनारायणप्रसादेन आचन्द्रार्कशेषिकसुखानुभव परम्परावाप्त्यर्थं लक्ष्मीनारायण × प्राप्त्यर्थं एकविंशतिकुल ×× वंशतारकपितृणां महादानान्तर्वर्ति कन्यादान + + ॥

End :

अग्निष्टोम?अतिरात्रा-अप्तोर्यामसान्तपन-वाजपेय-पौण्डरीकादि-सर्वक्रतु-फलावाप्त्यर्थं कूर्म-पुराणोक्तप्रकारेण सालङ्कृतकन्यादानमहं करिष्ये ॥

Colophon :

— — —

859

Sl. No. 7810 कन्यादानाधिकारिनिर्णयः Ms. No P. 1364/21

Beginning :

पिता पितामहो भ्राता पितृव्यो गोत्रिणो गुरुः ।
मातामहो मातुलो वा कन्याया बान्धवाः क्रमात् ॥

End :

पित्रादिदा(त्र)भावे तु कन्या कुर्यात्स्वयंवरम् ॥
इत्येवं केचिदाचार्याः प्राहुर्महति सङ्कटे ॥

Colophon :

— — —

860

Sl. No. 7811 कन्यावधूवरणनियमः (स्मृत्यर्थसारसमुच्चयात्) Ms. No. P. 4181/21

Beginning :

अथ कन्यावरणे वधूवरणे दिङ्नियममाह स्मृत्यर्थसारसमुच्चये– गार्ग्य आह–

प्राङ्मुखी वरयेत्कन्यां गुडजीरिकसंयुताम् ।
प्रत्यङ्मुखं वरः तिष्ठेत् दानकाले विपर्ययः ॥ इति ॥

End :

उत्तरेषु चतुर्षु विशेषात् गान्धर्वादिचतुर्षु (?) विवाहेषु वधूवरयोः दिङ्नियमवैपरित्येन वृणुयादित्यर्थः । इत्यादिद्वैविध्यविकल्पः देशाचारादेवावगन्तव्यः ॥

Colophon :

इति विवाहप्रकरणे स्मृत्यर्थसारसमुच्चयोक्तवधूवरयोः दिङ्नियमः ॥

861

Sl. No. 7862 **कपिगोत्रविवाहनिर्णयः** **Ms. No. P. 5720/5**

Beginning :

कपिगोत्रस्य विवाहनिर्णयः कथ्यते—

भारद्वाजगोत्र औरसव्य-कपिगोत्र × षये आङ्गिरस-बार्हस्पत्य-भारद्वाज + + + + न मिथो विवाह्याः ॥

End :

कपिप्रसिद्धावुदिनाविह द्वौ स्वतन्त्र एकस्त्वपरोऽस्वतन्त्रः ।
तत्र स्वतन्त्रस्य कपेः विवाहं मिथो भरद्वाजकुलस्य नाहुः ॥

Colophon :

-- -- --

862

Sl. No. 7813 **कपिलषष्ठीनिर्णयः** **Ms. No. P. 1364/11**

Beginning :

भाद्रमासि सिते पक्षे भानौ चैव करे स्थिते ।
पाते कुजे च रोहिण्यां सा षष्ठी कपिला भवेत् ॥

End :

दैवं योगश्शस्तोऽयं(?) सूर्यपर्वशताधिकम् ।
योगस्स्याद्यदि चेद्रात्रौ चन्द्रष ×× ति सा स्मृता ॥

Colophon :

— — —

863

Sl. No. 7814 करस्थतीर्थविवरणम् Ms. No. P. 5726/6

Beginning :

अथ तीर्थानि–

कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्र × स्य च ।
प्रजापतित्रिभिब्रह्मपितृतीर्थान्यनुक्रमात् ॥

व्यासः–

दक्षपाणितलस्थस्त्वादाग्नेयं तीर्थमुत्तमम् ॥

End :

कमण्डलुस्पर्शनं च दधिप्राशनमेव च ।
अवान्नभोजनं गेव (?) स्रुक्स्रुवग्रहणं तथा ॥
× चमं ×× ब्रह्मतीर्थेन दैवतीर्थेन वा भवेत् ॥

Colophon :

— — —

864

Sl. No. 7817 कर्णवेधकालनिर्णयः Ms. No. P. 5947/48

Beginning :

कार्तिके मार्गशीर्षे च माघे फाल्गुनचैत्रके ।
वैशाखे जेष्ठमासे च कर्णवेधो प्रशस्यते ॥ १ ॥

End :

मासे षष्ठे अष्टमे सप्तमे वा
वेधो कर्णौ द्वादशे षोडशेऽह्नि ।
मध्ये बाऽह्नः पूर्वभागेन रात्रौ
नक्षत्रे द्वे द्वे त्रिदिनं वर्जयेद्वा ॥ १ ॥

Colophon : — —

Extra Information :

ग्रन्थान्ते–

ಮೋದಕ ಹೋದೋದಕ್ಕೆ

जीर्णे खौ - - - - - - - - पराशरः ॥

इति दृश्यते ॥

865

Sl. No. 7819 **कर्मदीपिका** Ms. No. P. 5806/2

Beginning :

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्वशुद्धा सरस्वती ॥
\+ + + + + + +
धर्मसंरक्षणार्थाय तद्देशे निवसेद्द्विजः ।
प्रातःकाले समारभ्य नियमः कथ्यतेऽधुना ॥
त्रैकाले विहितं कर्म तध्यानैर्मित्रकानि च ॥

End :

आयुष्यं वर्धते तस्य शालाक्षेत्रं मवोदकम्(?) ।
घृतपाने महाव्याधिमरणं रूपपातने ॥
नारमारोदयेद्यस्तु ×रीनां च समुत्तरे ।
प्रवासे नि ×× तस्य शीघ्रं च पुनरागमः ॥

Colophon : — — —

866

Sl. No. 7820 कर्मदीपिकाऽनुक्रमणिका Ms. No. P. 5806/1

Beginning:

आचमनविधिः, दन्तधावनविधिः, स्नानविधिः, × विविधस्नानविधिः, वस्त्र-स्नानविधिः, कुशविधिः, ऊर्ध्वपुण्ड्रविधिः ॥

End :

महासंकल्पविधिः, विधवाया प्राजापत्यकृच्छ्रं, रोगनिरूपणं, मातुलदुहितृपरिणयः, अश्विनीदेवतादानं, अस्थिसञ्चयनविधिः ॥

Colophon :

— — —

867

Sl. No. 7822 कर्मविपाकः (शातातपीयः) Ms. No. P. 8923/7

Beninning :

× × × × × × × × तेभ्यः श्रद्धासमन्वितः ।

व्रताङ्गदानाति ॥

गो × ति × हिरण्या × वासो धान्यगुडानि च ॥
रौप्यं ×××××× दानं प्रकीर्तितम् ॥

एतानि गवादीनि दश दानानि ॥

End :

अथ कटिशूलहरदानम्-

गोगामी कटिशूली स्यात् तस्य चान्द्रायणं तथा ।
+ + + + + + + ॥

स च परिभाषायां दर्शितिः (?) । सङ्ख्यात्वयुलम् । गवादिदान × × × × × ॥

Colophon :

इति × × शूलहरविधिः । इति शातातपीयकर्मविपाकोक्तपरिभाषाविधिः ; इति प्रथमपत्रे दृश्यते ॥

868

Sl. No. 7825 कर्मविपाकः (ज्ञानभास्करीयः) Ms. No. C. 2424

Beginning :

तुभ्यं नमो भगवते श्रुतमण्डलाय
ज्ञानात्मने सकलचाक्षुषपौरुषाय ।
सर्गस्थितिप्रलयकारणकारणाय
साक्ष्ये स्थिताय सकलस्य शुभाशुभस्य ॥

End :

सावेगोद्विग्नचित्तत्वं द्रव्यहानिर्यतस्ततः ।
पशूनां हानिरप्येवं बन्धूनां च तथा रुजः ॥
नृपचौराग्निनिक्षेपे वाणिज्ये कणतो व्ययः ।
जन्मजात्यनुमन्त्राद्यं तत्सर्वं प्रक्रमाद्वदेत् ॥

Colophon :

इति श्रीज्ञानभास्करे सूर्यारुणसंवादे सुजतश्चण्डालदिगानश्रवणोत्थाम्लपित्तव्याधिकर्मप्रकाशः समाप्तोयं सर्वरोगाधिकारः । शके १८४९ सर्वजिन्नामसंवत्सरे कार्तिकशुक्लनवम्यां श्रवणनक्षत्रे समाप्तोऽयम् ॥

869

Sl. No. 7828 कर्मविपाकः (मान्धात्रीयः) Ms. No. P. 64/4

Beginning :

अथ सूर्यप्रतिमादानम्—

अथातः संप्रवक्ष्यामि सूर्यदानमनुत्तमम् ।
बलहीनो यदा सूर्यः तदा तद्दानमाचरेत् ॥

जन्मर्क्षे ग्रहयोगे वा भानुवारे विशेषतः ।
देवालये गृहे वाऽपि गोमयालेपितस्थले ॥
गोधूमैराढकमितैः राशिं कृत्वाऽथ तत्र वै ॥

End:

अथ श्वेतमण्डलर्व (!) हरम्—

हंसघाती भवेद्यस्तु तस्य स्यात् श्वेतमण्डलम् ।
रौप्यं पलत्रयमितं हंसं दद्यात् विशुद्धये ॥

अथ विसर्पहरम् । कर्मविपाकसमुच्चये—

अमेध्यस्य प्रदाता वै विसर्पव्याधिमान् भवेत् ।
मासत्रयं व्रतं कुर्यात् दद्यादन्ते पयस्विनीम् ॥

गोदानमन्त्रः नवग्रहप्रकरणे दर्शितः ॥

Colophon :

इति कर्मविपाकः समाप्तः ॥

870

Sl. No. 7842 **कर्मविपाकः** (हेमाद्रीयः) **Ms. No. P. 2282/4**

Beginning :

अथ हेमाद्रिकल्पः लिख्यते—

सङ्कल्पं चैव पूर्वेद्युः कृत्वा ब्रह्मपुरस्सरम् ।
अश्वदानं करिष्यामः सर्वपाप विशोधनम् ॥
पुण्याहं वाचयित्वाऽथ कृत्वा ब्राह्मणभोजनम् ।
सहस्रं वा तदर्धं वा तदर्धं पादमेव वा ॥

End :

दुहितायां तथा भानोरग्नेश्च वरुणस्य च ।
याश्च गावः प्रवर्तन्ते वनेषूपवनेषु च ॥

प्रीणन्तु ता मम सदा पुत्रपौत्रप्रदास्सुखम् ।
प्रयच्छन्तु दिवा रात्रमविच्छेदं च सन्ततेः ॥

Colophon :

इति दानमन्त्रः ॥

871

Sl. No. 7848 कर्मविपाकसारः Ms. No. P. 4865/1

Beginning :

प्रासूतोमप्रसूयं तनयमिह पितारामकृष्णश्च योऽयं
प्रायश्चित्तेषु सारं दिनकरविबुधः शान्तिकानां च सारम् ।
कृत्वाऽथो कर्मपाकेष्वखिलबुधमुदे सारमेतं तनोति
श्रीरामांघ्रिप्रसादादयमपि भजतां ख्यातिमुच्चैर्धरायाम् ॥

End :

कर्मविपाकसुधानिधौ–

कर्णरोगनिदानानि भाषन्ते त्रीणि सूरयः ।
पैशुन्यं कर्णभेदं च कर्णगर्ताभिघातनम् ।

तत्र कर्णपूयहरत्व– कर्मविपाकसङ्ग्रहे–

मातापितृगुरूणां च देवर्षिब्राह्मणांस्तथा ।
× × × × × × × ॥

Colophon :

४१ तमे पत्रे–

इति श्रीरामकृष्णसुतदिनकरभट्टकृते कर्मविपाकसारे अनियतदेहव्यापिरोगहराणि ॥

872

Sl. No. 7851 कर्मसिद्धान्तः Ms. No. A. 643

Beginning :

श्रीविठ्ठलं नमस्कृत्य मध्वहृत्कमले स्थितम् ।
संक्षेपात् कर्मसिद्धान्तं करोमि पुरुषोत्तम ॥१॥

ब्राह्मे मुहूर्ते चोत्थाय चिन्तयेदात्मनो हितम् ।
स्मृत्वा नारायणं देवं शरण्यं शरणं व्रजेत् ॥

End :

अपाहेति जपेत्सूक्तं श्राद्धे भुक्तस्तु षोडश ।
ततः पापाद् प्रमुच्येत त्रिंशद्वारं जपेद्यदि ॥

Colophon :

इति श्राद्धोपयोगिगर्गस्मृतयः । इति श्रीपुरुषोत्तमतीर्थीये कर्मसिद्धान्तोऽयं ग्रन्थस्समाप्तः ॥

873

Sl. No. 7852 कर्मविपाकसुधानिधिः Ms. No. P 2282/3

Beginning :

वागीशाद्याः + + सुपक्रमे ।
यन्नत्वा + + + + तं नमामि गजाननम् ॥
तेन मायणपुत्रेण सायणेन मनीषिणा ।
ग्रन्थः कर्मविपाकाख्यः क्रियते करुणावता ॥

End :

तैलं पुष्टिकरं नित्यमायुष्यं पापनाशनम् ।
अमङ्गल्यहरं पुण्यं अतः शान्तिं प्रयच्छ मे ॥
स्नानीयं मम देहेन्तर्बहु(?) सम्पन्न सञ्चयम् ।
यु(?)वंशसम्भवं यच्च तत्सर्वं विलयं कुरु ॥

Colophon :

इति सायणार्यकृतौ कर्मविपाकसुधानिधिः समाप्ता ॥

874

Sl. No. 7856 कर्मविपाकार्कः Ms No. C. 2269

Beginning :

दिवाकरपदद्वन्द्वं फलद्वन्द्वप्रदायकम् ।
त्रैलोक्यतमसो नाशकर्तारं प्रणमाम्यहम् ॥

\+ + + + + + +

श्रादे भट्टद्वितीयक्रमनिवयविदामव्ययती योग्रगानां(?)

भट्टश्रीनिबिजकुलजलनिधेरुद्गतः पूर्णचन्द्रात ।

तत्सू नुः शङ्कराख्याजगदमरणद्वन्द्वमलब्याकुर्वत्-

प्राचीनेरस्तमित्रं दलयितुमखिलं कर्मपाकार्कमेतत् ॥ (?)

End :

आयुष्यार्थे दूर्वा । तेजोवृध्यर्थे घृतम् । पश्वर्थे व्रीहयः । राष्ट्रार्थे यवः । सर्वकामार्थे शर्करपायसम । ज्वरनाशार्थे मध्वक्तान्याम्रफलानि । सीताज्वरनाशो गुडूचाश्वत्थ-समिधः । कन्यार्थे मध्वाक्ता लाजाः । इति त्वरितरुद्रप्रयोगः ॥

Colophon :

इति श्रीमीमांसक भट्टनीलकण्ठात्मज-भट्टशङ्करकृतौ कर्मविपाकार्कः समाप्तः ॥

875

Sl. No. 7857 कर्माधिकारनिर्णयः (उत्तरक्रियायाः) Ms. No. P 4477/1

Beginning :

दुहितुः × ति सत्वे स्वपितुः क्रियार्हत्वं अस्ति वा न वेति विचार्यते । त × स्यावि(?)पूर्वपक्षः। नास्तीति स्मृतिचन्द्रिकासरस्वती विलासविज्ञानेश्वरावरदराजीयादिग्रन्थकर्तृभिः स्पष्टीकृतम् ॥

End:

सपिण्डीकरणं ज्ञातिः कुर्यात् समन्त्रकम् ॥

विष्णुपुराणे—

पुत्रः पौत्रः प्रपौत्रश्च तदूर्ध्वं भ्रातृसन्ततिः ।

××××× सन्ततिर्वापि क्रिया ×× प्रजाय च ॥

तेषामभावे सर्वेषां समानोदकसन्ततिः ॥

Colophon :

876

Sl. No. 7859 **कर्माधिकारिनिर्णयः** Ms. No. P. 5293/69

Beginning :

कर्तृनिर्णयः—

औरसे तु समुत्पन्ने दत्तो ज्येष्ठो न चेष्यते।
न्यूनोऽपि वयसा पित्रोः कुर्याद्वैरसः सुतः ॥

पुत्रं प्रतिग्रहीष्यन् बन्धूनाहूय राज्ञे निवेद्य निवेशनस्य मध्ये भ्रातृभिंहुत्वा दूरबान्धवं संनिकृष्टमेव ॥

End :

मलमासमृतानां तु मति(?) त्वादाब्दिकान्तरम् ।
शुद्धमासे मृतानां तु मलिने प्रथमाब्दिकम् ।
यस्य त्रयोदशो मासो मलमासो यथा भवेत् ।
तत्राब्दं प्रथमं कुर्यात् ×× न्तरा तं चतुर्दश ॥

Colophon :

— — —

877

Sl. No. 7863 **कलियुगधर्मः** Ms. No. P. 7117/7

Beginning :

नारदीयसंहितायाम्—

राक्षसाः कलिमाश्रित्य जायन्ते ब्रह्मयोनिषु ।
विष्णुवैष्णवविद्वेषाः प्रचरन्ति हि तामसाः ॥

End :

श्रीविष्णुपुराणे—

सर्वे ब्रह्म वदिष्यन्ति सम्प्राप्ते तु कलौ युगे ।
नानुतिष्ठन्ति मैत्रेय शिश्नोदरपरायणाः ॥

मुखं दग्धं परान्नेन हस्तौ दग्धौ प्रतिग्रहात् ।
मनो दग्धं परस्त्रीभिः ब्रह्मशापः कृतः कलौ ॥
दग्धं + + + + + + + ॥

Colophon :

— — —

878

Sl. No. 7861 काम्यवृषोत्सर्गविधिः (दानार्कप्रयोगसारीयः) Ms. No. P. 7804/1

Beginning :

काम्यवृषोत्सर्गविधिरुच्यते । तिथिदीपिकायां कार्तिकमासकृत्ये—

अथ काम्यं वृषोत्सर्गं प्रवक्ष्याम्यनुपूर्वशः ।
शृणु षण्मुख यत्नेन सावधानमना भव ॥

End :

वृषभोत्सस्थानान्ते ब्राह्मणान् सम्भोज्य समापयेदिति । यस्य स्मृत्येत्यादि कृतकर्म विष्णवे समर्प्य आचम्य कर्मान्ते पूर्ववत् स्वस्तिवाचनं कुर्यात् ॥

Colophon :

इति दानार्कप्रयोगसारे काम्यवृषोत्सर्गविधिः ॥

879

Sl. No. 7866 और्ध्वदैहिकविचारः Ms. No. P. 5726/148

Beginning :

अथ काम्योपनयनकालाः-

गर्भाद्वा जन्मतो वाऽपि विप्राणां वत्सरेऽष्टमे ॥
राज्ञामेकादशीं मौञ्जीं बन्धनं द्वादशे विशाम् ।
आषोडशाद्ब्राह्मणानां(?) विंशतेर्विंशाम् ॥

End :

अष्टमे सर्वकामस्य नवमे कान्तिमिच्छताम् ।
कर्तव्यं दशमे वर्षे त्वक्षकाष्ठस्य चोत्तरे ॥
इन्द्रियार्थी तु पश्चार्थी षोडशाद्व्रमता क्रमेत्(?)॥ इति॥

Colophon :

इति काम्योपनयनकालाः ॥

880

Sl. No. 7867 कारागृहनिवासप्रायश्चित्तम् (हेमाद्रीयः) **Ms. No. P. 7864**

Beginning :

मासे स्थिते द्विजातौ तु प्राजापत्यं विशोधनम् ।
प्राजापत्यं च चान्द्रं च चरेत् संवत्सरोषिते ॥

एतदावृत्त्या एकद्वित्र्यादिसंवत्सरेषु उषितस्य प्राजापत्यं चान्द्रायणं च संवत्सरक्रमेण प्रायश्चित्तं कलौ धर्मः ; मानवस्य अशक्तत्वात् ॥

End :

आज्येन अष्टोत्तरं अष्टाविंशतिर्वा व्याहृतीभिः शालाहोमं कृत्वा उदीच्याङ्गगोदानं नान्दीश्राद्धं वैष्णवश्राद्धं उत्तरशालाहोमं च कृत्वा निरीक्षिताज्यदानं कृत्वा पाहित्रयोदशहोमं हावयित्वा सक्त्वाज्यसंमिश्रतिलैः होमं हुत्वा पुनः संस्कारं आचार्यः कुर्यात् । ब्राह्मणान् भोजयेत् ॥

Colophon :

इति हामाद्री कारागृहनिवासप्रायश्चित्तम् ॥

881

Sl. No. 7168 कार्पासादिदाननिर्णयः **Ms. No. P. 2309/6**

Beginning :

अथातः उत्तरं पैतृमेधिकं व्याख्यास्यामः—

अनुज्ञा । नमस्सदसे । नक्षत्रनाम जातस्य शर्मणः कार्पासादिपञ्चदानानि कर्तुं योग्यतासिद्धिमनुगृहाण । सङ्कल्पः । अपवित्रः । अस्य नक्षत्रे राशौ जातस्य शर्मणः । + + + पञ्चदानानि करिष्ये ॥

End :

कपालोत्थः कपालाग्निः तुषाग्निस्तु तुषोद्भवः ।
दर्भमुष्टितृतीयोत्थो भवेदुत्तपनाग्नयः ॥
कपालदहनाज्जातः दर्भमुष्टिप्रदीपितः ।
पुनःपुनः प्रदीप्तः स्यात् एष उत्तपनः स्मृतः ॥

Colophon :

— — —

882

Sl. No. 7873 कालनिर्णयः Ms. No. P. 1940/2

Beginning :

गर्भाधानम्—

अष्टमी नवमी षष्ठी चतुर्थी च चतुर्दशी ।
पूर्णाऽपि वर्जयेत् शिष्टाः निषेके तिथयः स्मृताः ॥
रिक्ता पर्वाष्टमी नन्दा दिवा जन्मत्रयं तथा ।
पापग्रहाणां वाराश्च त्याज्याश्चैवामृतौ गतिः ॥

End :

कृत्वा विप्रात् सजलकलशैश्चाग्रतो वामतोऽर्कं
स्नातः स्रग्वी ललनसुमनोर्मङ्गलैर्वेदघोषैः ।
व्यस्तैर्यात्राकथितशकुनैर्द्वारमार्गेण राजा
हर्म्यं पूर्वं प्रकररुचिमत्तोरणं तं विशेच्च ॥

Colophon :

— — —

883

Sl. No. 7881 कालनिर्णयः (भट्टोजिदीक्षितीयः) Ms. No. SB. 44

Beginning :

अथ चैत्रमासः—

चैत्रशुक्ल तिपदि वत्सरारम्भः । सम्मचौदयिनी तिथिर्माह्या ।

End :

चैत्रामावास्या मन्वादिः । सा चापराह्णव्यापिनी ग्राह्या ; कृष्णपक्षस्थत्वात् ; इति फाल्गुणमासः समाप्तः ॥

Colophon :

इति भट्टोजिदीक्षितकृतकालतिथिनिर्णयः समाप्तः ॥

884

Sl. No. 7882 कालमाधवव्याख्या (दीधितिः) Ms No. C. 2563/1b

Beginning :

श्रीमल्लिकार्जुनं देवं त्रिविषद्गणवन्दितम् ।
गौरीविनायकोपेतमिष्टदं नौमि सर्वदा ॥१॥

\+ \+ \+ \+ \+ \+ \+

नत्वा श्रीमाधवाचार्यं तदुक्तं कालनिर्णयम् ।
प्रबोद्धुं कुरुते व्याख्यां कालनिर्णयदीधितिम् ॥७॥

End :

श्रुतिस्मृतिभ्यां सुजनो नियम्यते परापवादेन तु मध्यमो जनः ।
कषायकुण्डोद्धृतशुष्कचर्मवद्दण्डेन नीचः समुपैति मार्दवम् ॥ इतिस्मृतेः ॥
उपदेष्टुं च शास्त्राणि जनाः सर्वेऽपि पण्डिताः ।
तदनुष्ठानकाले तु मुनयोऽपि न पण्डिताः ॥ इति भावः ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणविद्वन्मुकुटहीराङ्कुरश्रीमद्भट्टमल्लिकार्जुनसूरिसूनु श्रीभट्टनरसिंहसूरिसूनु श्रीभट्टलिङ्गेश्वरसूरिसूनुभट्टनागेश्वरविरचितमाधवीयकालनिर्णयव्याख्यायां कालनिर्णयदीधित्यां पञ्चमप्रकरणं सम्पूर्णम् ॥

अनेन प्रीयतां देवो भगवान्मल्लिकार्जुनः ॥
गौरीविनायकोपेत इष्टाधिकफलप्रदः ॥१॥

885

Sl. No. 7883 **कालनिर्णयः (भट्टरामचन्द्रीयः)** Ms. No. C. 146/1

Beginning :

श्रीनृसिंहपदद्वन्द्वं नत्वा गणपतिं गुरून् ।
रामचन्द्रोऽतिसङ्क्षिप्तं कुरुते कालनिर्णयम् ॥

तत्र कालो द्विविधः ; नित्यः खण्डश्च । नित्यस्तु ईश्वररूप एव ॥

'अनादिरेष भगवान् कालोऽनन्तोऽजरोऽमरः ।'

इति वचनात् । खण्डः क्षणादिपरार्धपर्यन्तः ॥

End :

गुणानामेकदेशोऽयं गङ्गायाः कीर्तितो मया ।
समस्तानीह को वक्तुं शक्तो वर्षशतैरपि ॥
यथार्णवस्थरत्नानि मेरोस्तु कनकोपलाः ।
सङ्ख्यातुं नैव शक्यन्ते भागीरथ्यास्तथा गुणाः ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणाभिज्ञतत्सदुपनामक-भट्टबालकृष्णाङ्गज-भट्टविठ्ठलसूनु - भट्टराम-चन्द्रकृत कालनिर्णयप्रकाशः समाप्तः ॥

886

Sl. No. 7885 **कालनिर्णयचन्द्रिका** Ms. No. P. 4012

Beginning :

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
प्रणम्य मातरं गङ्गां भैरवं वनशङ्करीम् ।
महादेवं च पितरं श्रौतस्मार्तविशारदम् ॥
दिवाकरेण सुधिया सारमुद्धृत्य शास्त्रतः ।
शिष्टानां तन्यते तुष्ट्यै कालनिर्णयचन्द्रिका ॥

End :

अधिमासवद्बोध्यमिति ।

वीक्ष्य निर्णयसिन्धुं च हेमाद्रिं स्मृतिसारकाम् ।
कालादर्शं पारिजातं कालनिर्णयदीपिकाम् ॥
भास्कराख्यनिबन्धं च माधवं निर्णयामृतम् ।
नानाग्रन्थान् संविचार्य कृतं शिष्टेष्टतुष्टये ॥

कालोपनामरावेश भट्टसूनोः सुधीमतः ।
महादेवद्विजार्यस्य सूनुना प्रभविष्णुना ॥

दिवाकरेण रचिता कालनिर्णयचन्द्रिका ।
गिरिजाजानितुष्ट्यर्थं मुदं वितनुतात्सताम् ॥

Colophon ;

इति श्रीवात्कालोपनामक-भट्टमहादेव-द्विजवर्यसूनु-भट्टदिवाकर-विरचितकालनिर्णयचन्द्रिकायां मलमासनिर्णयान्त संवत्सरकृत्यं सङ्क्षेपेण समीरितमिति ॥

887

Sl. No. 7887 कालनिर्णयदीपिकाविवरणम् Ms. No. A 677

Beginning :

श्रीविठ्ठलं गुरुंश्च गोपालप्रसादाख्यान्नत्वा कालनिर्णयदीपिकामातन्म इत्यन्वयः । अत्र समुच्चयद्योतकाव्ययीभावेन गुरुदेवतैक्यमाचार्याणामभिमतमिति प्रतीयते ॥

End :

प्रान्तवर्तिना दीपिकेति पदेनैतत्सूचितम् । दीपवदयं ग्रन्थो सर्वजनव्यवहारसिद्ध्यै सर्वदेशप्रख्यात आकल्पं कल्पतामिति ॥

\+ + + + + + +

श्रीकृष्णाचार्य × × × रुरयमवतान्मां कृपां प्राप्य यस्य
श्रीरामाचार्यसूनुर्विवरणकृतौ दीपिकाया नृसिंहम् ॥

Colophon :

इति श्रीमत्सर्वशास्त्रज्ञसकलसदागमा .... सपरिव्राजक श्रीगोपालगुरुपूज्यपादशिष्य श्रीरामचन्द्राचार्य सुत नृसिंहाचार्यकृतं कालनिर्णयदीपिकाविवरणं समाप्तम् ।

888

Sl. No. 7895 कालनिर्णयः (हेमाद्रिसारः) Ms. No. C. 219

Beginning:

मासश्चतुर्धा— त्रिंशतादिवसैः सावनः सूर्यस्य संक्रमादिसंक्रान्ति सौरपक्षद्वयवत् चान्द्रः आश्विन्यादिरेवत्यन्तनक्षत्रपरिवर्तनेन नाक्षत्रः ॥

End :

काम्यं तु गौणेन कर्तव्यमेवेति भावः ॥

मुख्यकालमुपाश्रित्य गौणमप्यस्तु साधनम् ।
न मुख्यद्रव्यलाभेन गौणकालप्र × × × × ॥
× × × × × × × × × बोध्यः ॥

Colophon :

इति श्रीमद्विद्वज्जनमुकुटालङ्कृत श्रीमद्भट्टोजीदीक्षित विरचितहेमाद्रिसारभूतकालनिर्णयः समाप्तः ॥

889

Sl. No. 7896 कालनिर्णयदीपिकाविवरणम् Ms. No. P. 2874

Beninning :

× × × मक्षिरसमप्रभा ।
अविघ्नेन समाप्तिं मे ग्रन्थस्य कुरुताच्छिवम् ॥
+ + + श्रीरामचन्द्रकृतिना निधिना कलानां
व्यातीतमेतदधुना वसुधा सुधाय ।
श्रीकालनिर्णयकृदुक्तिसुधाब्धिसार-
मापीय कर्णपुटकैः कलयन्तु कालम् ॥

तत्सूनुना समयनिर्णयदीपिकायाः गाम्भीर्यगर्भपदपद्यगुणान्वितायाः ।
निर्माप्यते विवरणं कणशः प्रवीणैराचूडमूलमवलोक्य विवेचनीयम् ॥

End :

तथाचोपसंहृतं कालनिर्णयकृतौ । तस्माच्छूद्रा आमश्राद्धं कुतुपोत्तरार्धप्रभृति प्रवृत्ते अपराह्णे द्विजा आमश्राद्धं पूर्वाह्ण इति । एकोद्दिष्टमुपक्रमे तु कुतपे प्रातस्तु नान्दीमुखमिति ॥

Colophon :

— — —

890

Sl. No. 7899 कालनिर्णयः (सङ्ग्रहात्मकः) Ms. No. P. 2268/14

Beginning :

नित्यादर्धचतुर्थी वसुमनुतिथिषु + + + पस्तमीया
सप्तत्रिंशच्च तस्य प्रतिपदि च पुनः षडातः(?) त्रिंशदेव।
एवं पर्वद्वयेऽपि त्रियुतदशदिने चाष्टयुज्यांशतिथिःस्यात्
एवं विष्वादिकाले सकलमुनिमतं स्वय(?)मेवन्नकाले ॥

End:

अष्टमी रोहिणीयुक्ता निश्यर्धे यदि दृश्यते ।
मुख्यकाल इति ख्यातः तत्र जातो हरिः स्वयम् ॥

Colophon :

— — —

891

Sl. No. 7900 ऋणशोधनविधिः Ms No. P. 2044

Beginning :

कालप्रकाशिकाप्रारम्भः—

शुद्धस्फटिकसङ्काशं रम्यसिंहासने स्थितम् ।
पद्मया सहितं नित्यं नरसिंहं भजामहे ॥
गरुडध्वजसेनान्यं कलये चक्रधारिणम् ।
यद्ध्यानमनसा त्रस्ताः प्रत्यूहा यान्ति दूरतः ॥

+ + + +

प्राचीनानि विधानानि सम्यग्वीक्ष्य समन्ततः ।
सङ्गृह्य तेषु सारांशं वक्ष्ये कालप्रकाशिकाम् ॥

End :

आयां × मृत्युधनलाभमतः प्रसाद-
सङ्ग्राम-मूरगतिसूक्तिजयाः क्रमेण ।
इन्द्रादिदिक्षु सुधियः स्वरभाषितेन
शंसन्त्यगाधशकुनार्णवकर्णधाराः ॥

Colophon :

इति श्रीनृसिंहसूरिविरचितायां कालप्रकाशिकायां क्षुधादिफलं नाम द्वि.ग.ति..मोऽध्यायः । काळप्रकाशिका समाप्ता ॥

892

Sl. No. 7903 **कालविधानपद्धतिः** Ms. No. C. 3984/1

Beginning :

नमः शिवाभ्यां स.वि.ायकाभ्यां जग.त्पितृभ्यां × × × × ।
× × × × भ्यश्च नवग्रहेभ्यो नमो वसिष्ठादिमहामुनिभ्यः ॥१॥
प्रणम्य × × × × × भवानीसखमिन्दुभूषणम् ।
विदग्धमौहूर्तिकवृद्धये × × कीर्तिं करोमि × × × × तिम् ॥२॥

End :

अरबिन्दमग्रामनिवासकुण्डिने
प्रसिद्धगङ्गाधरपादनन्दनः ।
त्रिविक्रमः कालविधानपद्धतिं
चकार सांवत्सरिकप्रसादतः ॥
वसिष्ठगर्गादिमतामृताम्बुधेः समुद्धृतां
× × × × कालविधानपद्धतिम्
विलोक्य शास्त्रादिर्थ(?)मुपन्ति ये बुधाः
चिराय तेभ्यः शिवमस्तु भूतले ॥

Colophon :

893

Sl. No. 7904 **कालविधानपद्धतिव्याख्या** (श्रीधरीया) Ms. No. C· 3984/2

Beginning :

करोम्यहं कालविधानपद्धते:
व्याख्यां शिशूनामपि बोधकारिणीम् ॥
×× वाजस्पतिनाग्द्यादिभि: ×
प्रणीतशास्त्रैर्विरुद्धसंशय: ॥ १ ॥

प्रथमश्लोकेन इष्टदेवता × × × शास्त्रप्रयोजनं च उच्यते ॥

End :

यत्कृते प्रारब्धकार्यं च सिध्यतीति । तयोक्तमर्णवे ॥
गुरूदये रवौ खस्थे चन्द्रे तोये स्मरेऽथवा ।
द्रव्यसङ्ग्रहणे श्रेष्ठं प्रारब्धमपि सिध्यति ॥ इति ॥
अथ श्लोकद्वयेन प्रबन्धावसानमाह । स्पष्टोऽर्थ: ॥

Colophon :

इति श्रीश्रीधराख्ये कालविधामपद्धतिव्याख्याने तिथिवारर्क्षयोगविधि: समाप्त: ॥ इति कालविधानपद्धतिव्याख्या समाप्ता ॥

894

Sl. No. 7905 **कालविभाग:** Ms. No. C. 3410/3

Beginning :

पञ्च पञ्च उष: काल. सप्तपञ्चारुणोदय: ।
अष्ट पञ्च भवेत्प्रात: शेषस्सूर्योदयस्तथा ॥

End :

आदौ नित्यं समाश्रित्य षण्मतानि ततोपरि ।
यथा यथा प्रकुर्वन्ति तथा सिद्धिमवाप्नुयात् ॥

Colophon :

इति विश्वामित्रसंहितायां कालविभागो नाम प्रथमोऽध्याय: ॥

895

Sl. No. 7903 कालादर्शः (कालनिर्णयः) Ms. No. P. 3842

Beginning :

ब्रह्मादयो यद्वशगा युगादि कालप्रभेदाश्च यदीयभेदाः ।
कालाय कलान्तकमूर्तयेऽहं नित्याय तस्मै विभवानतोऽस्मि ॥१॥
वाणिगणेशात्रमरेन्द्र × × णिक्यनीराजितपादपद्मौ ।
अविघ्नमाविष्कृतभक्तलोकमनोरथावन्वहमानतोऽस्मि ॥

+ + + ननु स कालः को वुच्यते ; यो निर्णीयत ; इत्यत्राह ॥

End :

ज्योतिषाणि च तन्त्राणि वास्तुतन्त्रं समीक्ष्य च ।
× यैः सम्यग्विचार्योऽयं कालादर्शो मया कृतः ॥
अन्यत्र वचनानां ये मूलं यच्छन्ति पण्डिताः ।
तेषां प्रेक्ष्या इमे ग्रन्था इति दत्तं मयोत्तरम् ॥

Colophon :

इत्यादित्यभट्टोपाध्यायस्य कविवल्लभापरनाम्नो गर्गकुलतिलकस्य कृतिः कालादर्शो नाम कालनिर्णयः समाप्तः ॥

896

Sl. No. 7914 कृच्छ्रनिरूपणम् . Ms. No. P. 7815/12

Beginning :

अथोद्देशक्रमेणैव कृच्छ्रान्वक्ष्यामि साम्प्रतम् ।
व्रतप्रारम्भवपनं परि × र्म निरूपणम् ॥
प्रथमं ब्रह्मकूर्चं × प्राजापत्यश्चतुर्विधः ।
महाप्रजापतिः कृच्छ्रं चान्द्रायणचतुर्विधम् ॥

End :

पराकः × विहीनप्रायश्चित्तप्रसङ्गे अङ्गव्यवस्था × × × जमदग्निः ॥

घोणामतौ कपोलौ च दन्तजिह्वाक्षिचूचुकौ ।
अङ्गानि हस्तपादाश्च मत्या छित्वा तु ये द्विजाः ॥

Colophon :

— — —

897

Sl. No. 7915 कृच्छ्रलक्षणम् Ms. No. P. 9101/6

Beginning :

प्राजापत्यकृच्छ्रस्वरूपमुक्तं मनुना ।
त्र्यहं प्रातः त्र्यहं सायं त्र्यहमद्यादयाचितम् ।
त्र्यहं न किंचिदश्नीयात् प्राजापत्यं चरन्नरः ॥

तस्य स्वरूपतोऽनुष्ठानाशक्तौ प्रतिनिधिरेवानुष्ठेयः ॥

End :

महापुरुषसङ्कल्पमात्रादेव कामप्राप्तिः अथर्वणे श्रूयते । प्राजापत्यद्वयं सान्तपनं, प्राजापत्यत्रयं पराकं, प्राजापत्यत्रयं तप्तम , प्राजापत्यचतुष्टयं चान्द्रायणम् ॥

Colophon :

— — —

898

Sl. No. 7917 कृत्तिकादीपोत्सवनिर्णयः Ms. No. P. 4776/2

Beginning :

अधुना कृत्तिकादीपोत्सवः निर्णीयते । अत्र भारद्वाजः—

मास्यूर्जे कृत्तिका सायंकाले दीपं प्ररोपयेत् ।
दीपांश्चैव महादीपान् अनेकान् सर्वतो गृहे ॥
देवालये नृपगृहे सभायां पुण्यभूमिषु ॥

End:

अर्के वृश्चिकगे नदस्तसमये दीपोत्सवं पर्वणि

स्यादाद्यं दिनयोः त्यजेद्दिनमथो पर्वास्तकालात्परम् ।

यामार्धे तदधस्तदर्धमवशिष्यात्पर्वयुक्ते विधि

द्व्याह्योर्भौमदिने त्यजेत् ग्रहणवत् पर्वोत्पतेवाग्निभे॥

Colophon :

इति कृत्तिकादीपोत्सवनिर्णयः समाप्तः ॥

899

Sl. No. 7919 — कृत्तिकादीपोत्सनिर्णयः — Ms. No. P. 899

Beginning :

विश्वव्यासमहादेवं[redacted]प्रणम्यानन्तराम्भुना ।

शिवागमानुसारेण कथ्यते कालनिर्णयः ॥

मासाराधनखण्डाख्यमहादीपोत्सवस्य च ।

ततोऽवतिष्ठते तीर्थकालस्यापि च निर्णयः ॥

End :

पौर्णमासी चेत् तत्र कृतो दीपो निष्फल इत्य × । एवं पौर्णमास्यां सायङ्काले भरणी-वेधा(?) दोषस्याङ्गीकारादुदयकास्त्विति भरणीवेधादोष दूरत एव निरस्तः । किञ्च दीपारोपण-कर्मणी × × ॥

Colophon :

— — —

900

Sl. No. 7921 — कर्मविपाकसारः — Ms. No. P. 5726/99

Beginning :

अथ पैतृमेधिकसंस्का × तं पुनरागमने वृद्धमनु —

यद्वा गते पुमान् जीवन् पैतृमेधिकसंस्कृतः ।

घृतकुम्भे स्थापयित्वा तमुत्थाप्य शुभे क्षणे ॥

संस्कृतं जातकर्माद्यैः उपनीतं विधानतः ॥

End :

इष्टिकामायुष्मतीं कुर्यात् ईप्सितां सकृतूस्ततः ।
हिरण्यगर्भः सम्भूतः स्वेषदेवसमः स्मृतः ॥
तस्मान्नैजमपुष्पन्तु (?) पतति × × समागातम् ॥

Colophon :

इति कृतोर्ध्वदेहिकपुनरागमननिर्णयः ॥

901

Sl. No. 7922 **कृत्यमञ्जरी** Ms. No. C. 4203

Beginning :

नत्वा विघ्नहरं देवं व्यासादींश्च मुनीश्वरान् ।
श्रिया युक्तं महाविष्णुं पार्वत्या सहितं शिवम् ॥
आलोच्य बहुशो ग्रन्थान् कौस्तुभादीन् सतां मुदे ।
बापूभट्टेन विदुषा क्रियते कृत्यमञ्जरी ॥

End :

अज्ञानादैवतेः (?) शुध्येन् त्रिभिर्गर्भैस्तु कश्यपेः । एवं सापिण्ड्येऽपि । सपिण्डापत्यदारेषु प्राणत्यागो विधीयते इति तिथितत्त्वे बोधायनः ।

Colophon :

इति श्रीमत्त्र्यम्बकक्षेत्रनिवासिपिङ्गलकुलालङ्कारभूतसूरिवर्यशिरोभूषण श्रीमद् दुण्ढिराजविद्वद्वर्यात्मजपमचन्द्रविदुषा विरचितकृत्यमञ्जरी सम्पूर्णा ॥

902

Sl. No. 7925 **कृत्यरत्नावली** Ms. No. C. 1994

Beginning :

नमस्कृत्य रमानाथं भट्टविठ्ठलसूनुना ।
कृत्यरत्नावली रम्या तन्यते विदुषां मुदे ॥

तत्र चैत्रशुक्लप्रतिपदि वत्सरारम्भः । तत्र प्रतिपदौदयिकी ग्राह्या ।

चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि ।

शुक्लपक्षे सम × × तदा सूर्योदये सति ॥ इति॥

End :

फाल्गुनामाबास्या मन्वादिः । फाल्गुनस्य त्वमाबास्येति मात्स्यात् (?) । सा च अपराह्णिका ग्राह्या कृष्णपक्षगतत्वादिति शिवम् ।

शून्यभूतऋषिचन्द्रमितेऽब्दे माघकृष्णगहरौ रविवारे ।

ग्रन्थपूर्तिमकरोत्किल रामः श्रीरमापतिसमार्पणबुध्या ॥

तद्वत् + + + शुभा मतिः ॥

Colophon :

इति श्रीमत्तत्सत् विठलभट्टात्मजरामचन्द्रविरचिता कृत्यरत्नावली समाप्ता ॥

Extra Information :

दन्तधावनमभ्यङ्ग + + + मनुरब्रवीत् ॥

इति ग्रन्थान्ते दृश्यते ॥

903

Sl. No. 7928 कृष्णावतारकालनिर्णयः Ms. No. P. 6220/1

Beginning :

यदुवंशानुक्रमणिकायाम्—

कालकूटपुरुषस्य यदोस्सहस्रजिदाख्यास्य वंशसम्भूतसात्वतसुतस्यान्धकस्य कु × × रभजमनादिषु जतुर्षु पुत्रेषु वृष्णिष्वित्यपरनामकेषु मध्ये प्रथमपुत्रस्य सूनोर्वृष्णिसार्वभौमस्यान्वयजनितस्याहुकस्य तनययोः देवकोग्रसेनयोः प्रथमस्य ॥

End :

अतः कलियुगप्रवेशपूर्मस्मिन् मास्येव कृष्णावसानार्थं ब्रह्मादिदेवागमनमिति च कृष्णावतारनिर्याणदिवस एव कलिप्रवेश इति स्पष्टोऽर्थो ज्ञातव्यः ॥

सर्वापचारान् क्षमस्व पुरुषोत्तम मे ॥

Colophon :

904

Sl. No. 7929 **केशधारणविधिः** Ms. No. P. 2380/2

Beginning :

वासिष्ठः—

विधवानां च सर्वासां प्रातस्नानं विधीयते ।
अर्धचन्द्राकृतिं मृत्स्नां ललाटे धारयेत्तदा ॥

+ + + + +

नखेन शोधयेत् केशान् कङ्कतैर्न कदाचन ।
रज्जुना बन्धयेत् केशान्सदा वस्त्रावकूर्णयेत् ॥

End :

न कार्यं केशवपनं वैष्णव्या भर्तृहीनया ।
यद्यज्ञानात् करोत्येषां तन्मुखं नावलोकयेत् ॥

श्रीगाच्चरात्रे—

विद्वद्विप्रनृपस्त्रीणां वपनं तु निषिध्यते ।

इति वचनानि, सम्प्रदायश्च ॥

Colophon :

— — —

905

Sl. No. 7930 **कोङ्कणब्राह्मणधर्मः** Ms. No. C. 975/1

Beginning :

ಕ್ರೋಧ ಸಂವತ್ಸರದಾ ಜ್ಯೇಷ್ಠಬಹುಳ ೧೦ ಲ್ಲು ಕಾರ್ಕಳದಲ್ಲು ಶ್ರೀಸ್ವಾಮಿರಾಯರು ಆದ್ಯಂತ ವೈದಿಕರು ಸಹಾ ಇದ್ದು ಜಾತಿವರ್ಗದಾ ವಿಚಾರ ಬರಕೊಟ್ಟ ಪಟ್ಟ ನಕಲು । ಈ ನಕಲನ್ನು ಸಿಮ್ಮ ಊಗೆ ಬಂದು ಮುಟ್ಟಿದಾಕ್ಷಣ ನಕಲು ಬರಸಿಕೊಂಡು ಹಜೂರಿಂದ ಬಂದಶಿರಸ್ತಾರರು ಬಂದಾಕ್ಷಣ ಅವರಿಗೆ ಈ ನಕಲು ಬರಶಿಕೊಡಬೇಕು ॥

End :

ರಾಜ್ಯಪಾಲನೆ ಮಾಡತಕಂತಾ ಧಣಿಗಳಿಗೆ ಸಧಾ ಸಾರ್ವಕಾಲದಲ್ಲು ಆಯುರಾರೋಗ್ಯೈಶ್ವರ್ಯಾಭಿವೃದ್ಧಿಗಳನ್ನು ದಯಮಾಡಿ ನಡಸಿಕೊಡಬೇಕಂತಾ ಶ್ರೀದೇವರಪೂಜೆ ಮಾಡಿಕೊಂಡು ಇದ್ದನೆಂತಾ ಕಾರ್ಕಳದಲ್ಲು ಬರಸಿ ಒಪ್ಪಿಸಿದ ವಿವರಕ್ಕೆ ಶುಭಮಸ್ತು ॥

Colophon:

— — —

906

Sl. No. 7934 क्रमसापिण्डयनिर्णयः Ms. No. P. 5982/1

Beginning :

क्रमसापिण्ड्यनिर्णयः—

पुनः सपिण्डीकरणे गोत्रनाम सरूपकम् ।
न पाथेयं न वैतरणी न पिण्डच्छेदनक्रिया ॥
नो प्रतिष्ठेत्प्रेतशब्दं नार्घ्यसंयोजनादिकम् ।
प्रेतशब्दं न कर्तव्यं सर्वं कुर्याद्यथाक्रमम् ॥

End :

प्रपितामहद्वयं पिण्डं वृद्धप्रपितामहान्तिकम् ।
नोच्चरेत् प्रेतशब्दं तु नैव स्यादर्घ्यमेलनम् ॥
नोपतिष्ठेत् प्रेतशब्दं नार्घ्यसंयोजनादिकम् ।
एतत् क्रमसपिण्डं तु सर्वं कुर्याद्यथाविधि ॥

Colophon :

— — —

907

Sl. No. 7935 क्रियाकल्पमञ्जरी Ms. No. P. 3129

Beginning :

क्षीराम्भोध्यपराजितासिमणिद्वीपस्थलीभूषणं
निष्कामैस्सुहुतानि भक्तिविवशैर्हव्यानि कव्यानि च ।
मूर्ध्ना सम्प्रतिगृह्य सैन्धवशिरोभूत्वा पिबन् सादरं
साक्षात्सर्वजगत्पिता स भगवान् नारायणः पातु नः ॥

साक्षाद्भगवन्तमेवोद्दिश्य परमैकान्तिभिः पित्रादि प्रत्याब्दिकश्राद्धान्यनुष्ठेयानि ॥

End :

'पुनश्च पञ्चसंस्कारैः संस्कृतो हरिमर्चयेत् ।' इति हारीतवचनावगतवैष्णवत्वप्रतिसङ्गाच्च परमैकान्तिभिर्विनैव विश्वान् देवान् पार्वणश्राद्धमनुष्ठेयमिति सिद्धम् ॥

Colophon :

इति क्रियाकल्पमञ्जर्यां विश्वेदेवविनाकृतश्राद्धसमर्थनम् ॥

908

Sl. No. 7983 क्षयाधिमासनिर्णयः Ms. No. P. 6880/5

Beginning :

× × × × × ×

× × × × × क्षयाख्यो गतः ॥

पश्चाद्दक्षभवेन्दुभिः परिमिते षड्बाणसूर्यैस्ततः

अन्यो नागमनाम्नि भूपरिमिते सौम्योऽपि पुष्यस्ततः ॥

End :

वक्रस्यार्कस्य मासे यदि न चलितवै मासयुग्मं विचिन्त्यम् ॥ एवं अयमेव क्षयाधिमास-निर्णयः सर्वैरपि द्वेषवैषम्यछलादिविरहितैः विद्वद्भिरादरणीयः ॥

Colophon :

इति क्षयाधिमासनिर्णयः ।

Extra Information :

एकस्मिन् मासि मासौ द्वौ

+ + + + +

+ + स तु वर्षाधिपो मतः ॥

इति ग्रन्थान्ते दृश्यते ॥

909

Sl. No. 7939 क्षुरिकाबन्धनम् Ms. No. P. 2565/13

Beginning :

क्षुरिकाबन्धनं वक्ष्ये नृणां च प्राकरग्रहाम् ।
विवाहे केषु मासेषु शुक्लपक्षे ह्यतस्तगे ॥
जीवं शुक्रे वसन्तुते (?) चन्द्रताराबलन्विते ।
मौञ्जीबन्धार्हतिथिषु कुजवर्जितवासरे ॥

End :

अर्थहानिः स्वर्थवृद्धिः प्रीतिः सन्ध(?)जनस्तुतिः ।
स्थिरध्वहे वृष ये वा स्पष्टाचिन्दुर्घणे रणम् ।
सिंहे गहे(?) मध्यभागेऽन्त्यभागे स्वकारयोः ।
धूमे गर्दभयोनैव वर्णः श्रेयोऽन्त्यभागहम् ॥

Colophon :

इति क्षुरिकाबन्धनं समाप्तम् ॥

910

Sl. No. 7940 क्षौरविधिः Ms. No. P. 60/54

Beginning :

शन्यर्कभौमनिशिपर्वसु पातसन्ध्म-
ब्राह्मोत्तराग्निपितृदिनानि षष्ठी ।
भुक्त्वा तु रिक्ततिथिषु व्रतपैतृकेषु
क्षौरं च वर्ज्यं धनुकर्कटकुम्भकन्या ॥

End :

दीक्षाकालेभिषेकव्रत + × × मविधो सूतके प्रेतकार्ये
देवार्चारम्भकाले नरपतिवयना ब्राह्मणानुज्ञया च ।

\+ + + + +

क्षौरं श्राद्धं ततोद्वाहं ग्रहबन्धशबानुग-
प्रयाणं पञ्चमन्वासादन ऊर्ध्वं न कारयेत् ॥

Colophon :

— — —

911

Sl. No. 7948 क्षौरदिननिर्णयः Ms. No. P. 5947/49

Beginning :

अश्वि(?)मघपुनर्वसूकटमृगं स्वत्यान्तविष्णोर्गुरुः ।
मित्रं सौम्य च काऽबचन्द्रतृतिया पूर्णोदयं रेवती ।
सर्वांगे(?) शुभलग्नहोरदिवसे युग्मं च मासं शितो(?)
केशः खण्डनवर्धतां मुनिबरा(?)युक्तं वराहं कूमम् ॥१॥

End :

आपादाग्रं गृहस्थस्य आकक्षं ब्रह्मचारिणः ।
आगलान्तं यतेः क्षौरं वानप्रस्थं न किञ्चन ॥८॥
चापे दशदिनं प्रोक्तं कुम्भे चार्धकुटीरकम् ।
पञ्चविंशदिनं कर्कि(?) कन्या सर्वत्र वर्जयेत् ॥९॥

Colophon :

— — —

912

Sl. No. 7954 खण्डजन्माष्टमीजयन्तीनिर्णयः Ms. No. P 5723/50

Beginning :

अथ खण्डजन्माष्टमीजयन्ती निर्णीयते—

तत्र प्रतिपदादितिथिषु उदयास्तमयवेलयोः त्रिमुहूर्तवेधः सामान्येन निरूपितः ॥

End :

निशी या रोहिणीयुक्ता नवमीसहिताऽष्टमी ।
बुधवारसमायुक्ता सोमेनापि विशेषतः ॥
नभः कृष्णे जयन्ती च रुद्रसंज्ञाऽघनाशिनी ॥

Colophon :

इत्यष्टमीनिर्णयः ॥

913

Sl. No. 7955 खण्डतिथिनिर्णयः Ms No. P. 5723/29

Beginning :

अथ खण्डतिथिनिर्णयः । स्कन्दपुराणे– वसिष्ठः–
सर्वा ह्येताश्च तिथयः उदयादुदये स्थिताः ।
सम्पूर्णा इति विज्ञेयाः षष्टिनाड्यो हि वै तिथिः ॥
यदि न्यूना तु सा खण्डा अहोरात्रव्रतादिषु ॥

End :

व्रतप्रारम्भणं तस्मात् अनस्तगुरुशुक्रयोः ।

सङ्ग्रहेपि–
योदयादेति मध्याह्नं अखण्डा सा तिथिः स्मृता ।
खण्डाऽन्यथा व्रतारम्भं समाप्तिं चात्र वर्जयेत् ॥

Colophon :

— — —

914

Sl. No. 7957 खण्डनक्षत्रनिर्णयः Ms. No. P. 5726/64

Beginning :

अथ खण्डनक्षत्रनिर्णयः–

यस्मिन्नस्तमया×तीः तं नक्षत्रं उपोषयेत् ।
असम्भवे तु नक्षत्रं ग्राह्यं(?) नक्षत्रनिशीथयुक् ॥
उपवासे [illegible] तथा [illegible]भुक्तयोः ॥

End :
गर्गः—

अश्विनी रोहिणी ज्येष्ठा मूले हस्तस्तथैव च ।
पूर्वविद्धैव कर्तव्या कृष्णपक्षे विशेषतः ॥
एताः परयुताः कार्याः शुक्लपक्षे विशेषतः ॥

Colophon :

इति नक्षत्रनिर्णयः ॥

915

Sl. No. 7959 गजकर्मविधिः Ms. No. P 4934/1

Beginning :
कालविधाने—

तिष्याश्विकायकरकाम्यमघाऽनुराधा
सोष्णोत्तरादितिमरुद्वसुवैष्णवेषु ।
वागीशशुक्रशशिकाम्यदिनर्क्षलग्ने
रिक्तां विहाय निगदन्ति गजस्य कर्म

End :
नारदः—

गजानां जन्मभं सौख्यं तस्मिन् पूर्वार्धमुच्यते ।
करिणामपरार्धं स्याद्गजकर्म प्रकथ्यते ॥

Colophon :
— — —

916

Sl. No. 7960 गजच्छायानिर्णयः Ms. No. P. 1364/78

Beginning :
गजच्छाया स्मृत्यन्तरे दर्शिता यथा—

यदेन्दुः पितृदैवत्ये हंसश्चैव करे स्थितः ।
तिथिर्वै श्रवणीया च गजच्छायेति सा स्मृता ॥

End:

सैंहिकेयो यदा सूर्यं ग्रसते पर्वसन्धिषु ।
गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत् ॥

Colophon :

— — —

917

Sl. No. 7962 **गणपद्धतिः** Ms. No. P. 6472

Beginning :

पितॄणां पश्चिमे भागे मातृपिण्डं यथाक्रमम् ।
मातामहानां तत्पूर्वे आत्मपत्न्यास्तदुत्तरे ॥
सुतभ्रातृपितृव्याणां पिण्डं दद्यात्तु पश्चिमे ।
पितृमाताामहामध्ये मातुलानां सभार्यकम् ॥

End :

दुहिता भगिनी चैव दौहित्रो भागिनेयकः ।
पितृष्वसा मातृष्वसा जामाता भावुका स्नुषाः ॥
श्वश्रूश्वशुर इत्येते स्वामिसख्यौ यथाक्रमम् ।
शाक्तुको(?)गुरुराचार्यः स्वामिसख्यौ यथाक्रमम् ॥

Colophon :

— — —

918

Sl. No. 7963 **गणेशचतुर्थीनिर्णयः** Ms. No. P. 1364/9

Beginning :

अथ गणेशचतुर्थी—

भविष्योत्तरे—

मासि भाद्रपदे शुक्ले चतुर्थ्यामर्चयेन्नृप ।
मृण्मयेन गणेशस्य रूपं कृत्वा विधानतः ॥

End:

चतुर्थी गणनाथस्य सङ्क्रान्ते परेऽहनि ।

यदि न स्यात्तदा पूर्वा कर्तव्या शुभकाङ्क्षिभिः ॥

Colophon :

-- -- --

919

Sl. No. 7964 गरुडपञ्चमीव्रतनिर्णयः Ms. No. P. 6530/5

Beginning :

हारीतः–

प्रायः प्रातरुपोष्या हि तिथिर्दैवफलेप्सुभिः ।

चतुर्थीसंयुता कार्या पञ्चमी परया न तु ॥

दैवे कर्मणि पित्र्ये च शुक्लपक्षे त ××× ते ॥

End :

सदोपवासे पञ्च × × × × × × एविद्धा ।

अन्यत्र तु पूर्वविद्धेति सुस्थितम् ; इति पञ्चमी ॥

श्रावणे पञ्चमी ग्राह्या पूर्वविद्धा न तूत्तरा ॥

Colophon :

— — —

920

Sl. No. 7966 गर्भमृतसंस्कारनिर्णयः Ms. No. P. 2117/26

Beginning :

यदि प्रजा मृता सा तु प्रणवान्निखनेत्ततः ।

उदरे मृतगर्भश्चेत् बहिरादाय संक्षिपेत् ॥

प्रथमेव तु संस्कारं भूमौ निखनमादिभिः ॥

End :

कयानश्चित्र आभुवत् । शं नो देवी । आपो अस्मान् । दिविजाता यदापः । नक्तं दुरितं द्रुपदा । दिवेन्मुमुचानो व्याहृतयश्च मन्त्राचमनं मन्त्रप्रोक्षणम् ॥

Colophon :

इत्यन्तर्वत्नीमृतिविषयः समाप्तः ॥

921

Sl. No. 7967 गर्भस्रावदोषपरिहारविधिः Ms. No. P 5292/4

Beginning :

ब्राह्मणाग्निरिति षडर्चस्य सूक्तस्य- ब्रह्मा ऋषिः ; अनुष्टुप् छन्दः ; रक्षोहा देवता । गर्भस्रावदोषपरिहारद्वारा गर्भस्य वेदोक्तदीर्घायुष्यत्वसिद्ध्यर्थे जपे विनियोगः ॥

End:

यस्त ऊरूविहरत्यन्तरा दम्पती शये योनिं यो अन्तरारोहत मितो नाशयामहे । यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा निपद्यते । प्रजां यस्ते जिघांसति । तमितो नाशयामहे । + + नाशयामहे ॥

Colophon :

-- -- --

922

Sl.No. 7968 गर्भाधाननिर्णयः Ms. No. P. 2239/30

Beginning :

अथ गर्भाधाननिषिद्धदिनान्युच्यन्ते–

ऋतुस्नानात् प्रभृति षोडशरात्रिपर्यन्तं भवेदृतुकालः । तथापि पर्वद्वयग्रहणस × × × × × व्रतोपवासपितृदिनानि × × × वर्जयेत् ॥

End :

आश्रयः सर्वभूतानां षोडश्यां जायते पुमान् ।

तत्र निषिद्धदिनमाह–

अमास्यास्वमा चैव पौर्णमासी × × × शी ।
ब्रह्मचारी भवेन्नित्यं अकुलस्नातको द्विजः ॥

Colophon :

— — —

923

Sl. No. 7972 क्रमसापिण्डयनिर्णयः Ms. No. P. 5726/131

Beginning :

अथ गर्भिणीधर्मा × × पद्मपुराणम्–

नावास्करेषूपविशेत् मखलोलूखलादिषु ।
जलं च नावगाहेत शून्यागारं विवर्जयेत् ॥
वल्मीकं नावतिष्ठे × × न चोद्विग्नमना भवेत् ॥

End :

कुक्कुटाधासनं चैव शोणितस्य विमोक्षणम् ।
विरोचनं नैव कुर्यात् क्षारान्नं नैव वर्जयेत् ॥
सुश्रुताद्वाऽपि हृदयां दौहृदीनीमाचकतीति(?) ॥

Colophon :

— — —

924

Sl. No. 7975 गायत्रीजपविधिः Ms. No. P. 9341/4

Beginning :

गायत्रीजपकालविषये पाञ्चरात्रे–

यदिवाक्यमलोपं (?) स्यात् जपादिषु कथञ्चन ।
इदं विष्णुरृचं मन्त्रं जपेच्छेषं समापयेत् ॥

End :

गायत्र्या जपमध्ये तु मूत्रबाधादिकं भवेत् ।

तद्विष्णोः परमं मन्त्रं जपेत्तद्दोषशान्तये ॥

Colophon :

— — —

925

Sl. No. 7977 गुरुनमस्कारविधिः Ms. No. P. 4912/51

Beginning :

गुर्वादिनमने इत्थं भावान्तरमाह– स्मृत्वेति । गुरुं साक्षाद्गुरुम् । विश्वोपदेशिकं पूर्वगुरुम् । परमगुरुम् । एकवचनं बहुवचनार्थे । स्वपूर्वान् संप्रदायप्रवर्तकान् गुरून् ॥

End :

ब्रह्मणे नमः । महालक्ष्म्यै नमः । श्रीनारायणाय नमः । कृष्णाय नमः ॥

स्वगुरु च प्रणम्यादौ तथा पूर्वगुरूनपि ।

तद्गुरूंश्च प्रणम्याथ × × × × सिद्धिभाक् ॥

Colophon :

— — —

926

Sl. No. 7979 गुरुस्थाननिर्णयः Ms. No. P. 9054/2

Beginning :

पुरुषस्येह जातस्य भवन्ति गुरवस्त्रयः ।

आचार्यश्चैव काकुत्स्थ पिता माता च राघव ॥

पिता ह्येनं जनयति पुरुषं पुरुषर्षभ ।

प्रज्ञां ददाति चाचार्यः तस्मात् स गुरुरुच्यते ॥

End :

अस्य तु शिष्यस्य गुरोरनादरात् शतश्वो भवो भवति । अन्ते श्वोदौ वान्ते स शिष्यः अन्त्य + + + + + + श्व भवति । श्वजन्मानन्तरं चण्डालजन्मापि भवतीत्यर्थः । यो गुरौ मनुष्यबुद्धिर्न कार्या । क × × × × × × × × × ॥

Colophon :

— — —

927

Sl. No. 7980 **गृहनिर्माणप्रवेशकालनिर्णयः** (पौराणिकः) Ms. No. P. 5726/2

Beginning :

अथ गृहनिर्माणप्रवेशकालाः । मत्स्यपुराणम्—

यदा कालः शुभं × त्वा तदभावनमाचरेत् ।
चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ॥

End :

श्रुतुद्वैधे(?) तपत्रस्या यत्र धर्मावुभौ स्मृतौ ।
श्रुत्योः विरोधे यत्र स्यात मनुवाक्यस्य सम्मतम् ॥
आचारस्य विरोधे तु स्वर्दशास्तु च्यवस्थितिः (?) ॥

Colophon :

— — —

928

Sl. No. 7981 **गृहप्रवेशकालनिर्णयः** (पौराणिकः) Ms. No. P. 5726/164

Beginning :

अथ गृहनिर्माणप्रवेशकालाः । मत्स्यः—

यदा कालं शुभं ज्ञात्वा तदा भावनमाचरेत् ।
चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ॥

End :

पापग्रहोदयाचैश्च पापैर्यदि न बाध्यते ।
वैनाशिकतिथिर्वृक्षे मुहूर्तेष्वभिजिद्भवेत् ॥
प्राणिग्रहणकुमारीणां(?) अभीष्टार्थफलप्रदम् ॥

Colophon :

इति लग्नशुद्धिः ॥

929

Sl. No. 7986 **गोत्रदर्पणम्** Ms. No. B. 96/1

Beginning :

अथ गोत्रदर्पणनिर्णयो लिख्यते–

भार्गवजामदग्न्यगणाः सप्त ।

आङ्गीरसगौतमस्त्वाष्टौ ।

आङ्गीरसे भारद्वाजाश्चत्वारः ।

केवलाङ्गीरसाः सप्तवर्गाः ।

अत्रिश्चत्वारः ।

कश्यपश्चत्वारः ॥

End :

ऊर्जाः, यमः, कान्तजाः, क्षीराः, बृहस्पतिः, मृगाक्षः, वदनः, सर्वस्तीयाः, सगोत्राः । एकपुटा न विवाह्यो ज्ञातव्या (?) ॥

Colophon :

— — —

930

Sl. No. 7987 **गोत्रनिर्णयः** Ms No. P. 927

Beginning :

अष्टादशगणानाह–

जामदग्न्यः वीतहव्याः वैन्या गृत्समदास्तथा ।

वाध्र्यश्वो गौतमाख्योऽपि भरद्वाजाह्वयः कपिः ॥

हरितो मौद्गल्यकण्वौ विरूपो विष्णुवृद्धकः ।

अत्रिर्विश्वामित्रकौ च वसिष्ठः कश्यपाह्वयः ॥

End :

सङ्ग्रहे सगोत्रां समानप्रवरां वा परिणीय प्रजामुत्पाद्य गुरुतल्पगो भवेत् । प्रजा चण्डालेषु निक्षिपेत् । अ + + परिणीयोत्पाद्य प्रजां तां भरद्वाजगोत्रेऽन्तर्भावं कुर्यात् । काश्यपगोत्रे वा । यद्वा स्वप्रवराज्ञाने जमदग्निषु वासयेत् । विवाहमात्रे कृच्छ्रः सर्वत्र वतोऽत्र अष्टोत्तरशतमिन्दाहोमः परित्यक्तान्नाश्चननीव दृक्षेत (?) ॥

Colophon :

— — —

931

Sl. No. 8004 गोत्रप्रवरनिर्णयः Ms. No. C. 893

Beginning :

अथ गोत्रप्रवरनिर्णयः—

विश्वामित्रजमदग्निवसिष्ठकश्यपानां सप्तऋषीणां अगस्त्याष्टमानां यत्सगोत्रं तथा बोधायनोक्तेः वसिष्ठादिषु गोत्रव्यवहारस्त्वौपचारिकः ॥

End :

युगान्तरविषय इति माधवः । + + + गायाः पुनरुद्वाहं ज्येष्ठांशो गोवधस्तथा । कलौ पञ्चनकूर्चीं न भ्रातृजायां कमण्डलुमित्यादित्यपुराणात् सप्तपदीतः प्राक् प्राप्तस्यैवायं निषेधः ; यदि प्रामाणिकत्वमस्येत्यन्ये ॥

Colophon :

इत्युपाध्योपनामक-नागेशभट्टविरचितः गोत्रप्रवरनिर्णयः समाप्तः ॥

932

Sl. No. 8005 गोत्रप्रवरनिर्णयः Ms. No B. 95/1

Beginning :

गणपतिभृगुपूर्वर्षीन् नमस्कृत्य गोत्र
प्रवरगणविशिष्टं निर्णयं शास्त्रसारम् ।
सुजनबुधजनानां प्रीतये संप्रवक्ष्ये
सुगमसमत्वैः सन्नाशीर्मोनि: ॥

End :

उद्वाहव्रतबन्धनादिषु पठेदायुः सुतार्थप्रदं

प्रातः स्मर्तुः अशेषपापशमनं स्याच्चैकवृत्तेः फलम् ॥

Colophon :

इति श्रीकेशवदैवज्ञकृतगोत्रप्रवरनिर्णयः समाप्तः ॥

933

Sl. No. 8019 गोत्रप्रवरनिर्णयव्याख्या Ms. No. P. 6548/2

Beginning :

प्रणम्य परमात्मानं + । + जगतामपि ॥

श्रीमद्वैदिकमार्गप्रवर्तकबोधायनापस्तम्बादिमहामुनिप्रणीतकल्पसूत्रेषु वैदिकमार्गरक्षणार्थं सङ्गृहीता ब्रह्ममीमांसादिविविधन्याय + + + गोत्रप्रवरनिर्णयः + + कर्तुकामः + + + मङ्गलमातनोति ॥

End :

याज्यगोत्रप्रवराज्ञानेन सिध्यति । यतः सर्मकर्मसिद्धिः सर्वानर्थपरिहारश्च गोत्रप्रवरनिर्णयादेव भवति । अतो गोत्रप्रवरनिर्णये महान् यत्नः कार्यः ॥

Colophon :

— — —

934

Sl. No. 8021 गोत्रप्रवरनिर्णयटीका Ms. No. B. 95/2

Beginning:

विघ्नान् विविघ्नन् भजतां भजेऽहं

सत्प्रीतये तद्वचनाविवक्तये ।

पादारविन्दं हृदयारविन्दे

भूतेशजं कुञ्जरवक्त्रवाचा ॥

तत्र तावत् केशवदैवज्ञः + + + गोत्रप्रवराख्यं + + कर्तुकामः + + + आदौ + + मङ्गलमाचरति ॥

End :

एकवृत्तेः फलं– एकस्मिन् परब्रह्मणि वृत्तिः– अध्यासः, तस्याः फलम् । तदिति + + + + प्राभाकरो दैवज्ञविदां वरिष्ठः नारायणायेति समर्पयामि ॥

Colophon :

इति श्रीकेशवदैवज्ञविरचितगोत्रप्रवरे प्राभाकरदैवज्ञकृता टीका समाप्ता ॥

935

Sl. No. 802: गोत्रप्रवरमञ्जरी (गोत्रनिर्णयः) Ms. No. C. 2978

Beninning :

कृत्वा चान्द्रायणानि प्रतिहतदुरितौ मातृवत्पुत्रवच्चा-
प्यन्योन्यं मन्यमानौ सपरिचरता दर्पितौ यावदायुः ।
अज्ञात्वान्यस्वगोत्रप्रवरमुनिगणान् प्रत्यवाये यतन्तः
सुज्ञात्वाऽन्यस्य गोत्रप्रवरमुनिगणान् ब्रह्मलोके वसन्ति ॥

End :

वंशाध्यायी यस्यैवाश्नानि वंशाध्यायी गृहे दिव्यं वर्षसहस्रं एकैकस्यैरतिथिर्भवति । नान्यवरणेन दद्यान्नापुत्राय नाशिष्याय नासंवत्सरप्रोषिताय सर्वेषां पङ्क्तिपावना उपरिष्टाद्भवति + + + प्रवराध्यायमधीते ॥

Colophon :

इति पुरुषोत्तमपण्डितविरचितायां गोत्रप्रवरमञ्जर्यां महाप्रवरगोत्रकाण्डं समाप्तम् ॥

936

Sl. No. 8024 गोपालदेशिकाह्निकम् Ms. No. P. 2079

Beginning :

अखिलभुवनरक्षासाधनायावतीर्णे
कुमतिकलिविलासध्वान्तविध्वंसहेतौ ।

निरवधिकरुणाब्धौ वेदचूडागुरौ मे
भवतु परमभक्तिः सर्वतन्त्रस्वतन्त्रे ॥

\+ + + + +

श्रीपाञ्चरात्रक्षोक्तः प्रपन्नानां महात्मनाम् ।
भगवत्परिचर्याया क्रमः सङ्गृह्यतेऽधुना ॥

End :

भगवत्कैङ्कर्यैकरतेः परमैकान्तिनः अनेकमायानिशावसाने अनन्तमोक्षवासरप्रारम्भे च प्रत्यूषवदवस्थितोऽयं आयुश्शेषकालः इति सर्वं निरवद्यम् ॥

Colophon ;

-- — —

937

Sl. No. 8026 गोपीचन्दनमुद्राधारणविधिः Ms. No. P. 4001/30

Beginning :

ललाटे केशवं ध्यायेन्नारायणमथोदरे ।
वक्षस्स्थले माधवन्तु गोविन्दं कण्ठकूबरे ॥
विष्णुं च दक्षिणे कुक्षौ बाहौ तु मधुसूदनम् ।
त्रिविक्रमं कन्धरे तु बामकुक्षौ तु वामनम् ॥

End :

नारायण नमस्तेऽस्तु नाममुद्राङ्कितो नरः ।
दृष्टमात्राल्लभेन्मुक्तिं चण्डालो ब्रह्मघातकः ॥

\+ + + + +

उदरे त्रीणि चक्राणि × × धः शङ्खं च धारयेत् ।
मूर्ध्नि पद्मकधार्यं च नारायणचतुष्टयम् ॥

Colophon :

938

Sl. No. 8027 **गौणस्नानविधिः** Ms. No. P. 5723/15

Beginning :

व्यासः–

क्नानार्द्रवासस्तु विण्मूत्रं कुरुते यदि ॥
प्राणायामत्रयं कृत्वा पुनः स्नानं समाचरेत् ॥
स्नानार्द्रवासे विण्मूत्रे प्राणायामत्रयान्वितः ॥

End :

अग्निरित्यादिभिर्मन्त्रैः प्रणवेन शिवाणुना ।
षड्भिरङ्गैः प्रशस्तेन कस्यचिद्दुष्टविग्रहात् ।
ईशाद्यैः पञ्चभिः मन्त्रैः क्रमादुज्वलयेद्बुधः ॥

Colophon :

— — —

939

Sl. No. 8029 **गौरीतृतीयानिर्णयः** Ms. No. C. 923

Beginning :

इह किल तृतीयातिथ्यङ्गकत्वेन उत्पन्नानि गौरीव्रतादीनि कानिचिद्व्रतानि । तेषु च तृतीयायाः दिनद्वयव्याप्तित्वे गुणानुरोधेन प्रधानावृत्तेरन्याय्यत्वात ॥

End :

युक्तिहीनविचारे तु धर्महानिः प्रजायते ।
स्मृत्योर्विरोधे न्यायस्तु बलवान् + + + ॥

इत्यादि बृहस्पतियाज्ञवल्क्यस्मृत्यादिभिः न्यायोपष्टब्धार्थस्यैव प्राबल्यत्वाभिधानादिति विदां-कुर्वन्तु विचक्षणाः ॥

Colophon :

कस्तूरिरङ्गविबुधः बहुविद्वद्वरार्थितः ।
गौरीतृतीयाविषयनिर्णीतिमकरोदिह ॥

940

Sl. No. 8030 ग्रहणदिनकर्तव्यनिर्णयः Ms. No P. 2511/13

Beginning :

जगन्नाथपञ्चानने स्मृतिचन्द्रिकायाम्—

पूर्वयामे भवेद्रात्रौ चन्द्रस्य ग्रहणं दिवा ।
भुञ्जीयात्प्रथमे(!) यामे द्वितये द्वितयक्रमात् ॥
अतिकाले तु नाश्नीयान्नाश्नीयात्सर्वथा निशि ।
यदि भुञ्जीत वै मोहात्प्राजापत्येन शुध्यति ॥

End :

महानिशि विषये स्मृतिमुक्तावल्याम्—

महानिशा तु सा प्रोक्ता सार्धयामात्परत्र तु ।
मुहूर्तत्रयपर्यन्ता सर्वकर्मबहिष्कृता ॥

Colophon :

-- -- --

941

Sl. No. 8033 ग्रहणदिनकर्तव्यनिर्णयः Ms. No. P. 5726/95

Beginning :

अथ ग्रहणनिर्णयः—

पर्वप्रतिपदो सन्ध्यौ ग्रहणं चन्द्रसूर्ययोः ।
पूर्वार्धतिथ्योरप्या × कला स्या × शेनो क्षयः ॥
पूर्णिमाप्रतिपत्सन्धौ चादुःखं पूर्णमण्डलः ॥

End :

तथा–

बहुरोगमृत्युजननोदानाहुतयो जपश्च कर्तव्यम् ।
यस्य त्रिजन्मनक्षत्रे ग्रस + + + पौ ॥
तज्जातानां भवेत्पीडा ये नराः शान्तिबर्जिताः ॥

Colophon:

– – –

942

Sl. No. 8034 ग्रहणदिनकर्तव्यनिर्णयः Ms. No. C. 2563/3

Beginning :

पराशरमाधवीये ग्रहणकाले प्रतिषिद्धम् । तदाह–

तदाहम × × चन्द्रसूर्यग्रहे नाद्यादद्यात्स्नात्वा विमुक्तये ।
अमुक्तयोरस्तमितोर्दृष्ट्वा स्नात्वा परेऽहनि ॥ इति ॥

किन्तु राहुग्रहणाचन्द्रसूर्ययोर्ग्रहणाचन्द्रसूर्ययोर्मुक्तयोस्सतोः पश्चात्स्नात्वा भुञ्जीत ॥

End :

गुरुदीपिकायाञ्च–

यामानाद्य चतुष्टयं रविग्रहे चन्द्रे च यामत्रयं
नाश्नीयात्प्रथमं विधोः खग्रहणे मोक्षे निशीथात्पुरा ।
पाश्चाद्भोजनमाचरेद्यदि पुरा स्पर्शोऽर्धरात्रात्पुनः
मोक्षश्चेत्तदनन्तरं भुजिक्रिया यामे हि पूर्वं दिवा ॥

Colophon :

– – –

943

Sl. No. 8038 ग्रहणदिनकर्तव्यनिर्णयः Ms. No. C 1012

Beginning :

श्रीरङ्गपत्तनस्थेन श्रीनिबासतनूभुवा ।
× ह्णदिने श्राद्धकरणाकरण × × × ॥१॥

+ श्च विशेषेण × × रङ्गशास्त्रिणा ।

आं × × × × × × सङ्ग्रहः ॥२॥

End :

शाखां शिखां च पुण्ड्रं च समयाचार एव च ।

पूर्वैराचरितं कुर्यादन्यथा पतितो भवेत् ॥

ग्रन्थं सम्यक् समालोक्य यद्युक्तं तत्प्रगृह्य च ।

नन्दन्तु वा विनिन्दन्तु बालानां तु समं द्वयम् ॥

श्रीरङ्गपत्तनस्थेन श्रीनिबासतनूभुवा ।

बहुस्मृतीः समालोक्य लिखितो ग्रन्थसङ्ग्रहः ॥

Colophon :

इति श्रीरङ्गपत्तनस्थ-श्रीनिवासात्मजरङ्गशास्त्रिणा नियोजिते ग्रहणदिने श्राद्धकर्तव्याकरण-निर्णयं नाम द्वितीयं कुसुमं सम्पूर्णम् ॥

944

Sl. No. 8011 ग्रहभुक्तिदीपिका Ms. No. P. 898/1

Beginning :

उपरागे रवेरिन्दोः यत्र भोजनसंशयः ।

तत्र तन्निर्णयायैषा क्रियते भुक्तिदीपिका ॥१॥

तत्र तावत्कानिचिद्वचनानि चन्द्रसूर्ययोः ग्रहणे भोजनमेव निषेधन्ति ॥

" अहोरात्रान्न भोक्तव्यं चन्द्रसूर्यग्रहो यदि "

इत्यादीनि ॥

End :

द्वादश्यां तद्विधायकस्मृत्यभावात् । पुराणवचनानां च एकादशीमाहात्म्यवर्णनपरतेति तेन तन्निर्णयायोगाच्च द्वादश्यामपि प्रातः तदनुष्ठानमुक्तविरोधाच्छिष्टानुष्ठानविरोधाच्च अयुक्तमेति संक्षेपः ॥

Colophon:

इति श्रीशैलवंश्येन श्रीनिवासविपश्चिता ।
निर्मिता विदुषां प्रीत्यै ग्रहभुक्तिप्रदीपिका ॥

945

Sl. No. 8043 **ग्रहयज्ञनिर्णयः** **Ms. No. P. 5726/150**

Beginning :

अथ ग्रहयज्ञो वक्ष्यते । पञ्चाङ्गशुद्धिः—

एकादशी × × × × रिक्ताश्चापि तिथीर्विना ।
स्वाध्यायदिवसे कुर्यात् विप्रादीनामुपासनम् ॥
नैमित्तिकमनध्यायं कृष्णे च प्रतिपद्दिनम् ॥

End :

सर्वे एव शुभा यान्ति रवावेकादशस्थितौ ।
दिवा सूर्ये निशा चन्द्रे लग्नस्यैकादशस्थितौ ॥
कोटिदोषा विनश्यन्ति गार्ग्यस्य वचनं यथा ॥ इति॥

Colophon :

-- -- --

946

Sl. No. 8044 **ग्रहसंस्थानिर्णयः** **Ms. No. P. 5726/149**

Beginning :

अथ ग्रहसंस्था तत्र गर्गः—

वटोः सूर्यबलं शस्तं विशेषेण गुरोर्बलम् ॥
अन्यथा मृत्युदः सूर्यो गुरुस्तु यमदर्शनम् ॥

× × गर्गः—

End :

तत्तन्मन्त्रेण विधिवत् ग्रहप्रीत्यर्थमादरः ।
निवृ × सुसुखी नित्यं दीर्घमायुश्च विन्दति ॥
तारायां लवणं स्वर्णं कांस्यपात्रं समापयेत् ॥

Colophon :

— —

947

Sl. No. 8046 **घटश्राद्धविधिः** Ms.No. P. 2732/142d

Beninning :

अथ घटश्राद्धविधिरुच्यते–

नारी वा पुरुषोऽथवा यदिकुले भ्रष्टप्रमादादिना
तां त्यक्तवा निरजादिपूर्वकघटश्राद्धादिना दुष्कृतः ।
नो चेत् पातकिनां समस्तकुलजा सर्वे महानिन्दिताः
प्रायश्चित्तविगर्हितं श्रुतिमतं हव्येषु कव्येषु वा ॥

End :

दिक्षु पिण्डान्निधाय दशदानानि कृत्वा अग्निं प्रदक्षिणीकृत्य नमस्कृत्य यस्य स्मृत्येति समाप्य पञ्चाशतं पञ्चविंशतिं द्वादश वा ब्राह्मणभोजनं कारयित्वा + + + + इत्याह भगवान् बोधायनः ॥

Colophon :

— — —

948

Sl. No. 8048 **चन्द्रवृद्धिक्षयनिर्णयः** Ms. No. P. 8777/3a

Beginning :

कलाषोडशिकायास्तु ×पः प्रविशते सदा ।
अमायां तु सदा सोमः ओषधीः प्रतिपद्यते ।
तमोषधिगतं गावः पिबन्त्यम्बुगतं च यत् ॥

End :

तत्क्षीरममृतं भूत्वा मन्त्रपूतं द्विजातिभिः ।
हुतमग्निषु यज्ञेषु पुनराप्यायते शशी ।।
दिने दिने कलावृद्धिः पौर्णमास्यां तु पूर्णता ॥

Colophon :

-- -- --

949

Sl. No. 8049 शम्पाकपिलषष्ठीनिर्णयः Ms. No. P. 1364/40

Beginning :

विशाखा भानुवारेण वैधृत्या च तमास्थिता ।
नभस्या शुक्लषष्ठी या सा चम्पेति निगद्यते ।।

End:

दिवैव योगशस्तो य उषःकालेऽपि वा यदि ।
स्नानदानादिकं चैव सर्वं तत्राक्षयं भवेत् ।।

Colophon :

-- -- --

950

Sl.No. 8050 चक्राङ्कनमासनिर्णयः Ms. No P. 907/3

Beginning :

कल्पान्तरे मासभेद उक्तः--

असिद्धिर्भूमिसम्पत्तिर्मरणं बन्धुनाशनम् ।
आयुर्वृद्धिःस्थाननाशोसम्पदो तीरसम्पदः ।। (?)
शुभप्राप्तिर्ज्ञाननाशः अमोघार्थो वशीकृतः ।।

End :

वृद्धवसिष्ठः—

विवाहानन्तरं मासषट्कमध्ये तु वैष्णवः ।

यदीच्छेदात्मसंस्कारं नारकी स भवेद् ध्रुवम् ॥

Colophon :

— — —

951

Sl. No. 8052 चतुर्थीनिर्णयः Ms. No. P. 5726/30

Beginning :

अथ चतुर्थी परविद्धा ग्राह्या ; युगभूतानामिति युग्मवाक्यात् । युगश्चतुर्थीभूतः पञ्चमी । चतुर्थी परविद्धा ग्राह्या ॥

End :

अस्यार्थः— पञ्चमी श्चवेधेन पूर्वां चतुर्थीं उत्तरां षष्ठीं तिथिं उपवासविषये हन्ति । अथ पञ्चमीविद्धायां चतुर्थ्यां नोपवसेदित्यर्थः ॥

Colophon :

— — —

952

Sl. No. 8053 चतुर्दशीनिर्णयः Ms. No. P. 5723/64

Beginning :

शुक्लचतुदशी पूर्णिमायुता ग्राह्या ; चतुर्दश्या च पूर्णिमेति युग्मवाक्यात् ।

भविष्यत्पुराणे—

एवमेकादशी कार्या द्वादशी च त्रयोदशी ।

सदा कार्या त्रयोदश्यां चतुर्दश्या च पूर्णिमा ॥

End :

पूर्वविद्धा न कर्तव्या परविद्धा तु कीर्तिता ।

एकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी ॥

अमावास्या तृतीया च ता उपोष्याः परान्विताः ॥

Colophon :

इति चतुर्दशीसामान्यविषयः ॥

953

Sl. No. 8055 **चतुर्दशसाक्षिविचारः** Ms. No. P. 7243/5

Beginning :

आदित्यचन्द्रावनिलोऽनलश्च ।
द्यौर्भूमिरामः हृदयं यमश्च ॥

End :

अहश्च रात्रिश्च उभे च सन्ध्ये
धर्मश्च जानाति नरस्य वृत्तम् ॥

Colophon :

इति चतुर्दशसाक्षिणः ॥

954

Sl. No. 8056 **चतुर्वर्गचिन्तामणिः** (दानकाण्डः) Ms. No. P. 58/1

Beginning :

एवं गुणेत्यादि । ममेह जन्मनि जन्मान्तरेषु बाल्यकौमारयौवनवार्धिकेषु जाग्रत्स्वप्नसुषुप्त्यवस्थासु कामक्रोधलोभमोहमदमात्सर्यैः मनोवाक्कायकर्मभिः + + कायादानमहं करिष्ये ॥

End :

रूपसौभाग्यसम्पन्नो दीर्घायुर्निरुजः सुखी ।
पुत्रपौत्रैः परिवृतो दिवं याति न संशयः ॥

× × × × × × ×

× × नान्यात् विद्यां विहाय बदनैकक्रुतो धिवासः ।
गोभूहिरण्यगजवाजिरथादिसर्वं,
तद्वत् कृताधिकमिह भूप भवेत्तु दत्तम् ॥

Colophon :

इति विद्यादानविधिः । इति श्रीमहाराजाधिराजश्रीमहादेवस्य + + + समन्तकरणाधीश्वर × × × हेमाद्रिविरचिते चतुर्वर्गचिन्तामणौ दानकण्डे अतिदानप्रकरणम् ॥

955

Sl. No. 8058 चतुर्वर्गचिन्तामणिः (प्रायश्चित्तकाण्डः) Ms. No. P. 1601

Beginning :

कमलादयितं कृष्णं कमलासनवन्दितम् ।
कमलाक्षमहं वन्दे कमलाकरशायिनम् ॥

अथेदानीं हेमाद्रिकारिणा लोकोपकारार्थं सर्वपुराणस्मृतिवेदज्योतिषवैद्यागमश्रौतस्मार्तादि-सूत्रेषु + + + + तेषां पापानामपनोदनार्थं प्रायश्चित्ताध्यायोऽभिधीयते ॥

End :

पुण्यकालास्तथा सर्वे यद्वा मृत्युरुपस्थिते: ।
तदा गोभूहिरण्यादि दत्तमक्षय्यतामियात् ॥

भविष्योत्तरे–

तत्रायं पापनिचयः स्थूला नरकहेतवः ।
ते समासेन कथ्यन्ते मनोवाक्कायसाधनाः ॥

Colophon :

— — —

956

Sl. No. 8073 चतुर्वर्गचिन्तामणिः (श्राद्धकाण्डः) Ms. No. C. 4099/2

Beginning :

हेमाद्रिविरचितः श्राद्धकल्पो लिख्यते–

क्षीरोदार्णवसारसङ्ग्रहकला ××× लासमालिङ्गित-
भ्राम्यन्मन्दरकूटकोटिघटनातिमृष्ट × × गदः ।
उन्मीलन्नवनीरजदलश्रे × × मण्डल-
श्लाघालङ्घनलाङ्छिकच्छविरसौ पायादपायाद्धरिः ॥ १ ॥

End :

संवर्धयति गात्राणि तस्य धर्मो महान् भवेत् ॥

वसिष्ठः—

प्रयतो मृदमादाय दूर्वामार्द्रां च गोमयम् ।

स्थापयित्वा तथाऽऽचम्य ततः स्नानं समाचरेत् ॥

Colophon :

इति स्नानसम्भाराः ॥

957

Sl. No. 8075 चतुर्वर्गचिन्तामण्यनुक्रमणिका (श्राद्धकल्पानुक्रमणी) Ms. No. C. 4095/1

Beginning :

श्राद्धकल्पस्यानुक्रमणिका—

श्लोक ७ पर्यन्तं मङ्गलाचरणम् ।

श्लोक २१ पर्यन्तं राजप्रशस्तिः हेमाद्रेः वंशवर्णनम् । श्राद्धलक्षणम् । पितृरूपाणां × × नम् । तत्र विधिफलप्रशंसावाक्यानि ॥

End :

अथ चतुर्दशीश्राद्धप्रयोगः ।

इति भाद्रपदापक्षश्राद्धप्रयोगः ।

अथ दौहित्रप्रतिपच्छ्राद्धप्रयोगः ।

इति दौहित्रप्रतिपच्छ्राद्धप्रयोगः ।

अथ सन्यासाङ्गश्राद्धप्रयोगः ।

अथ जीवच्छ्राद्धप्रयोगः ॥

Colophon :

इति श्राद्धकल्पे + + + इति श्राद्धकल्पे जीवच्छ्राद्धविधिः ।

इति श्राद्धकल्पस्यानुक्रमणी ॥

958

Sl. No. 8076 चतुर्वर्गचिन्तामण्यनुक्रमणिका Ms. No. C. 4229/1

(प्रायश्चित्तकाण्डविषयानुक्रमणिका)

Beginning :

अथ प्रायश्चित्तहेमाद्रि-अनुक्रमणिका लिख्यते— सर्वग्रन्थवचनानि ॥

१ ब्रह्महत्याप्रायश्चित्तम् ।

२ लिङ्गपुराणोक्तपञ्चमहापातकनिर्णयः ।

३ नानाप्रकारचेपातकीदेहान्तप्रायश्चित्तम् ॥

End :

२२१ सर्वदानादौ कार्यम् ॥

२३४ वैश्या इत्यादिदासी-अन्यस्त्रीगमनपङ्क्तिबाह्यः प्रायश्चित्त ।

२३६ नानाप्रकारचीप्रायश्चित्तम् सङ्कलपस्त्रीपुरुषक्षत्रियवैश्य इत्यादि सर्वं असत शुभम् ॥

१९७४ मार्गेश्वर प(?) श्रीक्षेत्रकाशीविश्वेश्वरार्पणमस्तु ॥

Colophon :

इति हेमाद्रि अनुक्रमणी सम्पूर्णा ॥

959

Sl. No. 8077 चतुर्वर्गचिन्तामण्यनुक्रमणिका Ms. No. C. 4229/2

(प्रायश्चित्तप्रमाणानुक्रमणिका)

Beginning :

अस्मिन् ग्रन्थे प्रमाणानि—

आपस्तम्बः ।	कश्यपः ।
गौतमः ।	व्यासः ।
कात्यायनः ।	नारदः ।
राजविनयः ।	देवलः ।
हारीतः ।	मरीचिः ।
यमः ।	पाराशरः ।
गर्गः ।	विष्णुः ॥

End :

गालवः ।	कण्वः ।
कृतिः ।	जातूकर्ण्यः ।
मनुः ।	बोधायनः ।
गौतमधर्मः ।	अङ्गिराः ।
चतुर्विंशतिमतम् ।	वशिष्ठः ।
मरीचिः ।	जाबालिः ।
देवस्वामी ।	

Colophon :

-- -- --

960

Sl. No. 8078 **चतुर्वर्गचिन्तामण्यनुक्रमणिका** Ms. No. C. 4229/3

(प्रायश्चित्तकाण्डपुराणानुक्रमणिका)

Beginning :

लिङ्गम् ।
ब्रह्माण्डः ।
कूर्मः ।
नारदः ।
पद्मम् ।
शिवरहस्यम् ।
वराहः ।

End :

देवी ।	मार्कण्डेयीयः ।
नृसिंहः ।	विष्णुधर्मोत्तरम् ।
वामनः ।	भविष्योत्तरम् ।
ब्रह्मयामलः ।	शिवधर्मोत्तरम् ।

मात्स्यम् । ब्रह्मवैवर्तम् ।
शिवः । नागरखण्डः ॥
बृहन्नारदीयः ।

Colophon :

— — —

961

Sl. No. 8080 चतुर्विंशतिमतव्याख्या (आचारकाण्डः) Ms. No. B. 37

Beginning :

आचारकाण्डप्रारंभः ।

हरिः ओम् अथाह्निकमुच्यते– तत्र माधवीये कूर्मपुराणे–

ब्राह्मे मुहूर्ते उत्थाय धर्ममर्थं च चिन्तयेत् ।
कायक्लेशं तदुद्भूतं ध्यायीत परमेश्वरम् ॥ इति ॥

End :

ताभ्यां शूद्रः पाकयज्ञैः यजेत नियतः स्वयम् ।

इति तस्यावर्ज्यान्याह पराशरः ।

विक्रीणन् मद्यमांसानि [त्व!] भक्ष्यस्य च भक्षणम् ।
कुर्वन्नगम्यागमनं शूद्रः पतति तत्क्षणात् ॥

इति । शेषमन्यतो बोध्यम् ।

Colophon :

इति शूद्रधर्मः । इति पदवाक्यप्रमाणज्ञ श्रीलक्ष्मीधरसूरेः सूनुना भट्टोजीदीक्षितेन रचितायां श्रीचतुर्विंशतिमतव्याख्यायामाचारकाण्डः समाप्तः ।

Extra Information :

नन्दनाब्दस्य हेमन्ते मार्गशीर्षे च पक्षके ।
कृष्णेऽष्टम्यामयं काण्डः समाप्तः कर्मशुद्धिदः ॥

इति ग्रन्थान्ते श्लोक एको दृश्यते ॥

962

Sl.No. 8083 चतुर्विंशतिस्मृतिव्याख्या Ms. No. C. 128

Beginning :

अथ प्रायश्चित्तप्रकरणम्–

प्रायश्चित्तशब्दश्च पापनिवर्तनक्षमधर्मविशेषे योगरूढः । प्रायस्य पापस्य चित्तं शोधनमिति व्युत्पत्तेः । प्रायस्य चित्तिचित्तयोः इति पारस्करादि गणे पाठात् सुट् । उक्तञ्च–

" प्रायः पापं विनिर्दिष्टं चित्तं तस्य विशोधनम् "

इति ॥

End :

स्मृत्यन्तरे–

:' यज्ञे संभृतसम्भारे विवाहे श्राद्धकर्मणि ।" इति सद्यः शौचमात्रमनुवर्तते । विवाह ग्रहणं च पूर्वप्रवृत्तचौलोपनादिसंस्कारकर्मोपलक्षणम् । यज्ञग्रहणञ्च पूर्वप्रवृत्त-प्रतिष्ठा × × पलक्षणमिति विज्ञानेश्वरः ॥

Colophon :

इति श्रीपदवाक्य प्रमाण × श्रीलक्ष्मीधरसूरेः सूनुना भट्टोजिदीक्षितेन विरचिताय चतुर्विंशतिस्मृति व्याख्यायां प्रायश्चित्तकाण्डः समाप्तिमगमत् ॥

963

Sl. No. 8088 चान्द्रायणविधिः Ms. No P. 4212/48

Beginning :

चन्द्रवृद्ध्या समश्नीयात् कुक्कुटाण्डप्रमाणतः ।
दिने दिने हविर्ग्रासी हानौ हानिं प्रकल्पयेत् ॥
एवं मासेन पूर्णं स्यात् एकं चान्द्रायणं स्मृतम् ॥

इति वाराहपुराणे । पाञ्चरात्रे–

प्रतिमासं [illegible] ॥

End:

हस्तः पुष्य पुनर्वसू शतभिषक् स्वाती मखा रोहिणी
रेवत्युत्तरमैत्रभं हरिमृगौ मूला धनिष्ठाऽश्विनी ।
कन्याकुम्भ वृषालि सिंहधनुषी नक्षत्रराश्युत्तमं
वारे जीवशनी × × भृगुज्ये वेशप्रवेशे सुखम् ॥

इति रत्नमाला ॥

Colophon :

-- -- --

964

Sl. No. 8089 चातुर्मास्यमीमांसा Ms. No. C. 269

Beginning :

नत्वा गुरुं पूर्वगुरून् आदि × × गुरूनपि ।
श्रीचातुर्मास्यमीमांसां करोमि स्मृतिमूलकाम् ॥

चातुर्मास्यव्रतं एकादशीव्रतवत् नित्यं काम्यं च; करणाकरणयोः फलप्रत्यवाय स्मरणात् ॥

End :

ब्राह्मयां भोजनम् । कृष्णपञ्चमीपर्यन्तमेकस्मिन् दिने वनभोजनादिकं कार्यम् । तन्महापुण्यं प्रभवतीति सर्वमतिमङ्गलम् ॥

श्रीचातुर्मास्यमीमांसा कृता सुप्रीतये हरेः ।
आई नरहरिणा साऽस्तु विद्वन्मनोहरा ॥

Colophon :

-- -- --

965

Sl. No. 8090 चातुर्मास्यनिर्णयः Ms. No. P. 5712/3

Beginning :

अथ चातुर्मास्यविधिरुच्यते—

आषाढादि वसेन्मासान् चतुरः कार्तिकावधि ।

आषाढपौर्णमास्यां स्वानुष्ठानानन्तरं प्रशस्तमृद्ग्रहणप्रदेशं गत्वा पादौ प्रक्षाल्याचम्य प्राणानायम्य गुरुवृद्धयतिसद्भावे प्रणम्यानुज्ञाप्य सङ्कल्प्य + + चातुर्मास्यव्रताङ्गमृद्ग्रहणं करिष्ये ॥

End :

ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवं विश्वमिदं जगत् ।
ध्रुवा ह पर्वता इमे ध्रुवो राजा निशामय ॥
इहैवेति मा व्यधिष्ठाः पर्वत इवावृता चलिः ।
इन्द्र इवेह ध्रुवस्तिष्ठ इह राष्ट्रमुधारय ॥
इत्युक्त्वा सर्वपूरणमनुज्ञाप्य × × × × × ॥

Colophon :

— — —

966

Sl. No. 8092 चित्राहुतिविधिः Ms. No. C. 2662/4

Beginning

परिषेचनमारभ्य प्रादक्षिण्यक्रमेण तु ।
अप्रदक्षिणचित्रान्नममेध्यं मनुरब्रवीत ॥
चित्राय चित्रगुप्ताय स्वाहाकारं तु वर्जयेत् ।
नमश्शब्दोऽत्र दातव्यः चित्रय नमः इत्यतः ॥

End :

चित्रगुप्ताहुतिं दृष्ट्वा यो भुङ्क्ते ज्ञानदुर्बलः ।
तदन्नं मांसतुल्यं स्यात् तज्जलं सुरया समम् ॥
आहुतिं तुलसीहीनां यो दद्यात् प्राणपञ्चके ।
तदन्नं मांसतुल्यं स्यात् तद्रसं सुरया समम् ॥

Colophon :

967

Sl. No. 8098 चौलविधिः Ms. No. P. 7777/49

Beginning :

अथ चौलम्–

त्रयीयुवतिमस्तकस्फुरदुदाररत्नामणिं
विलोकपरिरक्षणक्रमधुरीणरक्षामणिम् ।
प्रपन्नजनमानसप्रियवितीर्णचिन्तामणिं
नृसिंहमहमाश्रये निखिलदेवचूडामणिम् ॥
वर्षे तृतीयेऽप्यथ पञ्चमेऽब्दे
गतत्रिभागे प्रवदन्ति चौलम् ॥

End :

आदित्यसौम्यवसुवैष्णव पौष्णतिष्य-
स्त्वाष्ट्राश्विचन्द्रकिरणेषु दिवा प्रशस्तम् ।
स्वातीविधातृवरुणोत्तरभानिमध्या-
न्याहुः निशास्वपि धने च क्षुरकर्म कार्यम् ॥

चन्द्रकिरणो हस्तः ॥

Colophon :

— — —

968

Sl. No. 8099 जडबधिरमूकोपनयनविधिः Ms. No. P. 4180/97

Beginning :

अथ जडबधिरमूकाद्युपनयनम् । अत्र ब्रह्मपुराणे–

ब्रह्मणा जातो ब्राह्मण इति श्रुतेः ।

तस्माच्च षण्डबधिरकुब्जवामनपङ्गुषु ।

[illegible] ॥

मत्तोन्मत्तेषु मूकेषु शयनस्थनिनेवच ।
निरिन्द्रियेस्त्वपुंस्तेषु संस्काराः स्युर्यथोचितम् ॥

End :

तूष्णीं सर्वात्मत्वा(?) माचार्य एवा जपेदित्येके मधुपर्कं ददातीति तिसृषु व्युष्टासु मधुपर्कपात्रे वा तूष्णीमुत्सृज्यायुर्दा अग्नेति पिता वा वा त्राता वा तव समारोपयेदित्येके ॥

Colophon ;

इति जडबधिरमूकाद्युपनयनं समाप्तम् ॥

969

Sl. No. 8100 जन्मनक्षत्रकर्तव्यविधिः Ms. No. P. 5657/9

Beginning :

जन्मनक्षत्रे कर्तव्यविधिरभिधीयते– तत्र भगवान् शौनकः–

अथ स्वजन्मनक्षत्रे स्नातः शुक्लाम्बरो नृपः ।
कृतकौतुकबन्धश्च सर्वाभरणभूषितः ॥

End :

द्विजान् सर्वान् अथाभ्यर्च्य तस्मिन्नहनि कारयेत् ।
पूजयित्वा विधानेन पूजनीयान् स्वबान्धवान् ।
न हिंस्यात्सर्वभूतानि तदहस्तु विशेषतः ।
सर्वं समाचरन् राजा सुखी भवति सर्वदेति ॥

Colophon :

— — —

970

Sl. No. 8102 जन्माष्टमीजयन्तीभेदनिर्णयः Ms. No. P. 5726/43

Beginning :

रोहिणीयुक्ता श्रावणकृष्णाष्टमी जयन्तीत्युक्तम् । अथवा भाद्रपदकृष्णाष्टमी रोहिणीयुक्ता जयन्तीति । या श्रावणकृष्णाष्टमी रोहिणीयुक्ता जयन्ती व्रते मुख्या ॥

End :

मुहूर्तमपि रोहिण्या युक्ता पूर्णाष्टमी भवेत् ।
कला काष्ठा मुहूर्तापि यदा कृष्णाष्टमीतिथिः ॥
नवम्या सह या कार्या रोहिणी सहिता न चेत् ॥

Colophon :

इति जन्माष्टमीजयन्तीभेदनिर्णयः ॥

971

Sl. No. 8105 जपविधिः Ms. No. P. 2308/18

Beginning :

जपस्थानादुपस्थानान् पदमेकं न चालयेत् ।
चालितो यदि मूढात्मा रौरवं नरकं व्रजेत् ॥
जपमध्ये गुरोर्वाऽपि वैष्णवो यः समाहितः ।
× × भाषणादिपूजां च तस्यकृत्वाऽनुमान्य च ॥

End :

पञ्चभिष्षष्टिकं कर्म चतुर्भिश्चाभिचारिकम् ।
पितॄणां तु त्रयो दर्भाः द्वे दर्भे नित्यकर्मसु ॥
अष्टाक्षरेण संयोज्य गायत्र्यन्तेष्वथो जपेत् ।
प्रत्यक्षरं चतुर्विंशल्लक्षसंख्याजपो भवेत् ॥

Colophon :

— — —

972

Sl. No. 8110 जयन्तीनिर्णयः Ms. No. P. 3013

Beginning:

वन्दे पुमांसं परमं जयन्त्यामाविर्भवन्तं मुरळीं भरन्तम् ।

गोपालमस्मद्गुरुमौळिभूषापादाम्बुजद्व×र×रूपम् ॥

रङ्गरामानुजमुनिमुख्यैः प्राक्तनदेशिकैः ।
निर्णीता श्रीजयन्तीयं सन्मार्गेण सतां मुदे ॥

तथापि तत्र सासूयैः हेतुकैस्तत्र तत्र यः ।
साधितो ह्यन्यथाभावः तिरस्कर्तुमिहोद्यमः ॥

तत्र तावत् कृष्णाष्टमी जयन्ती द्वेति द्विविधं व्रतदिनम् ॥

End:

जन्माष्टमीजयन्त्योश्च निर्णयं दुर्णयापहम् ।
वात्स्यो नृसिह्मो व्यलिखत् प्रीत्यै श्रीपद्मनाभयोः ॥

Colophon :

श्री × × लदेशिकविरचित श्रीजयन्ती निर्णयस्सम्पूर्णः ॥

973

Sl. No. 8114 जयन्तीनिर्णयः Ms No P. 1578/5

Beginning :

जयाख्यसंहितानि जयन्तीविषयानि कानि च विलिख्यन्ते । तत्र ब्रह्मसंहितायां– नारद उवाच–

भगवन् देवदेवेश सर्वलोकपितामह ।
वक्तुमर्हसि मे देव कृष्णजन्मदिनोत्सवम् ॥

End :

उत्सवानन्तरमेव पारणमिति तत्र वचनबलादङ्गीक्रियते। तत्रैव फलार्थित्वे प्रकारान्तरस्य ॥

Colophon :

— — —

974

Sl. No. 8115 जयन्तीनिर्णयः Ms No. P. 4776/1

Beginning :

जयन्तीनिर्णयः–

सर्वत्र निर्णये शास्त्रमेव प्रमाणम्; न युक्तयः । वक्ष्यति–

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।

ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥

End :

पाण्डित्यविख्यापनतत्पराणां

ग्रन्थैर्विरुद्धैरलमव्यवस्थैः ।

निर्मत्सराः पश्यत तं प्रबन्धं

ब्रवीति यं वैदिकसार्वभौमः ॥

Colophon :

इति कृष्णजयन्तीनिर्णयः समाप्तः ॥

975

Sl. No. 8117 जयन्तीनिर्णयः Ms. No. P. 4937

Beginning :

श्रीवेङ्कटार्यगुरुवर्यतनूजमार्य श्रीवीरराघवगुरूत्तमलब्धबोधम् ।

श्रीवत्सवंशकलशाम्बुधिपूर्णचन्द्रं श्रीश्रीनिवासगुरुवर्यमहं प्रपद्ये ॥

कवितार्किकसिंहेन वात्स्येन गुणशालिना ।

जयन्तीनिर्णयस्सम्यक् क्रियते वाक्यसङ्ग्रहैः ॥

End :

एकमासे मुनिश्रेष्ठ गतिकक्ष(?)द्वयं भवेत् ।

व्रतोपवासनादीनि परे कुर्यान्महत्फलम् ॥

एकमासे द्विनक्षत्रं सम्भवे हृदि पक्षिरा‸ ।

परे कार्यं महत्पुण्यं महापातकनाशनम् ॥

Colophon :

– – –

976

Sl. No. 8118 जयन्तीनिर्णयः Ms.No.P. 5253/64

Beginning :

अष्टमीरोहिणीयुक्ता गृहस्थानां विशिष्यते ।

परेऽहनि मुहूर्ते वा यतीनां तु विशिष्यते ।

वर्जनीया प्रयत्नेन सप्तमीसंयुताष्टमी ।
रोहिणीकृत्तिकायुक्तां सर्क्षां बा परिवर्जयेत् ॥

End :

रोहिणी च यदाष्टम्यां कृष्णायां श्रावणे यदि ।
जयन्ती नाम सा प्रोक्ता न तु भाद्रपदाष्टमी ॥
श्रावणे मासि योगाभावे भाद्रपदे योगे सति तत्र कार्यमित्यर्थः ॥

Colophon :

इति श्रीवाराहपुराणे जयन्तीनिर्णयः ॥

977

Sl. No. 8119 जयन्तीनिर्णयः Ms. No. P. 5253/62

Beginning :

दिवसे कृत्तिकायुक्ता रोहिणी चाष्टमीयुना ।
दिवासंगतरोहिण्यामुपबासं समाचरेत् ॥
रोहिणीकलया युक्ता कृत्तिका च विना भवेत् ।
अष्टमी पूर्णया युक्ता जयन्ती चोत्तमा स्मृता ॥

End :

अष्टम्यां वा नवम्यां वा दशम्यां वाऽथ रोहिणी ।
मुहूर्तं तु कलामात्रं जयन्ती चोत्तमोत्तमा ॥
सप्तमीं कृत्तिकां वाऽपि त्यजेदप्यरुणोदये ।
नवम्यामेव कुर्वीत रोहिणीकलया युताम् ॥

Colophon :

इति श्री सारसमुच्चये जयन्तीनिर्णयः समाप्तः ॥

978

Sl. No. 8120 जयन्तीनिर्णयः (खगप्रश्नसंहितान्तर्गतः) Ms. No. P. 5253/63

Beginning :

खगेन्द्रउवाच–

देवदेव जगन्नाथ सर्वलोकेश्वरेश्वर ।
श्रोतुमिच्छाम्यहं विष्णोः जयन्तीविधिमुत्तमम् ॥

मासं पक्षं तिथिं वारं नक्षत्रादिप्रभेदतः ।
वर्ज्यां वर्ज्यादिकं सर्वं विस्तरेण वदस्व मे ॥

End :

नीराजयेत्ततो देवं आपादान्मस्तकादपि ।
त्रिः परिभ्रम्य विश्वेन मन्त्रविद्देशिकोत्तमः ॥
तत्काले सर्ववाद्यानि घोषयित्वा दिशो दश ।
जातदोषस्य शान्त्यर्थं स्नपयेद्विधिवत्तदा ॥

Colophon ;

इति श्री खगप्रश्नसंहितायां जयन्तीनिर्णयो नाम सप्तदशोऽध्यायः ॥

979

Sl. No. 8122 जयन्तीनिर्णयः (सिद्धान्तवचनम्) Ms. No. P. 5680/1

Beginning :

कृत्वा मुख्यकालातिक्रमणदोषपरिहारार्थं अर्घ्यप्रक्षेपणात्मकं प्रायश्चित्तं करिष्ये; इति सङ्कल्प्य प्रायश्चित्तार्घ्यं दत्वा ततः सन्ध्यामाचरेत + + +

सिम्हेर्के रोहिणी वाऽपि मृगः कृष्णाष्टमी द्वये ।

End :

अर्के कर्कटकस्थिते विधिशिखिन्यर्कशिवे संयुते
वर्ज्या कृष्णदिनाष्टमी यदि क्रिया सौम्ये दिने रोहिणी।
चन्द्रे चन्द्रयुते तथाष्टनवमीमासेनतो युग्मके
सिंहेऽर्केद्वयसम्भवेन तु (?) रात्राद्यातुमासान्तिमे ॥

Colophon :

— — —

980

Sl. No. 8130 जयन्तीनिर्णयः Ms. No. P. 6031

Beginning :

श्रीरामनवमी श्रीनृसिंहजयन्तीचतुर्दश्योरपि अष्टमी त्रयोदशीभ्यामविद्धयोरेवोपवास भगवदाराधनाद्यनुष्ठानम् । न तु विद्धयोरपीति सिद्धान्तः ।

उदये यदि विद्धा स्यात् त्रयोदश्या चतुर्दशी ।
स्वातीयुताऽपि न ग्राह्या श्रीरामनवमी तथा ॥

इति भगवच्छास्त्रवचनात् ॥

End :

अष्टम्या पूर्णया युक्ता वर्जयेत्तां प्रयत्नतः ।
कलया कृत्तिकायुक्ता सम्पूर्णा रोहिणी यदि ॥
तां तिथिं वर्जयेद्विद्वान् मोहाद्वा पापमाप्नुयात् ॥
वासरे वा निशायां वा रोहिणीकलया युता ।
उपवासश्च कर्तव्यः अर्घ्यदानं प्रकल्पयेत् ॥

जयोत्तरसंहितायाम् –

अतः प्रमाणादाचार्यसूक्त्योऽपि महात्मभिः ।
उपवासो जयन्तीषु कर्तव्य इति निश्चितम् ॥

Colophon :

– – –

९४१

Sl. No. 8138 | जयन्तीनिर्णयः | Ms. No. B 373

Beginning :

बृन्दावनचरं वन्दे बृन्दारकनिषेवितम् ।
जयन्तीसम्भवं कृष्णं जयन्तीपूजकप्रियम् ॥
श्रीपराङ्कुशनाथार्यं × × × गुरूनपि ।
वेदान्त ×× जन्माष्टमीजयन्त्योस्तु स्वरूपादि निरूप्यते
अनन्तरश्च श्रीरामनवम्यादि निरूपणम् ॥

End :

अयं च निर्णयः दशनिर्णयराजगोपालीयग्रन्थस्थभगवच्छास्त्रसंहितावचनानि दृष्ट्वा सङ्ग्रहेण कृतः । विस्तरस्तु तत्र तत्रैव द्रष्टव्यः ।

Colophon :

श्रीनिवासब्रह्मतन्त्रपरकालगुरूत्तमैः ।
पूर्वग्रन्थानुसारेण जयन्तीनिर्णयः कृतः ॥

982

Sl.No. 8139 — जयन्तीनिर्णयः — Ms. No. C. 77

Beginning :

इह तावज्जयन्तीनिर्णयः क्रियते—

अविद्धायां जयन्त्यां तु निर्णेतव्यं न किञ्चन ।
सा तु विद्धा यदा तत्र निर्णयोऽत्र निरूप्यते ॥

जयन्ती तावत् द्विविधा— अष्टमीरूपा तदन्यरूपा चेति । आद्या रोहिणीयुक्तैव । तु केवलं जन्माष्टम्येव ॥

End :

केवलाया विद्धाष्टम्या ग्राह्यत्वपरवचनस्य शशशृङ्गायमाणत्वात् अनुष्ठानं केषाञ्चित् अनाचार एवेति सर्वमनवद्यम् । विस्तरस्तु दशनिर्णये—

निष्कृष्य सर्वतः सम्यङ्निन्दानिग्रहलिप्सया ।
श्रीशैल श्रीनिवासेन जयन्तीनिर्णयः कृतः ॥

Colophon :

इति श्रीशैलश्रीनिवासार्य विरचितः सुरपुर जयन्तीनिर्णयः समाप्तः ॥

983

Sl. No. 8140 — जयन्त्यादिपारणानिर्णयः — Ms. No. P. 1689/2

Beginning :

श्रीरामनवम्यादिजयन्तीस्वरूपोत्सवान्तपारणानिर्णय उच्यते । वसिष्ठसंहितायाम्—

वक्ष्यामि देवदेवस्य रामजन्मदिनोत्सवम् ।

ऋक्षे पुनर्वसौ कार्यो चैत्र नावमिके तिथौ ॥

End :

तिथ्यन्ते पारणं कार्यं जयन्तीफलमिच्छता ।
फलानि सन्धिरहितैः रात्रावेव तु पारणम् ॥–

इत्यादिवचनैः निशि भोजननिषेधवचनस्य बाधितत्वादिति सर्वमनवद्यम् ॥

Colophon :

-- -- --

Extra Information :

ग्रन्थेऽस्मिन्– श्रीरामनवमीकृष्णजयन्त्योः स्वरूपः, तदुत्सवाचरणे नियमः, सत्कर्तृकउपवास पारणनिर्णयः,– इत्येते विषयाः चर्चिताः निर्णीताश्च ॥

984

Sl. No. 8145 जलपारणविधिः Ms. No. C 4587/3

Beginning :

सन्ध्यादिकं भवेन्नित्यं पारणं तु निमित्ततः ।
अद्भिस्तु पारयित्वाथ नैत्यकान्ते × × भवेत् ॥

End :

गायत्र्याद्भिरभिमन्त्र्याऽथ त्रिवारं चुलुकोदकम् ।
प्रणवेन पिबेत्तोयं × × पारणमुच्यते ॥

Colophon :

-- -- --

985

Sl. No. 8147 जलान्तस्सन्ध्यादिनिर्णयः Ms. No. P. 1364/85

Beginning :

संवर्तः–

शिरः प्रावृत्य कण्ठं वा तिष्ठ × × × त्कशिखोऽपि वा ।
अकृत्वा पादयोश्शौचं आचान्तोऽप्यशुचिर्भवेत् ॥

End :

शुष्केणान्तर्जले चैव बहिरप्यार्द्रवाससा ।
स्नानं दानं जपो होमः सर्वं भवति निष्फलम् ॥

Colophon :

-- -- --

986

Sl. No. 8149 जातकर्मनिर्णयः Ms. No. P 5895/17

Beginning :

जातमात्रे कुमारस्य मुखमालोकयेत्पिता ।
पितॄणं × × विनुये (?) पुत्रस्य मुखदर्शनात् ॥ ++
जातो जातदिनादितो दशदिनात् जातकर्मात्मजे
कुर्याद्रुद्रदिनेऽथवा स्थिरचरजिप्रे × × मैत्स्सोडुषु ।
(?) रिक्तामारहितेऽप्यखण्डदिवसे लग्ने शुभे वासरे
पूर्वाह्ने सुरपूजिते सुरगुरौव्यर्के च सौम्यायने ॥

End:

दिवा जातस्तु पितरं रात्रौ जातस्तु मातरम् ।
आत्मानं सन्ध्ययोर्हन्ति नास्ति गण्डो विपर्ययात् ॥

Colophon :

-- -- --

987

Sl.No 8150 जाताशौचनिर्णयः Ms. No. P. 1364/90

Beginning :

पितृगेहे तु या नारी तद्द्रव्येणोपजीवति ।

तस्यास्तु प्रसवे तस्य सूतकं त्रिदिनं भवेत् ॥

End:

दिनद्वयं दिनं वाऽपि पक्षिणी वा विकल्पतः ।
तत्सर्वं भृतके वापि पोषणे वा विधीयते ॥

Colophon :

-- -- --

988

Sl. No. 8151 जाताशौचनिर्णयः Ms. No. P. 5313/59

Beginning :

अथ जाताशौचनिर्णयः । त्रिंशच्छ्लोक्याम्—

षण्मासाभ्यन्तरे तु स्वपुरुषमतिहिते गर्भमात्रे विनष्टे
जाता तन्मासरसंख्या समदिनमशुचिः स्नानशुद्धाः सपिण्डाः ।
अन्त्ये मासद्वये तु त्रिदिनमशुचयोऽतः परं सूतिनः स्यात्
चातुर्वर्ण्येषु तुल्यं भवति यदसि तत्प्रोच्यते शौचमात्रम् ॥

End :

'रात्रिभिर्मासतुल्याभिः गर्भस्रावेऽपि शुध्यति ।' इति मन्वादिवचनं मासत्रयादूर्ध्वमेव भवतीत्यर्थः ॥

Colophon :

-- -- --

939

Sl. No. 8152 जातिनिर्णयः Ms. No. P. 2380/32

Beginning :

निष्कम्पज्ञानसम्पन्नाः कम्पितप्रतिवादिनः ।
आत्तान् यतीन्द्रचन्द्रास्ते विजयन्तां शतं समाः ॥

वर्णानां मृगपक्षिपादपशिलाजातेरिवालक्ष्यते
नैवावान्तरजातिसूचकतमः संस्थानभेदः क्वचित् ।
प्रत्यक्षः किल किन्तु कर्मजनितं शास्त्रैकवेद्यं कुलं

तद्वच्छास्त्र मतं न पश्यति जनः श्रीवैष्णवत्वं कुलम् ॥

End :

निःशेषवस्तुचयवास्तवमस्तशङ्कं
सम्पश्यतां परममम्बरमाश्रितानाम् ।
आद्यान् यतीन्द्रगणशेखरशेखराणा
सूक्तिं च कम्पयितुमिच्छति कः पृथिव्याम् ॥

Colophon:

— — —

990

Sl. No. 8153 जातिभ्रष्टपरित्यागनिर्णयः Ms. No. P. 7446/10

Beginning :

अथ जातिभ्रष्टस्य विधिरुच्यते । तस्य परित्यागनिर्णयमाह—

त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत ।
द्वापरे कुलमेकं स्यात् कर्तारं तु कलौ युगे ॥

End :

नष्टाग्निर्दूरश्चेत पार्वणे समुपस्थिते ।
सन्धायाग्निं च विधिवत् साकं कृत्वा विसर्जयेत् ॥

Colophon :

— — —

991

Sl. No. 8154 जात्युत्कर्षनिर्णयः Ms. No. P. 6822/3

Beginning :

उत्कृष्टजन्मविषयः । वामदेवः—

इन्धनं चाग्निसंयुक्तं वृक्षनाम न जायते ।
विष्णुसंबन्धसंस्कारात् जातिभेदं न कारयेत् ॥
स्पर्शभेदेन संबन्धात् लोहमप्राकृतं यथा ।
विष्णुसंबन्धसंस्कारात् जातिभेदो न जायते ॥

End :

हारिते अष्टमेऽध्याये—

माता तेषां हरिदया पिता ज्ञानप्रदो गुरुः ।
संस्कारादपरं जन्म तेषां भवति विप्रवत् ॥
तस्मात् पूज्यश्च सर्वेषां न निन्द्यो भगवत्प्रियः ॥

Colophon :

— — —

992

Sl. No. 8155 जीवत्पितामहविषयनिर्णयः Ms. No P. 7515/11

Beginning :

जीवत्पितामहविषयः—

म्रियते चेत् पिता यस्य विद्यमाने पितामहे ।
पैतृकादिषु नामानि कथमेवोच्चरेद्यदि ॥
द्विवारं पितृनाम्नैव पैतृकादिषु वै यतः ।
प्रपितामहनाम स्यात् एकवारमभीहतु ॥

End :

अनेन विधिना श्राद्धं कुर्याज्जीवत्पितामहः ।
दद्यात् पिण्डद्वयं पित्रे यथैव प्रपितामहे ॥
सर्वेषां शाखिनामेवं श्राद्धस्य विधिरुच्यते ॥
पितामह्यां जीवन्त्यामपि मातुः श्राद्धमप्येवमेव ॥

Colophon:

— — —

993

Sl. No. 8156 जीवत्पितृकश्राद्धाधिकारिनिर्णयः Ms. No. P. 5726/103

Beginning :

अथ जीवपितृकस्य श्राद्धाधिकारः । प्रजापतिः—

अमावास्याष्टकावृद्धिकृष्णपक्षोऽयनद्वयम् ।
चन्द्रसूर्यग्रहोऽप्यत्र श्राद्धे × द्धगज विः ॥

End :

एभ्य एव पिता दद्यात तानेवोद्दिश्य पार्वणम् ॥

सुमन्तुरपि–

न जीवपितृकः कुर्यात् श्राद्ध × ननमृतः द्विजः ।

एभ्य एव पिता दद्यात् तेभ्यः कुर्वीत चाग्निकः ॥

Colophon :

— — —

994

Sl. No. 8157 जीवच्छ्राद्धनिर्णयः Ms. No. P. 5293/56

Beginning

अथातो जीवश्राद्धं व्याख्यास्यामः–

यस्त्वात्मनः श्रेय इच्छत्यपरपक्षे त्रयो दर्शामुपोष्य तस्मिन्नेवाहनि सम्भाराणि यान्यौर्ध्वदेहिकानि मृत्युना वस्त्रषट्कं सौवर्णसूचीन् कुशानवत्रं पाशकम् ॥

End :

एकादश्यामेकोद्दिष्टानिति प्रतिवक्ष्यते । शूद्रास्तरन्त्यापर्णा (?) च शूद्रश्च यंत्रे (?) दृष्ट्वा । स्वकं तनुं तदद्यैव कुर्यात् सर्वाः क्रियाः इति ; तस्योक्तं कालं न विडम्बयत्येतेन जीवन्निति ह स्माह बोधायनः ॥

Colophon :

इति जीवश्राद्धविधिः ॥

995

Sl. No. 8158 ज्येष्ठपुत्रदानादिनिषेधः Ms. No. P. 8703/6

Beninning :

एकपुत्रविषयश्च तथा च वसिष्ठः–

न ज्येष्ठं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा न चैकं पुत्रम् । स हि सन्तानाय पूर्वेषां न स्त्री पुत्रं दद्यात् ; प्रतिगृह्णीयाद्वा अन्यत्रानुजातानां × × × × तः ॥

End :

न त्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि सन्तानाय पूर्वेषां न तु स्त्री पुत्रं दद्यात् प्रतिगृह्णीयात् अन्यत्रानुज्ञा ॥

Colophon : — — —

996

Sl. No. 8159 ज्येष्ठाष्टमीनिर्णयः Ms No. P. 5723/46

Beginning :

अथ ज्येष्ठाष्टमी । तत्र पद्मपुराणम् —

सम्प्राप्ते भाद्रमासे तु अष्टमी या सिता भवेत् ।
विधिना पूजयेज्ज्येष्ठां अलक्ष्मीविनिवृत्तये ॥

End :

यदा तिथिक्षयवशात् पूर्वेद्युः ज्येष्ठायुताष्टमी त्रिमुहूर्ता × × परेद्युर्मध्याह्नस्पर्शिनी तदा पूर्वेद्युरेवानुष्ठानम् । ज्येष्ठा च वटसावित्री मध्याह्नादूर्ध्वमप्यणुः । इति वचनाच्च ॥

Colophon : — —

997

Sl. No. 8162 ज्ञानसन्न्यासविधिः Ms. No. P. 6053/1

Beginning :

बहिरन्तस्स्थितं देवं आत्मानं परमेश्वरम् ।
दृश्यादृश्यस्य सद्रूपं विश्वमेतं नमाम्यहम् ॥
यतीनामुत्तमाचारं मोक्षसाधनरूपकम् ॥

End :

अज्ञानकार्यरहितं ज्ञानादिस्सद्यते × तम् ।
एकपीठं जगत्सर्वं एकमाकाशमालयम् ।
ईश्वरस्य गृहं विश्वं कु (?) कृतसामाबलङ्कनम्(?) ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य - श्रीमच्छङ्कराचार्यविरचिते ज्ञानसन्यासविधिः सम्पूर्णः ॥

998

Sl. No. 8163 ज्ञानभास्करविषयसूची Ms. No. P 6473/1

Beginning :

१ वृचकविधानम ।

६ नृणामा चारकथनम् ।

१० प्राणिनां कर्मविपाकः ।

१५ क्षत्रियवर्गेमृतवत्साक्रमः ।

१७ × नृद्रूपं त्रयं × × कर्मप्रकाशः ।

१८ त्रिकृतिरुगादिप्रसवकर्मप्रकाशः ॥

End :

१५१ विप्रवस्तुहरणोत्पन्नसङ्ग्रहाणि रोगहरकर्मप्रकाशः

× × × × त्पन्नरोगशान्तिसङ्ग्रहकर्मप्रकाशः ।

१५२ पाण्डुरोगकर्मप्रकाशः ॥

१५३ कुष्ठरोगहरकर्मप्रकाशः ।

१५४ कुष्ठरोगहरकर्मप्रकाशः ॥

Colophon :

इति रोगाधिकारः ॥

999

Sl. No. 8165 त्रिसन्ध्यास्वरूपनिर्णयः Ms No. P. 8761/15

Beginning :

सुमुखं संपुटं चैव विततं विस्तृतं तथा ।

द्विमुखं त्रिमुखं चैव चतुःपञ्चमुखं तथा ॥

षण्मुखाग्रमनुखं सर्वाङ्गव्यापनं तथा ।

+ + + + +

प्रातस्सन्ध्यारक्तपद्मासनस्था × × × रक्ताम्बरधरा रक्तगन्धानुलेपना चतुर्मुखा अष्टभुजा द्विनेत्रा ॥

End :

सामवेदसंहिता विष्णुदैवत्या + तमोगुणयुक्ता आदित्यपथगामिनी। स्वर्लोकव्यापिनी कृष्णवर्णा मोक्षज्ञाने विनियोगः । इत्येषा सरस्वती ॥

Colophon :

— -- —

1000

Sl. No. 8166 तत्त्वमुक्तावलिः (सव्याख्या) **Ms. No. A 676/1**

Beginning :

प्रचण्डतरदण्डाग्रविघ्नखण्डनपण्डितम् ।
अलिपिण्डं लसद्गण्डं वक्रतुण्डमुपास्महे ॥१॥
इन्दिरामद्विरं किञ्चिदिन्दीवरसहोदरम् ।
गोपीमुखारविन्दानामिन्दिन्दिरमुपास्महे ॥२॥

End :

अनन्तभट्टहेमाद्रिकविवल्लभमाधवैः ।
कृताः सिद्धान्तसरितः स्मृतिसिद्धान्तमाविशन् ॥
तत्त्वमुक्ताः समुद्धृत्य स्मृतिसिन्धो समं कृतात् (?) ।
तत्त्वमुक्तावलीमेतां निरमानन्दपण्डितः ॥
उक्ते काले कर्म कृत्वा विशुद्धं
स्वान्तं × × × जायते जायते रागमुक्तम् ।
तेनाद्वैते संस्थितेऽस्यैवमुक्त
सर्वज्ञं × × × काशिराजं नमामि ॥

Colophon :

इति श्रीतत्त्वमुक्तावलिः (सटीका) समाप्ता ॥

1001

Sl. No. 8167 तत्त्वमुक्तावलिव्याख्या Ms. No. A 676/2

Beginning :

प्रारिप्सितनिर्विघ्नतासिध्यर्थं आदौ मङ्गलमाचरति–

प्रचण्डः प्रगल्भो यः करदण्डः तस्याग्रं पुष्करं, तेन विघ्नानां खण्डनं तत्र पण्डितः– कोविदः, अलीनां पिण्डः– पुञ्जः, तेन लसन्तौ गण्डौ यस्य– तं वक्रतुण्डं– गणाध्यक्षं, वयमुपास्महे। मङ्गलप्रचयार्थमिष्टदेवतां स्मरति– इन्दिरा– लक्ष्मीः ॥

End :

इति क्षणरूपो वादः। कलहोक्तिरित्यर्थः। कच्चे (?) गणितेन ज्ञायेत। तच्चद्वार-होरायां तत्तत्कार्ये कर्तव्यमिति वस्तुगतिः। तदाह श्रीपतिः– स्वग्रन्थं प्रशंसति। :कविवल्लभः- कलादर्शः। शेषं स्पष्टम् ॥

Colophon :

इति तत्त्वमुक्तावलिव्याख्या समाप्ता ॥

1002

Sl. No. 8169 तप्तचक्राङ्कप्रमाणविवृतिः Ms. No. P. 2411

Beginning :

श्रीनिवासब्रह्मतन्त्रपरकालगुरूत्तमैः।

क्रियते तप्तचक्राङ्कप्रमाणविवृतिः स्फुटम् ॥

तप्तचक्राङ्कनादिसहितोर्ध्वपुण्ड्रादिधारणे परस्परविरुद्धानि बहूनि प्रमाणानि सन्दृश्यन्ते ॥

End :

तस्माच्चक्रं विधानेन तप्तं वै धारयेद्द्विजः।

सर्वाश्रमेषु वसतां विप्राणां श्रुतिबोधनात् ॥

अना × × × × × × ॥

Colophon :

— — —

1003

Sl. No. 8170 **तप्तमुद्राधारणकालनिर्णयः** Ms. No. P 9197/9

Beginning :

उद्वाहसमये स्त्रीणां पुंसां चैवोपनायने ।
तप्तस्य धारणं प्रोक्तं मन्त्रैः पञ्चायुधानि च ॥

End:

प्रोक्षणं पुष्पगु ×× स्यात् शोषणं चैत्र तज्जलम् ।
आचम्य वक्त्रं शुद्धं स्यात् सदा पूजां समाचरेत् ॥

Colophon :

-- -- --

1004

Sl.No. 8171 **तप्तमुद्राधारणविधिः** Ms. No. P. 2380/20

Beginning :

शङ्खचक्रविहीनस्तु पङ्क्तिमध्ये स्थितैरपि ।
सपङ्क्तिब्रह्महत्यादि सृजते नात्र संशयः ॥
तप्तचक्रविहीनस्तु चण्डालसदृशो भवेत् ।
दर्शनं स्पर्शनं वापि सचेलं स्नानमाचरेत् ॥

End :

तैलमाज्येन संस्पृष्टा अद्भिर्वा शुचिमाप्नुयात् ॥
तुलसीदलमिश्रं वा ग्रहणेऽपि न दुष्यति ।
माता च कमला देवी पिता देवो जनार्दनः ।
बान्धवा विष्णुभक्ताश्च स्वदेशो भुवनत्रयम् ॥

Colophon :

-- -- --

1005

Sl. No. 8172 तप्तमुद्रोर्ध्वपुण्ड्रधारणादिप्रकाशः Ms. No. P. 5071/7

Beginning :

कल्याणगुणसम्पूर्णं कलुषौघविवर्जितम् ।
करुणामृतपाथोधिं कलये कमलापतिम् ॥
दुर्वादिमत्तमातङ्ग × × × न केसरी ।
कुर्वीत करुणां नित्यं गुर्वीं श्रीमध्वदेशिकः ॥

End :

'पितृदेवतानां तथैव श्रुतिः । मिश्रानाकल्पकोटिं पितरस्तु तथा' इत्यादि प्रमाण-वचनसन्दर्भिताद्धव्यकव्यादौ श्रीमद्धरिनिवेदितमेव दातव्यमित्यलं प्रसक्तानुप्रसक्त्या ॥

इति श्रीमदय्यणरामाचार्याणां शिष्येण वडयप्पतनूजेन गुरुणा सङ्गृहीते तप्तमुद्रोर्ध्वपुण्ड्र-धारणप्रकाशे × × तन्निवेदितस्यैव सर्वत्र दातव्यत्वमिति सिद्धम् ॥

Colophon :

समासश्चायं ग्रन्थ इति सर्वमतिमङ्गलम् ॥

1006

Sl. No. 8174 तर्पणदर्पणम् Ms. No. P. 4624/10

Beginning :

तर्पणं द्विविधं– नित्यं नैमित्तिकञ्चेति । तत्र वर्गत्रयोद्देशेन वसुरुद्रादित्यरूपरहिततय जलमात्रेणाहरहः कर्तव्यतया यद्विहितं तन्नित्यतर्पणम् ॥

End:

तथा च तत्रैव–

मृताशौचे तथा श्राद्धे मातापित्रोर्मृतेऽहनि ।
उपवासे च ताम्बूलं दिवा रात्रौ विसर्जयेत् ॥

इति सर्वं सा × × रम् ॥

Colophon :

इति तर्पणदर्पणनिर्णयः ॥

1007

Sl. No. 8182 **तर्पणविधिः** Ms. No. P. 4708/4

Beginning

ता ××× त्रितयं सपत्निजननी मातामहादित्रयं
स्वस्त्रीस्त्रीतनयादितातजननीस्वभ्रातरस्स्वस्त्रियः ।
×× न्तां चात्मभगिन्यपत्न्यधवयुक्जायापितासद्गुरु-
शिष्यस्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे ॥

End :

इतरेषां कारुण्या × × × × दनां त्रयोदशे वा प्रत्याब्दिकं कर्तव्यमित्यर्थः । × × × तु सम्प्राप्ते अन्तरामृतस् × × × × ति शुद्धौ तत्कार्यं दर्शे वापि विचक्षण इति ॥

Colophon :

— — —

1008

Sl. No. 8190 **तर्पणनिर्णयः** Ms. No. C. 2662/2

Beninning :

अथ तर्पणनिर्णयः—

सांवत्सरिकश्राद्धदिने नित्यत्वेन ब्रह्मयज्ञतर्पणे यथाकालं कर्तव्ये । सांवत्सरिकश्राद्धाङ्ग-तर्पणं तु द्वितीयेऽह्नि प्रातः । सदाह गर्गः—

पूर्वं तिलोदकं दत्त्वा अमाश्राद्धं तु कारयेत् ॥

End :

इत्यादिना कुशधारणस्य आवश्यकत्वाभिधानान् न सुवर्णादिना कल्प्यते । अनुकल्पते वा एतेन सौवर्णं पवित्रं तदभावे दर्भाः इति वदन्तः परास्ताः ; सदा नित्यादिपदबाधाप्रसङ्गात् । अथ एव चाचारोऽपि तथैव दृश्यते ॥

Colophon :

इति भट्टरामेश्वरसुतभट्टनारायणकृतः तर्पनिर्णयः समाप्तः ॥

1009

Sl. No. 8193 ताम्बूलचर्वणविधिः Ms. No. P. 2273/10

Beginning :

ताम्बूलचर्वणं कुर्यात् भुक्त्वा रात्रौ च सर्वदा ।
अभ्यङ्गे चैव मां × न्ये दिवा वाप्यथवा निशि ॥

प्रातः काले फलाधिक्यं चूर्णाधिक्यं तु मध्यतः ।
पर्णाधिक्यं भवेद्रात्रौ लक्ष्मीवान् स नरो भवेत् ॥

End :

पक्षश्राद्धे तथा दर्शे युगमन्वन्तरादिषु ।
श्राद्धं निर्वर्त्य × त्वा तु ताम्बूलं खादयेद्द्विजः ॥
मोहादकृत्वा यः श्राद्धं ताम्बूलं यदि खण्डयेत् ।
श्राद्धहन्ता भवेत् कर्ता रौरवं नरकं व्रजेत् ॥

Colophon :

— — —

1010

Sl. No 8195 तिथिनिर्णयः Ms. No. C. 229

Beginning :

चैत्रशुक्लप्रतिपदि वत्सरारम्भः । तत्र औदयिकी तिथिर्ग्राह्या ।
चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रन्तु तदा सूर्योदये सति ॥

इति हेमाद्रौ × त्मोक्तेः । दिनद्वयेपि तद्व्याप्तौ वा–
" पूर्वे वा वत्सरादौ वसन्तादौ (बलिराज्ये) तथैव च ।
पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैः " ॥

इति, गोविन्दार्णवे वृद्धवसिष्ठोक्तेः ॥

End :

" फाल्गुनो मलमासश्च शुद्धमासे कहोलिका कार्या × × ष्टिस्य मासाविशेषाख्या-
पर्वतं वर्जयेन्मले: ।" इति वचनात् ।

अष्टकूपाभ× ×त्रस्तैः कृता त्वं होलिबालिशैः ।

अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भवेदिका (?) ॥

Colophon :

इति होलिकानिर्णयः ।

इति पदवाक्यप्रमाणज्ञलक्ष्मीधरसूरेः सूनुना भट्टोजीदीक्षितेन विरचितः तिथिनिर्णयः ॥

1011

Sl. No. 8208 तिलकलक्षणादिनिर्णयः Ms. No. P. 1364/26

Beginning :

ललाटे तिलकं कुर्यात् मृदा वापि च भस्मना ।

तदभावे तु तोयेन चन्दनेनापि वा द्विजः ॥

End :

धृत्वा यस्तर्पणे श्राद्धे मृदा वा भस्मचन्दने ।

व्यर्थं स्यात् कुरुते मोहात् स च गच्छेदधोगतिम् ॥

Colophon :

— — —

1012

Sl. No. 8209 तिलककल्कस्नानविधिः Ms. No. P. 5723/8

Beginning :

अथ तिलककल्कस्नानम् । व्यासः–

सर्वदा तु तिलैः स्नानं पुण्यं व्यासोऽब्रवीन्मुनिः ।

अमायां चैव सङ्क्रान्तौ सप्तम्यां रविवारके ॥

पौर्णमास्यां व्यतीपातग्रहणे वैधृतौ निशि ॥

End :

नलं तिलं च पिण्याकं × × × निशि भक्षयेत् ।

धाना दधि च सक्तंश्च श्रीकामो वर्जयेन्निशि ॥

भोजनं तिलसम्मिश्रं स्नानं चैव विचक्षणः ॥

Colophon :

— — —

1013

Sl. No. 8210 तिस्राष्टकतिथिनिर्णयः Ms. No. P. 5784/5

Beginning :

पौषे फाल्गु(ण)नसौम्ययोरपि तथा माघेत्य(?)पक्षेषु च
सप्तम्यक्रतुसाष्टमी च नवमी तिस्रष्टकां(?) द्वादश ॥

End :

षष्ठे ××× महालयान्तरगताः तिस्रोष्टकास्तर्हि नो ।
दर्शाद्वा तदनु प्रसिद्धदिवसाः श्राद्धेपितृप्रीतिदाः॥२३॥

Colophon :

-- -- --

1014

Sl. No. 8211 तिस्राष्टकतिथिनिर्णयव्याख्या Ms. No. P. 5784/6

Beginning :

पौष इति ॥ माघे फाल्गु(न-)णमार्गशीर्ष × × × स्तथा माघे अन्त्यपक्षेषु बहुलेषु सप्तम्यष्टमीनवम्यः एताः तिस्राष्टकाः द्वादश ॥

End:

भाद्रपदे तिस्राष्टकाः। महालयां × × × इति चेत् तदनु दर्शाद्याः प्रसिद्धदिवसाः श्राद्धे पितृप्रीतिदाः नो किम् ॥ २०३ ॥

Colophon :

-- -- --

1015

Sl No. 8214 तीर्थनक्षत्रादिनिर्णयः Ms. No. P. 8823/1

Beginning :

××रे यदा भानुसङ्क्रमं कुरुतेऽपि च ।
तस्मिंस्तिथ्यक्षजन्मर्क्षे पूजामेव हि कारयेत् ॥

एकमासद्विनक्षत्रे परतः तीर्थमाचरेत् ।
खण्डर्क्षे रविसंक्रान्ति वर्जयेत्तु बि ×××× ॥

End :

आर्द्रान्तं वैष्णवान्तं वा रोहिण्यन्तमथापि वा ।
सर्वमासेषु कर्तव्यं कृष्णाष्टम्यन्तमुत्सवम् ॥
तिथिप्रधानं सामान्यं नक्षत्रान्तं ततोऽधिकम् ।
तिथिनक्षत्रसंयुक्तो योगश्चात्यन्तदुर्लभः ॥

Colophon :

— — —

1016

Sl. No. 8215 तीर्थलक्षणम् Ms. No. P. 2380/8

Beginning :

भारद्वाजसंहितायाम्—

विष्णोस्तु पादतीर्थस्य वटिकालक्षणं शृणु ।
बिल्वमूलगतां वाऽपि तुलसीमूलमृत्तिकाम् ॥
संशोध्य पूर्णं कृत्वाऽथ मूलमन्त्रेण मन्त्रवित् ।
विष्णुपादोदकेनैव त्वङ्गीकृत्य हरिं स्मरन् ॥

End :

महाभागवता यत्र वसन्ति विमलाः शुभाः ।
तद्देशं मङ्गलं प्रोक्तं यथा विष्णुपदं शुभम् ॥
यत्र भागवता नित्यं पञ्चकालपरायणाः ।
निवसन्ति सदा युक्ताः तत्क्षेत्रं नैमिशाद्वरम् ॥

Colophon :

— — —

1017

Sl. No. 8216 तीर्थश्राद्धनिर्णयः Ms. No. P. 5672/130

Beginning :

गङ्गा गोदावरी शोणा रेवा गौत ×××× ता ।
नर्मदा सर्यू(?) यमुना कावेरी च सरस्वती ॥
तुङ्गा प्रयागा श्रीशैलं गोकर्णं पुष्करं शुभम् ॥

End :

अकालेऽप्यथवा काले तीर्थश्राद्धं तथा नरैः ।
×××× प्राप्तैरेव सदा कार्यं कर्तव्यं पितृतर्पणम् ॥

Colophon :

— — —

1018

Sl. No. 8217 तुलापुरुषपद्धतिः (देवराजीया) Ms. No. P. 8708/3

Beginning :

आत्रेयदेवराजाख्यो यज्वा नत्वा गिरं गुरून् ।
निबन्धान् वीक्ष्य कुरुते तुलापुरुषपद्धतिम् ॥

तत्रादौ मत्स्यपुराणोक्ततुलापुरुषप्रयोगविधिः—

अयनविषुवव्यतीपातादिदिनक्षय × × × गादिमन्वाद्युपरागसङ्क्रान्तिवैधृतिचतुर्दश्यष्टमीपौर्णमास्यमावास्याद्वादश्यष्टकातिथीनामन्यतमीं + + + तुलापुरुषमहादानं चिकीर्षुः × × × × × इष्टदेवता × × मङ्गलं करोति ॥

End :

आचार्यस्तु—

यान्तु देवगणास्सर्वे पूजामादाय पार्थिवात् ।
इष्टकामप्रदानार्थं पुनरागमनाय च ॥

इति मन्त्रेण युगपत् सर्वदेवताविसर्जनं कुर्यात् । यजमानो ब्राह्मणान् दीनानाथांश्च भोजयित्वा स्वयं च मांसादिवर्जं भोजयित्वा तस्मिन्नहनि ब्रह्मचर्यादिनियमवान् × × × ति ॥

वचनैर्मत्स्यवाङ्मूला तुलापुरुषपद्धतिः ।
यज्वना देवराजेन निर्मितैषा निषेव्यतु ॥

Colophon :

इति वचनैर्मत्स्यवाङ्मूला तुलापुरुषपद्धतिः ।
यज्वना देवराजेन निर्मितैषा निषेव्यतु ॥

1019

Sl. No. 8219 तुलापुरुषपद्धतिः (दानमयूखान्तर्गता) Ms. No. C. 532/1

Beginning :

अथ दानानि– अथातः सम्प्रवक्ष्यामीत्यादिना षोडशमहादानान्युक्तानि ॥

End :

ईशादींश्च सम्पूज्य उत्तिष्ठ ब्रह्मणस्पत इत्युत्थाप्य यान्तु देवगणा इति विसृजेत् । ततो यजमानः प्रतिमादिमाचार्यकरे प्रतिपाद्य त्रीन् विप्रान् सम्भोज्य भूयांसि दक्षिणां दद्यात् ॥

Colophon :

इति श्रीमीमांसकशङ्करभट्टात्मजभट्टनीलकण्ठकृते दानमयूखे रूप्यादितुलादानप्रयोगः ॥

1020

Sl. No. 8220 तुलापुरुषपद्धतिः (हेमाद्रीया) Ms. No. C. 532/2

Beginning :

अथ मण्टपपूजा– यदत्र + तत्र गच्छतु + ॥

विचित्ररूपं विध्वस्ततापं विद्युद्द्वितीयकम् ।
समजीमूतमुदिनममृतप्रदमाश्रये ॥

श्रीरामपक्षे + तुलापुरुषमुख्याता वचनानि ॥

End:

यजमानो दीनाननाथांश्च भोजयित्वा स्वयं च मांसादिवर्जं च भुक्त्वा तस्मिन्नहनि ब्रह्मचर्यादिनियमवान् भवेत् ॥

Colophon :

इति तुलापुरुषमहादानपद्धतिः ॥

1021

Sl. No. 8221 तृतीयानिर्णयः Ms. No. SP. 12

Beginning :

अथ तृतीया निर्णीयते– तत्र त्रिविधानि वचनानि स्मर्यन्ते– कानिचित्पूर्वविद्धाविधायकानि ; कानिचित् पूर्वतिथिनिषेधकानि ; कानिचिदुत्तरविद्धायुक्तानीति । तत्र युग्मवाक्यम् ॥

Edn :

सामान्यवचनैः परविद्धाप्रशंसकः परेद्युरनुष्ठानं याति द्वितीयानिषेधकानि वाक्यानि । तेषु कियती द्वितीया विवक्षितेति चेत्– मुहूर्त्तत्रयपरिमितेति भ्रमः– वेदे शास्त्रे च तथाभिधानात् । यत्तु कैमुतिकन्यायेन मुहूर्त्तत्रयं द्रढयति ॥

Colophon :

इति तृतीयानिर्णयः ॥

1022

Sl. No. 8224 तोडरानन्दसंहिता Ms. No. C. 2488

Beginning :

कृपापाङ्गवीक्षां समासाद्य यस्य
प्रमाथी प्रमथ्नाति दैत्यान् समस्तान् ।
विधाता जगन्निर्मिमीते मुरारिः
प्रजा गलयत्येनमीडे गणेशम् ॥१॥

+ + + + + + +

स टोडरो विजयते साम्राज्यलक्ष्मीश्रितः ॥३॥

+ + + + + + +

श्रीनीलकण्ठेन गुरुप्रसादात् समूलसिद्धान्तनिबन्धयुक्तिः ॥४॥

End :

निगदितसमये न पच्यते चेत्
अधिकरतं द्विगुणे प्रपच्यते तत् ।
यदि कनकरत्नगोप्रदानैः
उपशमितं विधिवद्द्विजैश्च शान्त्याम् ॥

Colophon:

इति निमित्तपाकाध्यायः ।

इति श्रीमन्महाराजाधिराज-श्रीमद्दासामरविजयां(?) श्रीटोडरमल्लदेवविरचिते टोडरानन्दे ज्योतिस्सुखे संहितासौख्यं (!) उत्पाताध्यायः समाप्तः ॥

1023

Sl. No. 8225 तैलाभ्यङ्गनिषिद्धकालनिर्णयः Ms. No. P. 5723/9a

Beginning :

अथाभ्यङ्गनिषेवणकालः । तत्र वारविषये मार्कण्डेय.—

× × कान्तिरल्पायुः धनसौभाग्यवर्जितः ।
निर्धनो नृपतिश्चैव वरिष्वभ्यङ्गकृन्नरः ॥

End :

तैलशब्दस्तिलस्नेहे पुरु×मे च योगिकः ।
अतस्तिलविकारेषु पिण्याकादेरपीष्यते ॥
तैलाभ्यङ्गनिषेधेषु तिलतैलं निषिध्यते ।
अभ्यङ्गस्य निषेधेषु सार्षपादेरपीष्यते ॥

Colophon ;

इत्यभ्यङ्गनिषेधकालः ॥

1024

Sl. No. 8227 त्रयोदशीनिर्णयः Ms. No. P. 5723/63

Beginning :

त्रयोदशीं पूर्वविद्धामाह । तदुक्तं ब्रह्मवैवर्ते–

त्रयोदशी तु कर्तव्या द्वादशीसहिता नृप ॥

स्कान्दे–

त्रयोदशी भवेत्पूर्वा द्वादशी तु तथा भवेत् ॥

End :

तथापि पूर्वोक्तशास्त्रेणैव अपराह्णव्यापित्वे प्राप्ते त्रिमुहूर्तादिकालनियमार्थं पुनर्वचनम् । तथा च नियमः ।

शुक्ले मार्गशिरे पक्षे या साऽनङ्गत्रयोदशी ।

कामदा पूर्वविद्धा तु परविद्धा तु हानिदा ॥

Colophon :

इति त्रयोदशीनिर्णयः ॥

1025

Sl. No. 8229 त्रिकालकर्मविपाकसङ्ग्रहः Ms. No. B. 266/1

Beginning :

त्रिकालकर्मविपाकप्रारम्भः । ब्रह्मोत्तरखण्डे–

प्राग्जन्मवासनायोगात् सर्वभक्षोऽस्मि निर्घृणः ।

विदुषामपि दुर्लङ्घ्यप्रकृतिर्वासनामयी ॥

कैवल्योपनिषदि–

पुनश्च जन्मान्तरकर्मयोगात् स एव जीवः स्वपिति प्रबुद्धः ॥

End :

चतुर्विधानि भूतानि चराणि स्थावराणि च ।

नियोगात्तस्य वर्तन्ते देवदेवस्य शूलिनः ॥२॥

वीरतन्त्रे शिवः—

तेषु तेष्विति निष्ठानां तत्तत्कर्मफलाधिकम् ।
प्रयच्छामि यथा मार्गं फलभेदा भवन्ति ते ॥४३॥

Colophon :

— — —

1026

Sl. No. 8230 त्रिज्येष्ठानिर्णयः Ms. No. P. 4181/20

Beginning :

अथ त्रिज्येष्ठाविषयमाह पारिजाते गर्गः—

ज्येष्ठमासि न करग्रहो भवेत्
ज्येष्ठजातदुहितुः सुतस्य वा ।
ज्येष्ठभे यदि भवावुभावपि
ज्येष्ठमासि भवयोः न मङ्गलम् ॥

End :

आद्यगर्भजयोः नैव ज्येष्ठे मासि करग्रहम् ।
नाज्येष्ठा मध्यसम्भूतौ ज्येष्ठे मासि न दुष्यति ॥ इति॥

अन्यसम्भूतौ अन्यमासि सम्भूतौ ॥

Colophon :

— — —

1027

Sl. No. 8233 त्रिपुण्ड्रविधिः Ms. No P 6298/1

Beginning :

× × × × × × ×

ललाटे दृश्यते यत्र ब्रह्माद्या निवसन्ति हि ।
त्रिपुण्ड्रं पावनं नित्यं ब्रह्मविष्णुशिवात्मकम् ॥

त्रिपुण्ड्रेण विना श्राद्धं त्रिपुण्ड्रेण विना व्रतम् ।
त्रिपुण्ड्रेण विना दानं तत्सर्वं निष्फलं भवेत् ॥

End :

शिरस्थात्मा परोऽव्यक्तः शिवः परमकारणः ।
स्थानेष्वेतेषु नामैव त्रिपुण्ड्रेणैव धारयेत् ॥
त्रिपुण्ड्रं ×रविप्राणां वर्तुलं नृपवैश्ययोः ।
अर्धचन्द्रं तु शूद्राणां चिह्नमेतदुदाहृतम् ॥

Colophon :

इति पुलस्त्यप्रोक्तत्रिपुण्ड्रविधिः ॥

1028

Sl. No. 8234 **त्रिपुष्करदोषनिर्णयः** Ms. No. P. 6314/2

Beginning :

श्रीत्रिपुष्करः—

त्रिपादभे तिथिभद्र(?) जायते वासरे गुरौ ।
रवौ भौमे च मुनिभिः प्रोक्तं तद्धि त्रिपुष्करम् ॥

End :

प्राणायामे नमस्कारे स्नाने दाने प्रदक्षिणे ।
मन्त्रमुच्चार्य समये सङ्कल्पे ब्रह्मदण्डके ॥
पैतृके प्रेतकृत्येऽपि उपवीतं विधीयते ।
अपसव्यन्त्वन्यकाले नामगोत्राण्यनुक्रमात् ॥

Colophon : — — —

1029

Sl. No. 8235 **त्रिस्थलीसेतुः** Ms. No. A. 493

Beginning :

सरस्वतीं नमस्यामः प्रत्यूहव्यूहहानये ।

यदेकतावचित्तानां चित्त संवित्तिरुत्तमा ॥

विघ्नाधीश नमस्तुभ्यं विघ्नसङ्घविघातये ।
प्रचयं रचयान्युच्चं बुद्धिशुद्धिं विधेहि च ॥

\+ + + + + + + .

शस्त्रेष्वर्थती पितुरेव यः श्रुतीः
स्मृतीः समालोच्य च देशरीतीः ।
नारायणस्तत्तनयोऽविमुक्ते
तीर्थत्रयीसेतुमसौ विधत्ते ॥

End :

न देवः पर्वताग्रेषु न देवो विष्णुसद्मनि ।
देवश्चिदानन्दमयो दिव्यभावेन दृश्यते ॥
यत्र यत्र दृढा भक्तिर्यदा यस्य महात्मनः ।
तत्र तस्य महादेवः प्रसादमुपगच्छति ॥

Colophon :

इति श्रीमद्विद्वन्मकुण्टमाणिक्य श्रीमद्भट्टरामेश्वरसूरिसूनुना नारायणभट्टेन विरचिता त्रिस्थलीसेतौ सामान्यप्रघट्टके प्रकीर्णकतीर्थधर्मप्रकरणं समाप्तम् । समाप्तश्च प्रघट्टकः ॥

1030

Sl. No. 8239 दक्षिणादिनिर्णयः Ms. No. P. 8235

Beginning :

अथ दक्षिणादिनिर्णयः । तत्र शतपथश्रुतिः—

स एव यज्ञो हतो ददक्षितं देवाय दक्षिणाभिरदक्षयं तस्माद्दक्षिणानामेति भविष्य×राणे ।
अदक्षिणादानं व्रतं चैव नृपोत्तम ।
विफलं तद्द्विजानीयाद्भस्मनैव हुतं हविः ॥

End :

सर्वेषु चैतेषु सुवर्णं दक्षिणा— अनुक्तदक्षिणे दाने यथाशक्ति विहितत्वात ; अथ हिरण्यगर्भस्य द्वितीयमावाहनमुच्यते । मत्स्यपुराणे । × × × × × × ॥

Colophon :

इति भविष्योत्तरपुराणे तुलापुरुषदानविधिः ।

1031

Sl. No. 8240 **दक्षिणायननिषिद्धकर्मनिर्णयः** Ms. No. P. 1364/32

Beginning :

गोदानं स्नातकं चैव समावर्तनकं तथा ।
चौलोपनयने चैव न कुर्याद्दक्षिणायने ॥

End :

तथा च कारिका × × नं षोडशेऽब्दे तदुच्यते ॥
अङ्कोपवेशनं वापि श्मश्रूणां मुण्डनं भवेत् ॥

Colophon :

-- -- --

1032

Sl No. 8241 **दग्धवस्त्रलक्षणम्** Ms. No. P. 4180/66

Beginning :

गोमूषकाग्निकामादिदग्धछिन्नस्य वाससा ।
प्रागग्र ×× स्तरेत्पूर्व पश्चाल्लक्षणमाचरेत् ॥
आषण्मासं निरीक्षेत वस्त्रजीर्णं च दूषितम् ।
कण्ठे तूच्चाटनं ज्ञेय ×× दण्डं गोक्षयं भवेत् ॥

End:

छिन्नस्य वाससश्चैतत् लक्षणं च शुभाशुभम् ।
वस्त्रं च त्रिगुणीकृत्य प्रागग्रे वा मनौ क्षिपेत ॥(?)
व (?)निषिद्धौ नयने च हानिर्कर्णे च मृत्युस्तदनुप्रमादः।
पृष्ठेऽर्थहानिस्तदनु प्रमादःकर्णक्षयश्चक्षुषि सर्वसिद्धिः ॥

Colophon :

इति दग्धवस्त्रलक्षणम् ॥

1033

Sl. No. 8242 **दण्डलक्षणम्** Ms. No. C. 1522/8

Beginning :

भविष्यत्पुराणे—

दण्डं तु वैणवं सौम्यं सिक्थं च नतपर्वकम् ।
पुण्यस्थलसमुत्पन्नं नानाकल्मष(?)शोभितम् ॥
अदग्धमहतं कीटैः पर्वग्रन्थिविराजितम् ।
समुद्धतं तु मेदिन्यां शाखावर्जमृजुं शुभम् ॥

End :

अष्टाङ्गुलं तदर्धं वा षडङ्गुलमथापि वा ।
कार्पाससूत्रयुग्मेन सव्या (?) सम्यक् कृतेन च ॥
ग्रन्थिं वाथ त्रयोपेतं सम्प्रदायक्रमात् विदुः ॥

Colophon:

दण्डलक्षणं समाप्तम् ॥

1034

Sl. No. 8243 **दत्तकनिर्णयः** Ms No. B 1173

Beginning :

श्रीरामं मातरं काशीं लक्ष्मणं पितरं तथा ।
नत्वा विश्वेश्वरो बुद्धया दत्तके वक्ति साम्प्रतम् ॥
नापुत्रस्य लोकोऽस्तीति श्रुत्या पुत्रस्यावश्यकत्वमुक्तम् ॥

End :

उद्वाह्येत्यर्थः । पञ्चमीं सप्तमीमतीत्येति व्याख्याय इदं जनककुलपरम् । अतः पूर्वैव व्याख्योचितेति स्मृतिकौमुद्युक्तेर्युक्तमिति वदन्ति ॥

Colophon :

1035

Sl. No. 8246 **दत्तकोलाहलः** Ms. No. C. 2896

Beginning :

श्रीमत्कन्दपुराधीशं गोपालं गोगणैर्वृतम् ।
प्रणम्य सुखबोधार्थं कुर्वे विद्वत्प्रतोषकम् ॥
दत्तकोलाहलं ग्रन्थं सर्वकोलाहलास्पदम् ।
रङ्गनाथाख्यविबुधः श्रीनिवासतनूद्भवः ॥

End :

श्वश्रवनुज्ञा स्नुषायाश्च भर्त्रनुज्ञा म चेयदा ।
तदभावे स्वतन्त्रेण ब्राह्मणानामनुज्ञया ।
गृह्णीयाच्च सुतं दद्यात् एष धर्मः सनातनः ॥

Colophon :

इति रङ्गनाथनियोजितदत्तकोलाहलग्रन्थः समाप्तः ॥

1036

Sl. No. 8248 **दत्तकौमुदी** Ms. No. C. 910

Beginning :

अभिवन्द्य सुरश्रेष्ठं नित्यं हृत्पद्मवासिनम ।
श्रीमद्विट्ठलवर्येण क्रियते दत्तकौमुदी ॥

दत्तपुत्रसन्ततेरुपनयननिर्णये ×× माणानि ×णि । प्रत्यक्षानुमानशब्दरू × णि । दत्तपुत्रसन्तते × × कगोत्रप्रवरेणो ×× दिकृत्यम् । प्रत्यक्षं दर्शयिष्यामः ॥

End :

एवं स्मृत्युद्भवैः पद्यैर्विधवायाः प्रतिग्रहे ।
दाने च न विवादोऽस्ति प्रत्याज्ञामहदाज्ञयोः ॥

Colophon :

इति दत्तकौमुद्यां विधवास्वीकारविधिः समाप्तः ॥

1037

Sl. No 8249 दत्तमीमांसा Ms. No. P. 6065/1

Beginning :

दत्तपुत्रसन्ततेरुपनयननिर्णये प्रमाणानि त्रीणि— प्रत्यक्षानुमानशब्दरूपाणि। दत्तपुत्रसन्ततेः पालकगोत्रप्रवरेणोपनयनादि कृतं प्रत्यक्षं दर्शयिष्यामः ॥

Edn :

तस्मिन् दीक्षणीयेष्ट्या च दीक्षामस्मै यजमानाय दत्तमित्यत्र येभ्यो यजमानेभ्य इति । + + तस्मादुपदेशमतानुसारिभिरवश्यमादवनीय्यम् ।

एवं श्रीरामेण विदुषां सुखबोधनार्थं बहुस्मृतिभ्यस्सारमुद्धृत्य एकत्र निर्णीतम् । इदं निर्मत्सरतया सर्वैरङ्गीकरणीयम् ॥

Colophon :

— — —

1038

Sl. No. 8251 दत्तकौस्तुभः Ms. No. P 7665/3

Beginning :

ज्ञातिदायादसामन्तान् राजबन्धून्निवेद्य च ।

अपुत्रो विधिना पुत्रं प्रतिगृह्णात्यसंस्कृतम् ॥

निवेद्य चेत्यनेन तेषामाज्ञां लब्ध्वा इति सूचितम् । ननु अपुत्रो विधिना पुत्रमित्यत्र अपुत्रस्य अन्यजातपुत्रप्रतिग्रहयोग्यताप्रतीतेः ॥

End:

भर्तृ × × पि पत्न्याः अनुपनीतपुत्रदानाधिकारयोग्यतायाः असम्बन्धितत्वेन अनुपपत्तिलेशाभावात् जनयितृगोत्रदार्ढ्याच्च । सुप्तिर्यदि न कृतस्स्यात् तदात्व एव मुख्यं हि भवति तद्दानम् ॥

Colophon :

इति दत्तकौस्तुभ[illegible] समाप्ति ॥

1039

Sl. No. 8253 दत्तचन्द्रिका (पाटलाचार्यीयः) Ms. No. C. 2831

Beginning :

कुवलयदलनालं कोमलाङ्गानुकूलं
शुभवितरणलीलं शुद्धहेमाभचेलम् ।
जगदभयदलीकं जैत्रशार्ङ्गेषु जालं
श्रयत सवनमालं शार्ङ्गिणं दिव्यनीलम् ॥१॥
श्रुतिस्मृतिनिगूढार्था यद्वद्यथादर्शबिम्बिताः ।
प्रत्यक्षा इव दृश्यन्ते तं नृसिंहगुरुं भजे ॥२।

अत्र परिग्रहविधिर्निरूप्यते—

End

नित्यानां द्व्यमुष्यायणानां द्वयोः अनित्यानां च द्व्यमुष्यायण × + यदिति सूत्रद्वयं नित्यानित्य द्व्यामुष्यायणदत्तक्षेत्रजपुत्रिकापुत्रादि + + + + मिव्याख्यातमित्यन्यत्रापि एतत्सिद्धिदत्तत्रैविध्यम् ॥

Colophon :

इति पाटलाचार्य वि × × × × लासः समाप्तः ।

२८ तमपत्रे- इति श्रीमत्कौशिकवंशजलधिकौस्तुभस्य भारतपुर्याख्याविख्यातमेधावैभवस्य मन्वादिधर्मशास्त्रपारदर्शनकृतिमीमांसाख्यधर्मशास्त्रनिबन्धननिर्मातुः चार्यायतारस्य श्रीनरसिंहाचार्यस्य द्वितीयसूनुना शांतकनु चतुर्वेदि-श्रीमद्भट्टाचार्यदौहित्रेण रामानुजाम्बागर्भसम्भवेन परमलं. पदवाक्यप्रमाणपारावारपारीणेन श्रीमद्भट्टाचार्यविरचितायां दत्तचन्द्रिकायां प्रथमोल्लासः ॥

1040

Sl. No. 8252 दत्तचन्द्रिका (कुबेरीयः) Ms. No. C. 632

Beginning:

चन्द्रिकानुक्तसञ्जातसंशय×तचन्द्रिका ।

चन्द्रिकास्मानुभविना कृता दत्तकचन्द्रिका ॥

End :

इन्युक्तप्राये × × × × रम्यैषा चन्द्रिकादाना (?) । निर्धने दर्शितालाघुः(?) । मनोरमासन्ति × × × × × धर्मचारिणी ॥

Colophon :

इति महोपाध्याय श्रीकुबेरकृता दत्तचन्द्रिका सम्पूर्णा ॥

1041

Sl. No. 8255 — दत्तचिन्तामणिः — Ms. No. A. 491

Beginning :

वन्दे डुण्डि महालिङ्गं विश्वेशं मणिकर्णिकाम् ।
ईश्वरश्रीनिवासार्याहोबलाख्यगुरूत्तमान् ॥
\+ + + + + + +
तदमात्यकुलोत्पन्नः श्रीमान् बाञ्छेश्वरः सुधीः ।
मिताक्षरादिप्राचीनग्रन्थानालोड्य सर्वशः ।
दत्तचिन्तामणिं कुर्वे दत्तशास्त्रशिखामणिम् ॥

End :

प्रत्यक्षमर्चनं श्राद्धे निषिद्धं मनुरब्रवीत् ।
पिण्डनिर्वपणं चापि महापातकसम्मितम् ॥

इत्यादिकं प्राचीन निबन्धेषु द्रष्टव्यम् । अथ इदं विज्ञानेश्वरहेमाद्र्यादि-मीमांसकमतानुसारेण निर्णीतोऽर्थ इति सुधीभिर्भावनीयम् ॥

Colophon :

इति श्रीमत्कावेरीतीरविराजमानकर्णाटकदेशप्रसिद्धमहीशूरपुरप्रकाशमानकर्णाटकसिंहासन-मूर्धाभिषिक्तमहाराजाधिराजश्रीमत्कृष्णराजमहीपालाश्रितस्य विश्वामित्रकुलोद्भवस्य होसलकर्णाटकस्य वाञ्छेश्वरस्य कृतिषु दत्तचिन्तामणौ विवादभङ्गार्णवखण्डनं नाम द्वितीयः परिच्छेदः ॥

1042

Sl. No. 8257 **दत्तधर्मशास्त्रम्** Ms. No. A. 702

Beginning

पुत्रीकरणस्य मुख्यहेतुः पुत्रेण पितुरौर्ध्वदैहिककर्मकरणमतश्चौर्ध्वदैहिककर्मकरणसमर्थः पुत्रः सम्पादनीयः । अतः पुत्रप्रतिग्रहे अपुत्र एवाधिकारीति सर्वत्र सिद्धम् ॥

End :

द्व्यामुष्यायणस्वीकारानन्तरं यद्यौरसो जातः तदा स द्व्यामुष्यायणः केवलदत्तस्य यावानंशः तदर्धांशभाक् भवति । तथाऽद्व्यामुष्यायणानन्तरं जनकस्य चौरसे पुत्रे जाते स द्व्यामुष्यायणः चौरस्य पुत्रस्य यावानंशः तदर्धांशभाक् भवति ॥

Colophon : - -- --

1043

Sl. No. 8258 **दत्तनिर्णयः** Ms. No. P. 5576/2

Beninning :

दत्तो द्विविधः सगोत्रजोऽन्यगोत्रजश्चेति । अन्यगोत्रजः प्रसिद्धः । सगोत्रजदत्ते व्यवस्थामाह ॥

End :

यावदनिवृत्तिः प्रेतत्वस्य तावदपि स्त्रिया ग्राह्य एव सुतः । सोधिकारी भवत्येवेति तेषामाशयः । परन्तु प्रेततानिवृत्तिपर्यन्तं गतभर्तृकत्वेऽपि तस्या वैधव्यत्वाभावादिति । तत ऊर्ध्वं विधिवत्स तदा दत्तया पुत्रो ग्राह्य इति । अत एव प्रमाणान्तरमपि ॥

Colophon : — — —

1044

Sl. No. 8261 **दत्तनिर्णयः** (महाभारततात्पर्यनिर्णयान्तर्गतः) Ms. No. P. 1441/3

Beginning :

महाभारततात्पर्यनिर्णये जरासन्धवाक्यं च—

अयं हि दत्तपुत्रकः औरसात् विशिष्यते ।

दत्तक्रीतादिपुत्राणां बीजवप्तुस्सपिण्डता ।
पञ्चमी सप्तमी तद्वत् गोत्रं तत्पालकस्य च ॥

End :

उत्तरत्र सन्ततावलम्बनं परिगृहीतगोत्रादिकम् । सन्निहितज्ञातिपुत्रस्वीकरणे विशेषमाह + + + सापिण्ड्यं कुर्यात् न पालकपितृपितामहैः । शरीरपात × × × × × रणात् ॥

Colophon :

— — —

1045

Sl. No. 8263 **दत्तपुत्रप्रतिग्रहविधिः** Ms. No. C. 2061

Beginning :

एवमपि फलप्राप्तौ दत्तपुत्रो ग्राह्यः । अथ दत्तके ग्राह्याग्राह्यविचारः— ब्राह्मणानां सोदरभ्रातृपुत्रो मुख्यत्वात प्रथमं ग्राह्यः ; तदभावे सगोत्रपिण्डो यः कश्चित् ; सापत्नभ्रातृपुत्रो वा ; तदभावे तु असगोत्रसपिण्डो मातृकुलतः ॥

End :

सोमो ददाति पञ्चानां सूर्या सावित्री सूर्यासावित्री अनुष्टुभ् जगती त्रिष्टुप् अनुष्टुप् । पञ्चस्वपि सूर्यासावित्र्या इदम् । एवं सप्त चर्वाज्याहुतीर्हुत्वाऽऽज्यं व्यस्तसमस्तव्याहृतिभिः हुत्वा स्विष्टकृदादि समाप्य आचार्याय धेनुं दत्त्वा विप्रान् भोजयेत् ॥

Colophon :

— — —

1046

Sl.No. 8264 **दत्तपुत्रप्रशंसा** Ms. No. P. 4181/11

Beginning :

अथ दत्तादिविषयमाह अत्रिः—

नापुत्रस्य लोकोस्तीत्यादिश्रुत्या, "अपुत्रस्य मुखं दृष्ट्वा भानुमण्डलमीक्षसेत् ;" इत्यादि स्मृत्या च सन्तानरहितैः दत्तादिपुत्र[illegible] कर्तव्य एव ॥

End :

बध्वा सव्यकराङ्गुष्ठं दक्षिणेन तु सर्वशः ।
अङ्गुलीभिः तत्समस्त पाण्यङ्गुष्ठमिति स्थितिः ॥
नवभागमहः कृत्वा तत्र युग्मांशकांस्त्यजेत् ।
अयुग्माः शुभदाः प्रोक्ताः सर्वकर्मसु शोभनाः ॥

Colophon :

-- -- --

1047

Sl. No. 8265 दत्तपुत्रविधानम् (प्रयोगपारिजातान्तर्गत) Ms. No. P. 5720/2

Beginning :

पुत्रस्वीकारविषयः प्रयोगपारिजाते—

एवं × × × × × × × × × × ण्डलमीक्षयेत् ; इत्यादिस्मृत्या च अपुत्रत्वस्य निन्दाश्रवणात् । तस्माद्दत्तपुत्रेण पुत्रप्रतिग्रहः कार्यः ॥

End :

× × वित्तस्य सर्वस्य भवेतां समभागिनौ ।
अविधाय विधानं × × × × × × × × ॥
तस्मिन् जाते सुते दत्ते कृते चाभिविधानके ।
प × × × सर्वस्य स स्वामी पितुरञ्जसा ॥
जातेष्वन्येषु पुत्रेषु दत्तपुत्रप्रति × × ॥

Colophon :

इति दत्तपुत्रविधानम् ॥

1048

Sl. No. 8268 दत्तपुत्रविधानम् (व्यवहारमयूखीयः) Ms. No. C. 919

Beginning :

उक्तश्चेदं याज्ञवल्क्येन— औरसो धर्मपत्नीज इति द्वादशापि पुत्राननुक्रम्य सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिरिति उपसंहारात् । स्पष्टीकरिष्यते चेदं वक्ष्यमाणशौनकवचोभ्याम् ॥

End :

वस्तुतस्तु ऊर्ध्वं सप्तमात्पितृबन्धुभ्य इति गौतमादिवचनैः प्रतिग्रहीत्रादिभिः सह सापिण्ड्यं पूर्वमुक्तमेवेति दिक् । प्रकृतमनुसरामः ॥

Colophon ;

-- -- --

1049

Sl. No. 8269 **दत्तपुत्रविधानम्** (दशकोलाहलीयः) **Ms. No. C 921**

Beginning :

श्रीरञ्जिताङ्घ्रियुगलः शास्त्रिवर्गैः सुपूजितः ।
तृणावर्तादिसंहर्ता कृतोऽयं ग्रन्थसङ्ग्रहः ॥

अन्येन पश्चिमरङ्गनाथः कारित इत्यर्थः(?) । अकृत इति वा । अयं श्लोकः अन्तर्लापी । अथ दत्तपुत्रग्रहणयोग्यायोग्याः ॥

End:

तस्माच्छुश्रूषुः पुत्राणां हृद्यतमः । नेदिष्ठो हृद्य तमः । नेदिष्ठो ब्रह्मणो भवति । अस्य भाष्यम्— पुत्राणां मध्ये शुश्रूषुः हृद्यतमः । दिष्टं— भागधेयम् । दैवं दिष्टं भागधेय मित्यमरः । + + + प्रमाणादिविधायकम् × × × × × × ॥

Colophon :

पुस्तकलेखनं सम्पूर्णम् ॥

1050

Sl. No. 8271 **दत्तपुत्राधिकारिनिर्णयः** **Ms. No P. 8703/4**

Beginning :

दत्तानथाचा ×× न्यापतित्व ×× सप्त पेदे ।
तथैव दत्तपुत्रस्य द ××× आतकादिभिः ॥

यः प्रदत्तोऽपि पुत्रार्थं जातकर्मादिवर्जितः।
नासौ गच्छति पुत्रत्वं कथं वा तीर्थभाग्भवेत् ॥

End :

तेन दुश्चरितेनासौ का ××प्र××इति स्मृतः।
त्यक्तं पितृकुलं यस्मादनर्हस्सर्वकर्मसु ॥

इति तत् स्वयं दत्तविधिर्वा पुत्रपरिकल्प × × शौनकबोधायनादिभिरभिहितः ॥

Colophon :

— — —

1051

Sl. No. 8272 दत्तप्रदीपिका Ms. No. P. 4181/7

Beginning :

चन्द्रिकायां प्रतिपद्यते—

भ्रातृणामेकजातानां यद्येकः पुत्रवान् भवेत्।
सर्वे तेनैव पुत्रेण पुत्रिणो मनुरब्रवीत् ॥ इति ॥

तन्न। परमार्थतो भ्रात्रन्तरस्यापि गोभिलेनैव पुत्रत्वमाचष्टे ॥

End :

त्रीन् त्रीन् उद्दिश्य पार्वणश्राद्धमेव कुर्यात्। तत्तद्वर्ग(?) च तस्य तस्य पितृव्य-भ्रात्रादीनां पुत्राद्यभावे श्राद्धं एकोद्दिष्टविधिना कुर्यात्। इत्येवं निर्णीतशास्त्रानुसारेण द×स्याति श्रेयः × × × × × फलभाग्भवति ॥

Colophon :

इति दत्तप्रदीपिकायां उत्तरमीमांसा समाप्ता ॥

1052

Sl. No. 8273 दत्तमरणाशौचनिर्णयः Ms. No. C. 179

Beginning :

श्रीगणेशो + + + + + नमः।

दत्तादिमरणेन पालकपितुस्त्रिरात्रम् ॥

अनौरसेषु पुत्रे [षु] जातेषु च मृतेषु च ।
परपूर्वासु भार्यासु प्रसूतासु मृतासु च ॥ इति ॥

End :

यस्तु कश्चित् तथोक्तार्थो दृढ इति ज्ञापयितुमनौरसेष्वित्यादि वाक्यजातं सः करपत्त-परमिति जडचित्तरञ्जकः प्र[ला]पः तत् सङ्ख्यावद्भिः मनसापि स्प्रर्तुमयोग्यमिति नेह लिखितम् ॥

Colophon :

इति दत्तमरणाशौचनिर्णयो नरसिंहयज्वकृतः समाप्तः ॥

1053

Sl. No. 8275 दत्तमहोदधिः **Ms. No. C. 902**

Beginning :

गोवर्धनधरं देवं गोपिकाजनवल्लभम् ।
गोपालं गोमिरीड्यं तं नत्वा रङ्गाभिधःसुधीः ॥१॥
श्रीनिवासात्मजः सम्यक्कुर्वे दत्तमहोदधिम् ।
दत्तरत्नाकरं दृष्ट्वा तथा मन्दारमञ्जरीम् ॥२॥
कौस्तुभं चन्द्रिकां चापि मीमांसां दत्तसङ्ग्रहम् ।
दत्तमुक्ताफलञ्चैव विविच्य च यथामति ॥३॥

End :

पुनः संस्कारवाक्यं तु प्रायश्चित्तपुरस्सरम् ।
आचार्यादिश्चापि मन्त्रवत्त समाचरेत् ॥ (?)
आचार्यं पूजयेत्पश्चाद्भूषणादिभिरादरात् ।
ब्राह्मणान् भोजयित्वा तु गृह्णीयादाशिषश्शुभाः ॥
एवं यः कुरुते + + तस्य वंशो विवर्धते ॥

Colophon :

इति दत्तमहोदधौ श्रीरङ्गपत्तनस्थरङ्गशर्मणा नियोजितग्राह्य(?)पुत्रः परिच्छेदः समाप्तः ॥

1054

Sl. No. 8281 दत्तमीमांसा Ms. No. P. 2273/4

Beginning :

त्रयोदशपुत्राणां स्वरूपमुक्तं मनुना—

औरसः पुत्रिकाबीजक्षेत्रजौ पुत्रिकासुतः ।
पौनर्भवश्च कानीनः सहोढो यूथसम्भवः ॥
दत्तः क्रीतः स्वयंदत्तः कृत्रिमश्चापविद्धकः ।
पुत्रास्त्रयोदश प्रोक्ताः मनुना येन पूर्वतः ॥

End :

हरिद्रासलिलेन पुत्रस्य पादौ प्रक्षाल्य उभौ जायापती प्राश्नीयाताम् । नान्दीं च कृत्वा जातकर्म नामकरणादिकं कुर्यात् । जातकर्मादिकं कृतं चेत् अङ्गादङ्गादिति द्वाभ्यां पुत्रस्य मूर्धानमाघ्राय आशीर्वचनं कुर्यात् ॥

Colophon :

इति पुत्रस्वीकरणप्रयोगः ।

इति श्रीकाशीधर्माधिकारिनाम पण्डितात्मज श्रीनन्दपण्डितविरचिता दत्तपुत्रपुत्रीप्रकरणमीमांसा समाप्ता ॥

1055

Sl. No. 8292 दत्तरत्नप्रदीपिका Ms No. B. 1170

Beginning :

लक्ष्मीचरणलाक्षैकलक्षणं शुभलक्षणम् ।
शेषक्षितिधराध्यक्षं अम्बुजाक्षमुपास्महे ॥

इह तावत् तरति शोकमात्मवित् इत्यादिश्रुत्या शरीरसम्बन्धतापत्रयनिर्वापणोपायरूपतया आत्मविज्ञानं विधीयते ॥

End :

विवाहादौ सावधानेनाविस्मरणशीलेन भवितव्यमिति शिक्षणायान्यगोत्रजदत्तप्रतिग्रह-प्रतिषेधवचनानि आगतिरूपाणीति सर्वं समञ्जसम् ॥ × × × × × × × × × ॥

Colophon :

इति श्रीश्रीशैलान्वयश्रीनिवासाचार्यविरचिता दत्तरत्नप्रदीपिका सम्पूर्णा ॥

Extra Information :

ग्रन्थान्ते–

श्रीशैलवंशजातेन श्रीनिवासतनूभुवा ।
विलेखिता वेङ्कटेन दत्तरत्नप्रदीपिका ॥

इति पद्यमेकं दृश्यते ॥

1056

Sl. No. 8293 दत्तरत्नाकरः Ms. No. B 787

Beginning :

चूडेन्दुनिष्यन्दिसुधानिषङ्गप्रोन्मीलदानन्दरसैकभूम्ने ।
गौरीसनाथाय नमोऽस्तु तस्मैन्यग्रोधभूमीरुहमूलधाम्ने ॥
मानवात्रेयवैज्ञानेश्वरकालामृतादिकान् ।
\+ + + + + + + + +
दत्तरत्नाकरं नाम कुर्वेऽहं विदुषां मुदे ॥

End :

स्वयमेव गोत्रगोत्रं पृष्ठतः कृत्वान्यगोत्रप्रविष्टो ज्येष्ठः । एवञ्च त्रिविधोऽप्यनित्य-द्व्यामुष्यायण उपपादितः । इतोऽन्येपि दत्तद्व्यामुष्यायणाश्च बहुविधाः प्रत्यक्षादिप्रमाणसिद्धाः ॥

Colophon :

इति श्रीमण्डतुण्डाग्रहारनायकरत्नभूत मानवाध्वरीन्द्रतनुजेन जानकीसोमपीथिनीगर्भशुक्ति-मुक्तामणिना तत्तादृग्बोधायननिखिलबोधायनधर्मराजाध्वरिशिखामणिदौहित्रेण धर्मराजाध्वरिवरेण विरचितो दत्तरत्नाकरो विदुषां मुदमावहतु ॥

1057

Sl. No. 8299 दत्तरत्नापणम् Ms. No. C. 915

Beginning :

प्रणम्य शुभदातारं गोपालं गोभिरीडितम् ।
षाढेन्दुपुर ×× श्रीनिवासतनूद्भवः ॥
रङ्गनाथाख्यविबुधः रङ्गनाथकृपाबलात् ।
दत्तकोलाहलं दत्तकौमुदीं ×× महोदधिम् ॥
दत्तमालां दीपिकाञ्च दत्तमुक्ताफलं तथा ।
ततो दत्तविवेकञ्च संवीक्ष्य सविशेषतः ॥
कृतोऽतिबुधतृप्त्यर्थं दत्तरत्नापणं स्मृतिम् ॥

End :

सगोत्रे वाऽन्यगोत्रे वा विधवाभिः प्रतिग्रहे ।
निर्विवादप्रमाणानि ×××विशेषतः ॥
विलोक्य युक्त×ह्राह्यमन्यथा चेद्विसृज्यताम् ।
समूलकमिमं ग्रन्थं सदसद्व्यक्तिभेदकाः ॥
विविच्य च विशेषेण विदाङ्कुर्वन्तु सर्वदा ॥

Colophon :

इति कदेन्दुपुरवास्तव्यरङ्गनाथसूरिविरचित दत्तरत्नापणं सम्पूर्णम् ॥

1058

Sl. No. 8302 दत्तरत्नापणाङ्गणः Ms. No. A. 72

Beginning :

श्रीमत्सिद्धिविनायकं प्रणमतां विघ्नौघविध्वंसकं
वाणीं वाक्प्रतिभाप्रदां स्मृतिकृतो मन्वादिकान् सद्गुरून् ।
सीतारामसुधीः प्रणम्य तनुते श्रीदत्तरत्नापणं
नृणां ग्रन्थविरोधसंशयपरिच्छेदाय पुत्रग्रहे ॥ + + +

अथादौ पुत्रस्वीकारावश्यकत्वं प्रतिपाद्यते ॥

End :

संदिग्धव्यवहाराणां नियमने राज्ञ एव स्वातन्त्र्यमिति सर्वमनवद्यम् ॥

दत्तानां वयोविधिः कलियुगे तत्तत्प्रभेदाः तथा
ग्राह्याग्राह्यविभाग वृत्त्यधिकृतो ग्रन्थेषु ये कीर्तिताः ।
तानालोड्य कृतिनिबन्धनकृतां भावानुसारात् कृता
किञ्चिन्नात्र हि कल्पितं स्वमतितः तस्मात् बुधैः सेव्यताम् ॥

Colophon :

श्रीसीतारामविरचित दत्तरत्नापणाङ्गणे ।
दायभागविवेकाख्यमौक्तिकोत्तमगुम्भनम् ॥

समाप्तोऽयं ग्रन्थः ॥

1059

Sl. No. 8304 **दत्तविधिः** (संस्कारकौस्तुभान्तर्गतः) Ms. No. P. 692/1

Beginning :

अथ संस्कारकौस्तुभे दत्तकविधिः । अथ दत्तके ग्राह्याग्राह्यविवेकः—

ब्राह्मणानां सखण्डेषु कर्तव्यः पुत्रसङ्ग्रहः ।
तदभावे सपिण्डेषु अपुत्रे तु न कारयेत् ॥

अत्र च सपिण्डेष्वपि भ्रातृसुतो मुख्यः । तदभावे सगोत्रः सपिण्डोऽपि यः कश्चित् ॥

End:

इतिहासपुराणेषु दत्तकत्वोक्तेश्च पत्न्यभावे सा रिक्थं लभेत् ; दुहितृत्वात् । सता सन्तोषसिध्यर्थमिति दत्तकादिविधिः । अकार्यनन्तदेवेन + + + समुदेऽस्तु सा ॥

Colophon :

श्रीमदापदेवसूनुना अनन्तदेवेन कृते संस्कारकौस्तुभे दत्तकविधिः समाप्तः ॥

1060

Sl. No. 8305 **दत्तविधिः** (भीमसेनीयः) Ms. No. A. 874

Beginning :

नत्वा व्यासमुखान् सर्वान् स्मृतिकर्तॄन् सतां मुदे ।
भीमसेनाख्यविदुषा क्रियते दत्तसङ्ग्रहः ॥

दत्तपुत्रस्वीकारविधिविवेचकप्राचीनानेकनिबन्धानुसारेण यथामति सङ्क्षिप्य पुत्रस्वीकारविधिर्निरूप्यते ॥

End :

स्वीकृता च दुहिता संसारार्थं पुत्रचतुर्थांशं लभत एव; बाधकाभावात् इति सङ्क्षेपः ।

आलोच्य सर्वशास्त्रार्थान् निर्मितेयं कृतिर्मया ।
बुधानामुपकाराय व्यवहारोपयोगिनी ॥
न चाप्राकृतमेतस्यां नानुष्ठानपराहतम् ॥

Colophon :

— — —

1061

Sl. No. 8309 **दत्तसञ्जीविनी** Ms. No. P. 3750/2

Beginning :

षडाननाह्वयं नत्वा ×× युरचतुराननः ।
गजाननमहं वन्दे कृतविघ्नविधूननम् ॥१॥

\+ \+ \+ \+ \+ \+ \+

श्रीमन्मट्लिकुलाब्धिशीत × हसा धर्मं सतां बिभ्रता ।
श्रीमद्वेङ्कटरामगजधरणीनाथ × × × बोधितैः ।
विद्वद्भि गतमत्सरैः विलिखिता स्पष्टार्थदा पत्रिका ॥
स्मृत्या नारायणभुजगा च विदुषां सन्तोषमाविनिर्मिताम् ॥२॥

End :

विधानान्तराणि च स्मृतिच × × × तौ द्रष्टव्यानीति सर्वं चतुरस्रम् ।

मट्लिवंशसुधाब्धीन्दुवेङ्कटाद्रमहीपतेः ।
आस्थानस्थैः बुधैरेषा लिखिता पत्रिका भृशम् ॥
श्रीयम्मसूरिवंश्याय (?) + + + चिरं भुवि ॥
सर्वस्मृत्यनुसारेण + + + जयतां चिरम् ॥

Colophon :

इति दत्तसञ्जीविनी समाप्ता ॥

1062

Sl. No. 8310 दत्तसिद्धान्तमन्दारमञ्जरी Ms. No. P 2398/1

Beginning :

बन्दे लक्ष्मीधरित्रीभ्यां सानुरागावलोकितम् ।
स्वयं तथा ते वीक्षन्तं सस्मितं वेङ्कटेश्वरम् ॥
धर्मशास्त्रार्थतत्त्वज्ञान् प्रणम्यैतत्कृपाबलात ।
दत्तसिद्धान्तमन्दारमञ्जरी क्रियतेऽधुना ॥

End :

यस्य नोपरता भार्या देहार्धं तस्य जीवति ।
जीवत्यर्धशरीरेऽर्थं कथमन्यः समाप्नुयात् ॥

Colophon :

श्रीदत्तसिद्धान्तमन्दारमञ्जरी समाप्ता ॥

1063

Sl. No. 8315 दन्तधावनविधिः Ms. No. P 5723/3

Beginning :

अथ दन्तधावनम्–

प्राङ्मुखोदङ्मुखो वापि ईशानाभिमुखोऽपि वा ।
दक्षिणं बाहुमुद्धृत्य अन्तर्जानूपविश्य च ॥
आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ॥

End :

पर्यौन वा तृणेनापि जिह्वालेखनमाचरेत् ।
मध्यमानामिकाङ्गुष्ठैः दन्तान् परिमृजीत वा ॥
मुखं द्वादश गण्डूषैः शोधयित्वा ततः शुचिः ॥

Colophon :

— — —

1064

Sl. No. 8319 दर्भलक्षणम् Ms. No. P. 2380/24

Beginning :

× × × × × × × × इत्येतद्दर्भलक्षणम् ।
पथि दर्भाश्चितीदर्भाः ये दर्भा यज्ञभूमिषु ॥
स्तरणासनदर्भा ये षड्दर्भान् परिवर्जयेत् ॥
कुशाः काशाः यवा दूर्वाः उशिराश्च सका ×××।
गोधूमा: व्रीहयो मौञ्जाः दशदर्भास्तु तल्लजाः ॥

End :

मासि भाद्रपदे दर्शे षाण्मासं सम्प्रयोजनम् ।
माघे तु वत्सरं प्राहुः नान्यकाले कदाचन ॥
भानुवारे तु गृह्णीयात् सप्ताहं संप्रयोजनम ।
अन्यत्र वासरे दर्भाः तद्दिने सम्प्रयोजनम् ॥

Colophon:

— — —

1065

Sl. No. 8321 दर्शपूर्णमासस्थालीपाकनिर्णयः Ms. No. P. 3156/8

Beginning :

× × × पौर्णमास्यां दर्शपूर्णमासस्थालीपाकारम्भः । विवाहानन्तरं श्वो वा परश्वो वा इष्टिकालः आगतश्चेत् स्थालीपाकं तस्मिन्दिने आधानसमारम्भं कृत्वा स्थालीपाकं कर्तव्यम् ॥

End :

छन्दोगानां × × × मन्त्रवदेब × × × × × ×. णम् । उपनयनदीक्षि- × × शिखाग्रहणं तुरीये दिने पश्चाद्दिने समावर्तने तु कृते सदैव शि × × × ग्रहणम् ॥

Colophon :

-- -- --

1066

Sl. No. 8323 दर्शश्राद्धनिर्णयः Ms. No. P. 6186/5

Beginning :

कनिष्ठो दूरतः तिष्ठेत् समीपे अग्रजे स्थिते ।
श्रुत्वा मारणवार्ता च कृत्वा चैत्र च मुण्डनम् ॥
आत्मशुद्धिं पुनः कृत्वा प्रायश्चित्तादि कारयेत् ॥

End :

मासिकानां पृथक्कुर्यात् प्रतिश्राद्धमिति स्थितिः ।
यवीयसा कृतं कर्म प्रेतशब्दं विहाय तु ।
कथञ्चिदनुजः कुर्यात् भूयः कुर्यात्तदग्रजः ॥
अविभक्तो विभक्तो वा मातापित्रोः सपिण्डकम् ॥
\+ \+ \+ \+
मातपित्रोः दशाहं स्यात् अन्येषां त्रिदिनं भवेत् ॥

Colophon :

-- -- --

1067

Sl. No. 8324 दर्शषट्पिण्डविधिः Ms. No. P. 4624/4

Beginning :

समस्तसम्पत्समवाप्ति + पितॄनुद्दिश्य दर्शश्राद्धं कर्तुं मुख्यकालो + ब्रुवन्तु । प्राणा- नायम्य देशकालावुच्चार्य पितृपितामहप्रपितामहानां गोत्राणां + + षट्पिण्डपार्वणविधानेन अन्नादिद्रव्येण + + करिष्ये ॥

Edn :

पतिपुत्रवती नारी म्रियते यदि कर्हिचित् ।
तस्याः श्राद्धे तु सम्प्राप्ते न कुर्यात्तिलतर्पणम् ॥

Colophon :

— — —

1068

Sl. No. 8325 **दर्शस्नानविधिः** Ms. No. P. 3758/8

Beginning :

अमावास्या तु सोमेन सप्तमी भानुना सह ।
चतुर्थी भूमिपुत्रेण सोमपुत्रेण चाष्टमी ॥
चतस्रस्तिथयस्त्वेता सूर्यग्रहणसन्निभाः ।
अमासोमेन भौमेने गुरुणा च समन्विता ॥
सा तिथिः पद्मकं नाम महापर्वशताधिकम् ।
अमावास्यासोमवारे प्रातर्मौनी समाहितः ॥
नद्यां स्नानं प्रकुर्वीत गोसहस्रफलं लभेत् ॥

End:

तद्विष्णोरिति मन्त्रं हि जपेदप्सु पुनः पुनः ।
ऋचो यजूंषि सामानि अथर्वाङ्गिरसस्तथा ॥
सर्वमष्टाक्षरान्तस्थं यच्चान्यदपि वाङ्मयम् ॥

Colophon :

— — —

1069

Sl. No. 8329 **दशनिर्णयः** Ms. No. P. 2389

Beginning :

अथ जयन्तीनिर्णयः क्रियते—

सर्वनिर्णये शास्त्रमेव प्रमाणम्, न युक्तयः । यदाह—

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्र विधानोक्तं कर्म कर्तुमिहार्हसि ॥

End:

हरिदिवसमुपोष्य प्रोक्तमार्गेण जन्तुः
व्रजति म पुनरन्तर्वसन्ति गौळञ्जनन्याः ।
बहुप्रजासमेतः कामरागान्वितोऽपि
व्रजत पदमनन्तं लोकनाथस्य विष्णोः ॥

Colophon :

इति हरिकुलतिलकस्य सरस्वतीवल्लभपौत्रस्य श्रीरङ्गनाथसूनोर्वैदिकसार्वभौमापरनामधेयस्य श्रीवेङ्कटनाथस्य कृतिषु दशनिर्णय्यां एकादशीनिर्णयः समाप्तः । समाप्ता दशनिर्णयी ।

1070

Sl. No. 8331 दशमीनिर्णयः Ms. No. P. 5723/52

Beginning :

अथ दशमी । अङ्गिराः–

सम्पूर्णा दशमी कार्या पूर्वया परयापि वा ।
युक्ता न दूषिता यस्मात् × × तिः सा सर्वतोमुखी ॥

ब्रह्मवैवर्ते–

दशमी चैव कर्तव्या नवमी संयुता विभो ॥ इति ॥

End :

यत्तु कूर्मवचनम्–

दशम्येकादशी विद्धा निष्फला इति कीर्तिता । इत्युक्तम् ।
नवमी पूर्वविद्धैव पक्षयोरुभयोरपि ।
कृष्णपूर्णोत्तरा शुक्ला दशम्येव व्यवस्थिता ॥

Colophon :

इति दशमीनिर्णयः ॥

1071

Sl. No. 8333 **दशमीवेधानिर्णयः** Ms. No. P 4201/4

Beginning :

श्रीनिवासं नमस्कृत्य श्रीमध्वमुनिपूर्वकान् ।
गुरूनानम्य विदुषां पक्षस्याप्यनुसारतः ॥
विद्याधीशयतीन्द्राणां ग्रन्थमाश्रित्य सन्मुदे ।
क्रियते श्रीनिवासेन दशमीवेधनिर्णयः ॥

End:

एतच्चतुष्कादुपरीत्यपरोऽर्थः । लिप्तिग्रहणं कार्यमितीदं परस्यार्थः । कार्यमिति शेषः ॥

Colophon :

करिकेहल्लिकुलोत्पन्न-श्रीनिवासाचार्यसूनुना । (?)
श्रीनिवासेन रचितो दशमीवेधनिर्णयः ॥

1072

Sl. No. 8334 **दशमीवेधानिर्णयः** (संस्कृतकर्णाटकभाषामिश्रः) Ms. No. P. 4201/5

Beginning :

भाषया पूर्वोक्तवेधाप्रकारः–

ಅತಿವೃದ್ಧಿಯಲ್ಲಿ ಸಿದ್ಧಘಳಿಗೆ ೫೨ ವಿಘಳಿಗೆ ೧೯ ಕಂಡರೇ ವಾಕ್ಯಕರಣ × × ಲಿಪ್ತಿಯಿಂದ ಪ × × ಘಳಿಗೆ ೩ ವಿ ೪೧ ವೇಧೇ ೯ ಈ ಇವರಲ್ಲಿ ಸಿದ್ಧಾಂತ ಘ ೫೨ ವಿ ೪ ಕಂಡರೆ ಏತದುಪರಿ ವಾಕ್ಯ ಲಿಪ್ತಿಘಳಿಗೆ + + + ವೇಧೇ ಯಿಂದು ತಿಳಿವುದು ॥

End :

ಅತಿಕ್ಷಯ ಸಿ ೫೪ ವಿ ೧೩ ಕ. ತದುಪರಿ ವಾಕ್ಯಾದಿ ಘ ೧ ವಿ ೪೧ ವೆಧೇ ೧೩ ಈ ಪದಾಲ್ಲಿ ಸಿಘವು ೪ ವಿ ೮ ಕಂಡರೆ ಏತದುಪರಿ ವಾಕ್ಯ ಲಿಪ್ತಿ ಸಪ ಘ ೧ ವಿ ೪೭ ಕಾಣದೆ × × × ವೇಧೇ ಉಂಟು ೧೪ ॥

Colophon ;

ಇದು ವಿದ್ಯಾಧೀಶಶ್ರೀಪಾದಂಗಳ ಸಂಪ್ರದಾಯ. ಶ್ರೀರಂಗಪಟ್ಟಣ ಕರಿಕೆಟ್ಟಲ್ಲಿ ಶ್ರೀನಿವಾಸಾಚಾರ್ಯರು ಮಾಡಿದದು ॥

1073

Sl. No. 8338 दशावतारनिर्णयः Ms No. C. 1032

Beginning :

श्रीरङ्गपत्तनस्थेन श्रीनिवासतनूभवा ।
श्रीरामस्य नवम्याश्च निर्णयन्तु विशेषतः ॥
बहुस्मृतीस्समालोक्य लिख्यते रङ्गशास्त्रिणा ॥

अथ चैत्रशुद्धनवमी रामनवमी ॥

End:

मत्स्य-कूर्म-परशुराम-बलराम-बौद्ध-कल्क्यादयः, युगकल्पभेदेन तिथिभेदात् भवन्ति । अतः सर्वैः नानुष्ठीयन्ते । दशरथराम-नरसिंह-वामन-कृष्ण-जयन्तीनां उपवासः सर्वैः कार्यः । युगकल्पादिभेदेऽपि मनाक् तिथिभेदा न भवन्ति । अतः सर्वैः कर्तव्यः ॥

Colophon :

श्रीरङ्गपत्तनस्थेन श्रीनिवासतनूभुवा ।
ग्रन्थान् सर्वान् समालोड्य जयन्त्या दशनिर्णयः ॥

Extra Information :

ग्रन्थान्ते–

प्रमाथिवत्सरे कृष्णपक्षे चैत्रे खेर्दिने ।
मेषे पूषणि सम्प्राप्ते सङ्क्रमे प्रतिपत्तिथौ ॥
रङ्गनाथाख्यविदुषा कृतोऽयं ग्रन्थसङ्ग्रहः ॥

इति सार्धश्लोक एको दृश्यते ॥

1074

Sl. No. 8340 दानकाण्डः Ms. No. A. 650

Beginning :

यं ब्रह्मा वरुणेन्द्र + + + + + + सामगाः ।
ध्यानावस्थित + + + + तस्मै नमः ॥१॥

यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
सन्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥२॥

तदुक्तं दानमयूखे– तच्च द्रव्यं सप्तविधम् ॥

End :

अलिसिंहौ वृषकुम्भौ विष्णुपदः प्रकीर्तितः ।
मीनः कन्या धनुर्युग्मं स्मृतास्ता षडशीतयः ॥
अतीतानागते पुण्ये द्वे उदग्दक्षिणायने ।
त्रिंशत्कर्कटके नाड्यो मकरे विंशतिः परा ॥

नवग्रहरवक्र ॥

Colophon :

-- -- --

1075

Sl. No. 8342 **दानतिथिनिर्णयः** Ms. No. P. 5723/31

Beginning :

अथ प्रतिपदादिदानव्रततिथिनिर्णयः–

सोदयत्रिमुहूर्तायां कुर्यात् × न व्रतानि च ।
उभयत्र तथात्वे तु पूर्वेद्युस्तदनुष्ठितः ॥

End:

द्विमुहूर्तापि वा ग्राह्या पूज्यास्ततिथयो यतः ।
असम्पूर्णा भवेयुस्ताः प्रयोगे दानकर्मणि ॥
अपूजा तिथियोगेऽपि पूर्वेद्युरिति काश्यपः ॥

Colophon :

इति दानतिथिनिर्णयः ॥

1076

Sl. No. 8345 **दानपद्धतिः** (रुद्रयामळान्तर्गता) Ms. No. P. 2930

Beginning :

अथातस्सम्प्रवक्ष्यामि वीरभद्रबलिक्रमम् ।
महारोगमहामृत्युमहाशत्रुनिवारणम् ॥
ब्रह्महत्यासुरापानसुवर्णस्तेयादिपापहम् ।
× × स्थानस्थग्रहोद्भूतसर्वदोषहरक्षमम् ॥

End :

अथापूपं गुडपायसं सघृतमिश्रं निवेदयेत् । अथ ऋत्विग्भ्यो दक्षिणां दद्यादाचार्याय विशेषतः ; ब्राह्मणान् भोजयेत् ; पञ्चगव्यादिनाभिषेकं कुर्यात्— इत्याह भगवान् बादरायणः ॥

Colonhon :

१७३ तमे पत्रे—

इति श्रीमद्रुद्रयामळोक्तसर्वरोगहरारोग्यलिङ्गदानविधिः ॥

1077

Sl. No. 8346 **दानप्रयोगमणिदर्पणम्** Ms. No. P 8708/2

Beginning :

प्रयोगान् कथयित्वैवं पर्वतानां विचक्षणः ।
इदानीमतिदानानां प्रयोगं कथयत्यसौ ॥

अथ धेनुप्रकरणम् । तत्र गुडधेनुर्मत्स्यपुराणे—

अयनविषुवव्यतीपातोपरागादिपर्वसु कार्तिक्यां माघ्यां युगादिषु समस्तपापक्षयावाप्त्यशेष- यज्ञफलावाप्तिकव्यभोगानुभवमुक्तिप्राप्तिलक्षणं फलम् ॥

End:

यो घटं तैलसम्पूर्णं तिलद्रोणोपरि स्थितः । + +
तिलेन ... (?) ॥ + +

आरोग्यमतुलं लब्ध्वा जीवेच्च शरदां शतम् । +
सर्वपापगृहीतोऽपि नरकेषु न मज्जति ॥

Colophon :

३० तमे पत्रे–

इति दानप्रयोगमणिदर्पणे वृषदानम् ।

१०५ तमे पत्रे–

इत्यारोग्यपुरुषतैलघटदानविधिः ॥

1078

Sl. No. 8347 दानमयूखः Ms. No. C. 4091

Beginning :

यो लीलया सन्तनुतेऽत्र विश्वं
तत्पालयत्यात्मनि विश्वरूपे ।
लयं नयत्याशु च पूर्णरूपः
शिवं तनोत्वाशु रविर्ममासौ ॥

श्रुतिं स्मृतिं वीक्ष्य पुराणजातं
तत्तन्निबन्धानपि सन्निबन्धान् ।
श्रीशङ्करस्यात्मज एणदाने
श्रीनीलकण्ठो विवृणोति कृत्यम् ॥

End :

गवां प्रपाने पानीयं कृत्वा पुरुषसत्तमः ।
वारुणीलोकमाप्नोति क्रीडत्यब्दगणायुतम् ॥

तथाः–

सिंहव्याघ्रभयत्रस्तां पङ्कलग्नां तलेगताम् ।
गामुद्धृत्य नरः ॥

Colophon :

1079

Sl. No. 8351 दानसङ्क्षेपचन्द्रिका Ms. No. C. 3832

Beginning

प्रणम्य मातरं गङ्गां भैरवं वनशङ्करीम् ।
महादेवाख्यपितरं श्रौतस्मार्तविशारदम् ॥
दिवाकरेण सुधिया सारमुद्धृत्य शास्त्रतः ।
शिष्टानां तन्यते तुष्ट्यै दानसंक्षेपचन्द्रिका ॥

तत्र परस्वस्वोत्पत्यन्तो द्रव्यत्यागो दानम् । देवलः ॥

End :

अमत्या ब्राह्मणबधेतस्त्रिरात्रमन्तर्जले निमज्य × × × प्राणायामैश्चाघमर्षणं जपेत् । महापापैः शुद्ध्येत् । मत्या चेत्प्राग्वा निष्क्रम्य स्नायादिति इति संक्षेपः ॥

Colophon :

दानचन्द्रिका समाप्ता ॥

1080

Sl. No. 8354 दायदशकम् Ms. No. C. 109/2

Beninning :

स्वेच्छातः स्वयमार्जिते तु विभजेदर्थे स्वभार्यांसुतान्
आत्मानं च समं क्रमागतधने पुत्रेच्छयाप्यस्पृहः ।
यद्येकस्तनयः पिता द्विगुणभाक् भार्या निरंशा तदा
प्रेतेऽस्मिन्नितरे समाविपितृकाः (?) पौत्राः पितृद्वारतः ॥

End :

क्लीबाद्या निजधर्मकर्मरहितास्तद्योषितः कन्यकाः
भर्तव्यास्तु निरंशका हरतु सत्पुत्रोंशमन्धादिजः ।

नो रक्षा न च भागिनोऽत्र पतिताः सन्यासिनो नैष्ठिकाः

भर्तव्योऽत्र कुटीचको दुहितरः पुत्राः स्त्रियः पूर्ववत् ॥

Colophon :

— — —

1081

Sl. No. 8355 दायाददशकव्याख्या Ms. No. P. 2491/4

Beginning :

जीवद्विभादिरुच्यते—

स्वेच्छातः— स्वेच्छातः स्वयमार्जिते तु विभजेदर्थंस्वभार्यासुतानिति । स्वयमार्जितार्थ-विषये आत्मानं भार्यायाः पुत्रांश्च स्वेच्छयैव विभजेत् । तथाह नारदः ॥

End :

सन्यसिनामंशं सन्यासात् पूर्वमुत्पन्नः पुत्रः अर्हति । अत्र सन्यासिषु कुटीचको भर्तव्यः ।

इत्येवं × × दशकं व्यवृणोद्दायसंग्रहे ।

दुर्जयो रङ्गराजस्य बन्दिनन्दितसज्जनः ॥

Colophon :

इति दायाददशके दशमः श्लोकः ॥

1082

Sl. No. 8359 दायनिर्णयः Ms. No. P. 4212/27

Beginning :

अपुत्रा योषितश्चैषां भर्भक्याः साधुवृत्तयः ।

निर्वास्याः व्यभिचारिण्यः प्रतिकूलास्तथैव च ॥

इति याज्ञवल्क्यः ।

विधवा यौवनस्था चेन नारी भवति कर्कशा ।

आयुषो रक्षणार्थं तु स तस्या जीवनं तथा ॥

End :

बृहस्पतिः–

द्रव्ये पितामहे प्राप्त जङ्गमे स्थावरेऽपि च ।
सम स्वामित्वमाख्यातं पितुः पुत्रस्य चोभयोः ॥
पितामहं स्वयं पित्रा स्वशक्त्या यदुपार्जितम् ।
विद्याशौर्यादिनाऽवाप्तं तत्र स्वाम्यं पितुः स्मृतम् ॥

Colophon :

-- -- --

1083

Sl. No. 8361 **दायभागः** (आन्ध्रभाषा) Ms. No. P. 6242

Beginning :

వ్యయనామసంవత్సరమార్గశిర శు ౧౫ యల్లు శ్రీమతు లింగన సోమయాజులకు మాల్లు ఆరుగురున్న ఏకస్థులై పిత్రార్జిత స్వాస్థ్యాలు సరిచూచుకున్న వివరం ॥

End :

పత్రిక రాశినవాడు శివరాఘవయ్య ఇటని రాశిన విభాగపత్రాలు రెండు పున్నుసూరి ఉమ్మన్న వశానహాటి శివరాఘవయ్య వశానహాటి పెద్దరామన్న ఒప్పితం ఆక్కలె బట్ల ఒప్పితం ॥

Colophon :

-- -- --

1084

Sl. No. 8362 **दायभागबिम्बः** Ms. No. B. 269

Beginning :

तत्र दायभागबिम्बः–

अथ दायभागबिम्बो निरूप्यतेऽस्मामिराज्ञया नृपतेः आनरबल् विरुदवतो जान्. फैयर्ही-मसुर्बिशः–

अथ दायभागस्वरूपम् । तत्र नारदः–

विभागोऽर्थस्य पित्र्यस्य तनयैर्यः प्रकल्प्यते ।

दायभाग इति प्रोक्तः व्यवहारपदं बुधैः ॥

End :

अन्येन केनापि पुनस्तद्व्यत्ययो न कर्तव्यः। तथा कर्तुं कश्चिदुद्युक्तश्चेत्तं राजा दण्डयेदिति सिद्धान्तः। अयमेव विभक्ताश्रयणीयाचारः।

अथ विभागधर्मसद्भावनिर्णायकहेतुपरम्परा ॥

Colophon :

-- -- --

1085

Sl. No. 8364 दिनकरोद्योतः Ms. No. P 4840

Beginning :

सारं यच्छ्रुतिशिरसामगोचरं यन्मनोवचसाम्।
तत्कौशल्यवचसा शिक्षापात्रमहो वन्दे ॥
मीमांसार्णवकर्णधारचतुरः श्रीभट्टनारायणः
तद्वंशस्य करीरतां भजति यो विश्वेश्वराख्यः कृती।
+ + + + +
गागाभट्ट इति प्रथां दिनकरात्प्राप्तः पितुर्लालना-
त्तेनाचारनिबन्धनो दिनकरोद्योतेऽधुना पूर्यते ॥

End :

अथ माघकृत्यम्—

तत्र माघस्नानं पौषस्य शुक्लैकादश्यां पौर्णमास्याममायां +
भूशय्या ब्रह्मचर्येण शक्तः स्नानं समाचरेत्।
अशक्तौ ब्रह्मचर्यादिः स्वेच्छा तस्यैव कथ्यते।

आदिपदेन सर्वधर्माणामनित्यत्वमुक्तम्। ब्रह्मचर्ये अशक्त्यसम्भवात्।
तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी।
तिलभुक् तिलदा × × × × × ॥

Colophon :

इति श्रीमद्रामेश्वरसूनु-श्रीमन्नारायणसुत-श्रीमद्रामकृष्णात्मज-दिनकरकृते दिनकरोद्योते मार्गशीर्षकृत्यम् ॥

1086

Sl. No. 8366 दिनक्षयलणम् Ms. No. P. 5276/52

Beginning :

दिनक्षयलक्षणं पद्मपुराणे

द × × द्वैविध्यं तावेकवारे यस्मिन् राश्यां दिनक्षयः ।

वशिष्ठः–

एकस्मिन् वासरेऽह्नि तिथीनां त्रितयं यदा ।

तदा दिनक्षयं प्रोक्तं तत्र साहस्त्रिकं फलम् ॥

End

एवं नित्यैकादश्यादिविषयम्–

काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके हि सः ।

काम्येषूपक्रमादूर्ध्वं अन्यप्रतिनिधिं विदुः ॥

Colophon :

-- -- --

1087

Sl. No. 8367 दिवातीतकर्मप्रायश्चित्तम् Ms. No. P. 6063/11

Beginning:

अथ दिवातीतकर्मविषयः–

न ज्ञातानि प्रमादाच्चेत्प्रातः कर्माणि यानि च ।

रात्रावपि तु कार्याणि विना सौरं तु तर्पणम् ॥

End :

मध्याह्नसन्ध्यारात्रौ चेत् प्रमादात्क्रियते यदि ।

सौरस्थाने जपेत्सूक्तं सौरवैश्वानरीयकम् ॥

Colophon :

1088

Sl. No. 8368 **दीक्षाभिषेकविधिः** Ms. No. P. 2727/1

Beginning :

दीक्षाङ्गवनस्पतयः–

वर्णौषधीनां सतिलकाषायैर्मातृकामयैः ।
तत्सङ्ख्याकैश्च कलशैः अभिषिञ्चेद्गुरुं शिशोः ॥
मूर्ध्नि दीक्षोक्तविधिना सर्वज्ञस्तेन जायते ॥

End :

तदग्रेषु निधाय तदुपरि रस × × फलकुसुमयन्त्राणि निधाय अभ्यर्च्याभिमन्त्र्य अभिषिञ्चेद्गुरुः ॥

Colophon :

– – –

1089

Sl. No. 8370 **दीपविधिः** Ms. No. P. 2268/39

Beginning :

रवेरस्तं समारभ्य यावत्सूर्यो × × × त् ।
यस्य तिष्ठेद्गृहे दीपः तस्य नास्ति दरिद्रता ॥
आयुष्यं प्राङ्मुखो दीपः य × × द × × बः ।
प्रत्यङ् × × × × स्यात् धान्यादौ दक्षिणामुखः ॥

End :

ब्रह्मसिद्धान्ते–

वृश्चिके वृश्चिके लग्ने × ष्णमायाः × मे शुभे ।
दीपं दद्याद्वृषस्यांशे (?) धनधान्याभिवृद्धये ॥

Colophon :

– – –

1090

Sl. No. 8372 दीपावलीनिर्णयः Ms. No. P. 1364/61

Beginning :

भविष्योत्तरे–

आश्वीजस्य सिते पक्षे चतुर्दश्यां विधूदये ।
स्नात्वैवं तिलतैलेन नरैर्नरकर्मारुभिः ॥

End :

स्नात्वैवं तिलतैलेन नारक्यं वै नरोत्तमैः ।
मुमुक्षुभिस्सकामैश्च सर्वैरपि महामुने ॥

Colophon :

— — —

1091

Sl. No. 8377 दीपोत्सवकालनिर्णयः Ms. No. P. 4897/2

Beginning :

वैद्यानाथं महादेवं प्रणम्यानन्तशम्भुना ।
शिवागमानुसारेण कथ्यते कालनिर्णयः ॥

अथ तीर्थनक्षत्रमाल्ये मालादिनिर्णयः प्रोच्यते । मासोऽपि द्विविधः ॥

End :

अप्पाभट्टार्यतनयश्रीमदानन्तशम्भुना ।
शिवतीर्थमितिख्यातं अब्दमब्दं प्रतिप्रति ॥
आयुष्यवैभवं पुत्रपौत्रादीनां विवर्धनम् ।
राजराष्ट्रहितं सर्वभूतानां तु शिवावहम् ॥
श्रृण्वतां शिवसायुज्यमचिरेण भवेद्ध्रुवम् ॥

Colophon :

इति श्रीमदनन्तशम्भुविरचित दीपकालनिर्णयसहित दीपोत्सवकालनिर्णयस्समाप्तः ॥

1092

Sl. No. 8379 **दुर्मरणप्रायश्चित्तनिर्णयः** Ms. No. P. 1364/68

Beginning :

एतदकृतभूतविषयम् । तथा च बृहदङ्गिराः–

प्रमादाद्ध्रियते यस्तु भृग्वङ्गिरोशनादिभिः ।
तस्य पापविशुध्यर्थं कृच्छ्रषट्कं विधीयते ॥

End :

कूपैस्तटाकैः खननैः संस्पृष्टैश्च परस्त्रियाम् ।
एतैश्च मरणैश्चैव नारायणमथाव्ययम् ॥

Colophon :

इति प्रयोगदीपिकायां दुर्मरणप्रायश्चित्तम् ॥

1093

Sl. No. 8386 **दुर्मरणसंस्कारकालनिर्णयः** Ms. No. P. 5726/97

Beginning :

कामाच्चण्डालयो(?) विप्रः सर्पवैद्युतदंष्ट्रिभिः ।
निहतानां विषावन्धशस्त्रात्मत्यजामपि ॥
विधिं विनैवानशनतोयाग्निपतनैरपि(?) ॥

End :

पवित्रं चे × चरणं पवित्रमिति च त्रिभिः ।
पवित्रैः सामऋग्भिश्च यजुर्भिः अपरैरपि ॥
ब्राह्मणैस्सह भुञ्जीत दत्वा शक्त्या तु दक्षिणाम् ॥ इति ॥

Colophon :

इति दुर्मरणसंस्कारकालः ॥

1094

Sl. No. 8388 **दुर्मरणाशौचम्** Ms. No. P. 6186/6

Beginning :

दुर्मृतो वापि पित्रोर्वामाता भ्राता तथा गुरुः ।
दशाहा मातृपितृक अन्येषान्तु त्रिरात्रकम् ॥
स्वगोत्रबान्धवाद्यादि अन्याः सम्बन्धिनः तथा ॥

End :

मातापित्रोः दशाहं स्यात् अन्येषान्तु दिनत्रयम् ।
दशाहान्मातृपितरौ अन्येषां बान्धवादयः ॥
बान्धवाद्याः त्रिरात्रं स्यात् मातापित्रोः दशाहकम् ॥

Colophon :

दुर्मरणसूतकविधिः समाप्तः ॥

1095

Sl. No. 8390 **दूर्वाष्टमीनिर्णयः** Ms. No P. 5723/44

Beginning :

अथ दूर्वाष्टमी भविष्यत्पुराणे—

ब्रह्मन् भाद्रपदे मासि शुक्लाष्टम्यामुपोषितः ।
महेश्वरं यजेद्यस्तु दूर्वया सहितो मुने ॥

End :

अनङ्गत्रयोदशी रम्भा कर्तव्या सम्मुखा तिथिः ।

पद्मपुराणे—

श्रावणी दौर्गनवमी दूर्वा चैव हुताशनी ।
पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनम् ॥ इति ॥

Colophon :

1096

Sl. No. 8392 देवरपुत्रधनविचारः Ms. No. C. 1428

Beginning

पत्यपत्यविहीनाया मृतायाः विभक्तपतेः भ्रातृपुत्रस्य सपत्नीपुत्र्याश्च समवाये निर्णयः । पत्युर्भ्रातृपुत्रस्यैव धनहारित्वमुचितम् । तथाहि— त्रिंशच्छ्लोकीव्याख्यायामधिकारिनिर्णये ॥

End :

एवमेव बहुषु ग्रन्थेषु सत्त्वाच्च । तस्मान्निरपत्याया विधवाया मृताया धनं पत्युर्भ्रातृपुत्र एव हरतीति विस्तरभीतेर्विरम्यते ॥

Colophon :

इति मृताया विधवायाः सपत्नीपुत्रीभ्रातृपुत्रयोर्विवादे निर्णयः समाप्तः ॥

1097

Sl. No. 8394 देवर्षितर्पणविधिः Ms. No. P. 5726/14

Beninning :

द्विराचम्य ततो देवान् ऋषीन् ऋषिगणानपि ।
पितॄन् पितृगणांश्चैव तर्पयेदनुपूर्वशः ॥

मनुदक्षौ—

अ × × ष्ठेन सव्येन पाणिना दक्षिणेन तु ॥

End :

वैय्याघ्रपादगोत्राय साङ्कृतिप्रवराय च ।
गङ्गापुत्राय भीष्माय प्रदास्येऽहं तिलोदकम् ॥
× पुत्राय × म्ये तत जलं भीष्माय वर्मणे ॥

Colophon :

1098

Sl. No. 8396 **देशान्तरमरणविचारः** Ms. No. P 5726/96

Beginning :

अथ पुनस्संस्कारकालाः—

समाकर्णितवार्तस्य प्रोषितस्य पितुः सुतः ।
ऊर्ध्वं पञ्चदशाद्वर्षात् कृत्वा तु प्रतिपूरकम् ॥
दाहादित्वा × × × × श्राद्धकर्मणि कारयेत् ॥

End:

शवं वर्णमयं दग्ध्वा त्रिरात्रमशुचिर्भवेत् ।
अस्थिदाहे दशाहं स्यात् मातापित्रोः बिना अपि ॥

अस्थिदाहे दशाहपक्षो गृहीतः शौचिसपिण्डविषयः ॥

Colophon :

इति देशान्तरमरणविषयाणि ॥

1099

Sl. No. 8397 **देशान्तरमृतिप्रायश्चितम्** Ms. No. P. 7665/1

Beginning :

देशान्तरस्थपितृमृतौ यद्येके चोद्दिष्टान्तं पुत्रोऽन्यो वा कुर्याद्देशस्थः पुत्रः श्रुत्वा तु बपनं कृत्वा दशाहमुदकमात्रं कुर्यात् ज्येष्ठः । कृतमपि सापिण्ड्यं एकादशाहा एव पुनः कुर्यात् ॥

Edn :

पिण्डोदकदानवत्तस्य पुनः करणे बचनाभावात् न पुनरस्थिसञ्चयः । अतीते × × × × एकं पिण्डमर्पयेत् ।

श्राद्धं दद्याद्द्वितीये वा तृतीयेऽह्नि सपिण्डकम् ।
नास्थिसञ्चयनं कुर्यात् न च चर्माधिरोहणम् ॥

Colophon :

1100

Sl. No. 8398 दौहित्रकर्तृत्ववैशिष्ट्यम् Ms. No. P.4677/2

Beginning :

अत्र पुत्रादिदत्तान्तमुख्यक × × × भावे दौहित्रस्यैव माता × × × संव × × × × × × × × × न विभक्तभ्रात्रादेरित्यत्र मनुविज्ञानेश्वरवरदवरदराजीयसुधीविलोचनवैद्यनाथीयमा × × × × × × निबन्धनादिधर्मशास्त्रग्रन्थान् परिशोध्य सन्यायसञ्चारपूर्वक × × × शोध्यवचनानि लिख्यन्ते ॥

End :

पुत्री × × तस्य पुत्रत्वेन गणनातो × × × ।
× × × × × × × × पुत्र एव च ॥
पुत्रो वा भ्रातृपुत्रो वा सपिण्डीकरणं चरेत् ॥ इति ॥

अनेनापि दौहित्र × × × × × × × × त्र श्रवणात् ॥

Colophon:

— —

1101

Sl. No. 8399 दौहित्रप्रशंसा Ms. No. P. 4181/10

Beginning :

अथ दौहित्रप्रशंसामाह विज्ञानेश्वरः । तत्र श्रुतिरपि ।

शासद्वह्नि(?)दुहितुः त × × × × ज्ञात् ।
दुहितुः पुत्रसन्तानात् मुक्तिस्तस्य ऋणत्रयात ॥
तदग्रजो ह्यौरसिकसदृशो रिक्तभागभाक् ॥

End :

क्षेत्रं द्रव्यार्जितं द्रव्यं अपुत्रस्य च यद्धनम् ।
दौहित्रस्य च तत्सर्वं देयमेव न चान्यथा ॥
न स्वीकार्यो न दातव्यो प्रत्यक्षं भागमर्हतः ।
दौहित्रमौरसत्वाच्च धर्माल्लोकान्तरं तिहि (?) ॥ इति ॥

Colophon :

इति स्मृति × × णीयायां दौहित्रप्रशंसा समाप्ता ॥

1102

Sl. No. 8400 द्यूतकालनिर्णयः Ms. No. C. 696/12

Beginning :

कार्तीकशुक्लप्रतिपदि वलिपूजा, दीपोत्सवः, गोक्रीडनं, गोवर्धनपूजा, मार्गपालीबन्धनं, यष्टिकाकर्षणं, नववस्त्रादिधारणाद्युत्सवः, द्यूतं । नारीकर्तृकनीराजनं, मङ्गलमालिकाचेत्येवमादीनि कृत्यानि ॥

End :

जिगीष्वर्थनुरोधेन शलाका द्वितयं मतम् ।
समध्यमं त्रयं वापि कुर्यादाग्राङ्कसाधनम् ॥
काचादिभिर्विरचितमभ्यासार्थमतन्द्रितः ।

पूर्वोक्तस्य प्रयोगादिष्वेवोपयोगात् कौशलसाधकानां काचदार्वादिमयमिति यावत् ॥

Colophon :

-- -- --

1103

Sl. No. 8401 द्राविडाचारप्रमाणसङ्ग्रहः Ms No. A. 731

Beginning :

अष्टादशपुराणनामधेयं चाह । केशधारणवचनम्—

ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ।
तथा षष्ठं नारदीयं मार्कण्डेय च सप्तमम् ॥
आग्नेयमष्टमं चैव भविष्यं नवमं स्मृतम् ।
दशमं ब्रह्मवैवर्तं लैङ्गमेकादशं तथा ॥

End :

तदाज्ञया तत्प्रकारेणैव दासेन लिखितम् । अपचारः क्षान्तव्यः ।

निश्शेषवस्तुचयवास्तवमस्तशङ्कं
प्रपश्यतां परमसत्त्वमाश्रितानाम् ।

आचान् यतीन्द्र - - - - - गणशेखराणां

सूक्तञ्च कम्पयितुमिच्छति कः पृथिव्याम् ॥

Colophon :

-- -- --

1104

Sl. No. 8402 द्वादशवार्षिकप्रायश्चित्तम् Ms. No. P. 8331/4

Beginning :

आदौ मलापकर्षणस्नानम् । ततः परिषन्मेलनम् । दश द्वादश वा विप्राः परिषदर्थे विनियोक्तव्याः । प्राणायामः ।

निवेदयेत्तु कामोऽहं पापं परिषदे स्वयम् ।

स्नानं शरीरशुद्ध्यर्थं करिष्य इति कीर्तयन् ॥

End :

तेभ्योऽनुज्ञामनुप्राप्य प्रतिपद्य यथाशिषः ।

भोजयित्वा ततो विप्रान् भुञ्जीत सह बन्धुभिः ॥

Colophon :

इति द्वादशवार्षिकप्रायश्चित्तविधिः ॥

1105

Sl. No. 8403 द्वादशाहविधिः Ms. No P. 4654

Beginning :

द्वादशाहविषयम् । दाहकस्तु श्रद्धयेदं श्राद्धमन्तरितं द्वादशाहे एव कुर्यात् ; अनैकादशाहे तत्रशुद्ध्यभावात् ; निषेधात ; सापिण्ड्यस्य सावकाशत्वाच्च । तथा × × × × × × × ×य नमः ॥

End :

तथा षोडशाहविधिः । मृताहावेति ना र्थान्तर × × × × कार्यः ॥

आनन्त्यात् कुलधर्माणां पुंसां चैवायुषः क्षयात् ।
अस्थिरत्वाच्छरीराणां द्वादशाहः प्रशस्यते ॥

Colophon :

— — —

1106

Sl. No. 8404 | **द्वादशीपारणविधिः** | **Ms. No. P. 5723/60**

Beginning :

अथ पारणविधिः । तत्र कात्यायनः –

प्रातः स्नात्वा हरिं पूज्य उपवासं समर्पयेत् ।
अज्ञानतिमिरान्धस्य व्रतेनानेन केशव ।।
प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव ।।

End:

द्वितीया पञ्चमी वेधा दशमी च त्रयोदशी ।
चतुर्दशी चोपवासे हन्युः पूर्वोत्तरा तिथिः ।

स्कन्दपुराणे–

द्वादशी पूर्वविद्धैव निखिलेषु व्रतेषु च ॥

Colophon :

— — —

1107

Sl. No. 8407 | **द्वादशीश्राद्धनिर्णयः** | **Ms. No. P. 4212/28**

Beginning:

माता वापि पिता वापि उपरागे मृता यदि ।
तेषां कर्मसमारम्भः मोक्षान्ते स्नानमाचरेत् ॥
× पर्वणि संक्रान्तौ गजच्छायामहोदये ।
द्वादशीश्राद्धविषये कुतपो न त्वपेक्ष्यते ॥

End :

यं पिता वामनः स्त्रीणां स पुत्रः समुपास्थितः ।
अङ्गुष्ठपरिमात्रं तु गोत्रमन्योन्यमस्पृशेत् ॥
एवं न क्षयतः पिण्डान् गयाश्राद्धे महालये ।
विपरीतं तु यः कुर्यात् निराशाः पितरो गताः ॥

Colophon :

-- -- --

1108

Sl. No. 8408 द्विजत्वप्राप्तिकालनिर्णयः Ms. No. P. 7251/4

Beginning :

'असौ वसिष्ठनिर्देशात् ब्रह्मर्षित्वमविन्दत ।
यथोपनीतिसंस्कारात् द्विजन्मा ब्रह्मवर्चसम् ॥'

इत्यत्र द्विजन्मा उपनीतिसंस्कारात् ब्रह्मवर्चसं यथा विन्दते ; तद्वदविन्दत : इति पूर्वेणान्वयः इति वदन्ति । तदसत् ॥

End

जननाज्जायते शूद्रः कर्मणा जायते द्विजः । इति द्वे जन्मनी यस्येति स ततोक्तः समञ्जसत्वे ॥

Colophon :

-- -- --

1109

Sl. No. 8409 द्विजराजोदयः Ms. No. A 171

Beginning :

कालिन्दीं दलयन् महीं विवरयन् दिग्दन्तिनः कम्पयन्
नागेन्द्रं लघयन् भरेण जलधीवेलातिवृत्तिं नयन् ।
बालान् व्याकुलयन् धनानभिसमुद्धृत्य गोवर्धनं
यो वृष्टिव्यथितं गवां कुलमपासीनावतात्तावताम्(?) ।

End :

सूर्यवारे खे ग्रासः सोमे सोमग्रहस्तथा ।
चूडामणिरिति ख्यातः तत्रानन्तफलं लभेत् ॥
वारेष्वेतेषु यत्पुण्यं ग्रहणे चन्द्रसूर्ययोः ।
तत्पुण्यं कोटिगुणितं ग्रासे चूडामणौ स्मृतम् ॥ इति ॥
बाणाङ्करसभूताजिशुचौ पक्षेवलक्षके ।
पञ्चम्यां बुधवारे च निबन्धः पूर्णतामगात् ॥

Colophon :

इति श्रीमन्महीमण्डलाखण्डलश्रीचन्द्रसेनात्मज + + + + + + श्रीद्वारकादास-द्विजराजोदये कान्यकुब्जाब्जदिनमणि-शाण्डिल्यवंशमुक्तामणि-श्रीमिश्रचतुरसूनु-श्रीमिश्रदेवशर्मात्मज-श्रीमिश्रधीरेश्वरविरचितः पञ्चचत्वारिंशत्तमः प्रकाशः समाप्तः ॥

1110

Sl. No. द्विजातिनिर्णयः Ms. No. P 2937/3

Beginning :

शुक्लाम्बर + + + + + + + शान्तये ।
पुण्यक्षेत्रे कुरुक्षेत्रे समवेता महर्षयः ॥
अपृच्छन् सकलान् धर्मान् व्यासं धर्मार्थकोविदम् ।
द्विजानां जातिभेदं च देशभेदस्य लक्षणम् ॥

End :

विदित्वा सकलान् दोषान् कर्तव्यमिति निश्चिताः ।
कलिमाश्रित्य तिष्ठन्ति शिश्नोदरपरायणाः ॥
दाराचारैश्च सं ॥

Colophon:

— — —

1111

Sl. No. 8411 द्वितीयानिर्णयः Ms. No. P 5723/37

Beginning :

अथ द्वितीया–

द्वितीया यदि सम्पूर्णा न स्याच्चेत्तत्परेऽहनि ।
त्रिमुहूर्ता तु सोपोष्या इति प्राह पितामहः ॥

स्कन्दपुराणेऽपि—

पूर्वेद्युर्वसती प्रातःपरेद्युः त्रिमुहूर्तगा ॥

End :

उभयत्र प्रयोगपर्याप्तेति युग्मबाक्यनिर्णयः। एकभक्तेन मध्याह्नव्यापिनी समत्वे युग्मवाक्यात् शुक्लकृष्णादिविवेकः। नक्तव्रतमप्येवमेव ॥

Colophon :

— — —

1112

Sl. No. 8412 द्वितीयानिर्णयः Ms. No. P. 5726/28

Beginning :

अथ द्वितीया—

द्वितीया यदि सम्पूर्णा न स्याच्चेत्तु परेऽहनि।
त्रिमुहूर्ता तु सम्प्रोष्या इति प्राड पितामहः ॥

स्कन्दपुराणेऽपि—

पूर्वेद्युर्दिवसे प्रातः परेद्युस्त्रिमुहूर्तगाः ॥

End :

उभयत्र प्रयोगपर्याप्तेति युग्मबाक्यनिर्णयः। एकभक्तेन मध्याह्नव्यापिनी समत्वे युग्मवाक्यात् शुक्लकृष्णदिविवेकः। नक्तव्रतमप्येवमेव ॥

Colophon :

— — —

1113

Sl. No. 8413 द्वितीयोद्वाहकालनिर्णयः Ms. No. P. 5726/161

Beginning :

अथ द्वितीयविवाहनिमित्तानि। अत्र शातातपः—

मद्यपानप्रवृत्ता च दीर्घरोगा च या भवेत्।
प्रतानकानप × × स्त्री प्रसूः परुषभाषिणी ॥
अर्थघ्नी च पतिद्वेषी सा सती चापि चोद्वहेत् ॥

End:

शशादोक्तविधानेन होमान्तेऽग्निं स्वमात्मानि ।
आरोप्यैव चोरोभावो (?) ब्रह्मचर्यं चरे × हश ॥
एकाहमपि वा कन्यां उद्वहेदविसंज्ञितः ॥

Colophon :

इति द्वितीयोद्वाहकालः ॥

1114

Sl. No. 8415 धनुष्कोटिस्नानविधिः Ms. No. P. 9102/6

Beginning :

अशेषेत्यादि । जन्मप्रभृति एतत्क्षणपर्यन्तं मध्ये सम्भावितानां सङ्कलीकरणानां मलीकरणानां अपात्रीकरणनां जातभ्रंशकराणां प्रकीर्णानां + + सर्वेषां पापानां + + श्रीरामचन्द्र-धनुष्कोटौ षट्त्रिंशत्-स्नानानि कर्तुं + + योग्यतासिद्धिमनुग्रहाण ॥

End:

समुद्राय वयुनाय सिन्धूनां पतये नमः । नदीनां सर्वासां पित्रे जुहुता विश्वकर्मणे विश्वाहा मर्त्यं हविः । इति प्रणम्य–

पृथिव्यां यानि तीर्थानि प्रविशंस्त्वां महोदधे ।
स्नानस्य मे फलं देहि सर्वस्मात् त्राहि मां ×× ॥

Colophon :

-- -- --

1115

Sl. No. 8416 धर्मखण्डकारिकाः Ms. No. P. 8828/1

Beginning :

आदौ पिता तथा माता सापत्नीजननी ततः ।
मातामहाश्च तत्पत्न्यः आत्मपत्नी तथैव च ॥
सुतभ्रातृपितृव्याश्च तत्सुताः सपरिग्रहाः ।
महिता भगिनी चैव मातुलः श्वशुरः स्नुषाः ।

End :

तत्त्वानि विंशतिनृपा द्वादशैकादशा दश ।
अष्टाविति च गोत्राणि कुलमेकोत्तरं शतम् ॥
पिता माता च भार्या च भगिनीं दुहिता तथा ॥
पितृमातृष्वसा चैव सप्तगोत्राण्यनुक्रमात् ॥
×× ×× ×× ××

Colophon :

-- -- --

1116

Sl. No. 8417 धर्मतत्त्वम् (शूद्रधर्मतत्त्वभागः) Ms. No. C. 124

Beginning :

प्रणम्य रामं पितरौ कमलाकरशर्मणा ।
रामकृष्णतनूजेन शूद्रधर्मो निरूपयते ॥

तत्र शूद्रत्वमूढमवर्णजत्वं विप्रत्वादिवत् । यद्यपि सर्गाद्यकालीने विश्वामित्रादौ च नैतत्; तथापि तथा अदृष्टविशेषारब्धशरीरत्वमेव ब्राह्मणत्वम् ॥

End:

स्वकर्मभ्रष्टाः क्षत्रियाः वैश्याश्च सन्त्येव क्वचिदित्यसत्पितृचरणाः । × × × × ×
योऽत्र श्रमः किल कृतः कमलाकरेण
प्रीतोऽमुनाऽस्तु सुकृती बुधराजलग्नः ॥

Colonhon :

इति श्रीमज्जगद्गुरु-मीमांसक-नारायणभट्टसूरिसूनु रामकृष्णभट्टात्मज-कमलाकरभट्टकृते धर्मत्तत्वे शूद्रसमसङ्करजस्वरूपं तन्निरूपणं च । समाप्तश्चायं ग्रन्थः ॥

1117

Sl. No. 8418 धर्मतत्त्वचिन्तारत्नम् Ms. No. A. 471

Beginning :

सुरासुरेन्द्रसन्मौलिनिक्षिप्तचरणाम्बुजः ।

सन्ततमस्तु नमोऽस्मै

सिन्धुरवक्त्राय बन्धवे जगताम् ।

प्रारम्भफलविजृम्भे

यत्स्मृतिमात्रं पदमसामग्रीम् ॥

\+ + + +

तत्सूनुः तन्त्रवेदान्तव्याकृत्यादिविशेषितः ।

मल्लभट्ट इति ख्यातो धर्मतत्त्वं वदत्यसौ ॥

End :

बालवृद्धातुरैः ग्रहणयामात्पूर्वं एकं यामं त्यक्त्वा भोक्तव्यम् । स्पर्शोत्तरं सचेलं तूर्ष्णीं मज्जनं कृत्वा पश्चात्सङ्कल्पपूर्वकं स्नानश्राद्धजपहोमदेवपूजादानानि कर्तव्यानि । आशौचादौ विद्यमानेऽपि ग्रहणनिमित्तकस्नानश्राद्धादिकं कर्तव्यमेव । मुक्त्यनन्तरं च स्नानं कर्तव्यमिति ॥

Colophon ;

इति श्रीमदशेषशास्त्रपारावारपारीणेत्यादिबिरुदाङ्कित-श्रीमद्गङ्गाधर-भट्टोपाध्यायवरतनुजेन नास्तिकवादोन्मत्तदुर्वादिप्रतिमल्लेन मल्लभट्टोपाध्यायेन विरचिते धर्मतत्त्वचिन्तारत्ने प्रथमः खण्डः ॥

1118

Sl. No. 8419 **द्वैतनिर्णयः** Ms. No. A. 539

Beginning :

शुण्डादण्डविलोकनैरिव मुहुर्धाम्योरयन्तं (?) जन +++ ।

शान्तं तद्विभुमाश्रयेऽहमनयोः खेलन्तमारात्पुरः ॥ १ ॥

\+ + + + +

मीमांसाद्वैतसारज्ञो - - - - - - भट्टशङ्करः ॥ २ ॥

\+ + + + +

दक्षिणात्यमते स्थित्वा धर्मद्वैतेषु निर्णयम् ।

तनुते सोवगाद्यैव नावमान्यः कथञ्चन ॥ ८ ॥

End :

इहाविमृश्यैव बुधैर्न दूष्यं
न्यायाननालोच्य च जैमिनीयान् ।
हन्तान्यथा बोबुधता मुधैव
स्यात्क्षीरनीराविति हंसतीव (?) ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीण-मीमांसाद्वैतसाम्राज्यधुरन्धर-श्रीभट्टनारायणात्मज-भट्टशङ्करकृतौ द्वैतनिर्णये भविष्योत्तरोक्तैकमुख-दशमुख-शतमुख शतमुखात्मकचतुर्विधकोटि × × संशयोद्भेदपरिच्छेदः ॥

1119

Sl. No. 8420 धर्मनिर्णयः Ms. No. P. 942/2

Beginning :

वर्णाश्रमाणां धर्माणां व्यवस्थात्र युगे युगे ।
लीलयैव गृहीतेच्छावपुषे विष्णवे नमः ॥
यत्प्रेष्या ब्रह्मरुद्राद्या यदीयाज्ञा श्रुतिस्मृती ।
यः प्रभुर्जगतां तस्मै परस्मै हरये नमः ॥

चोदनालक्षणोऽर्थो धर्म इत्यादिना चोदनैकप्रमाणको धर्म इत्युक्तम् । व्यासः सत्यादीनां लक्षणमाह ॥

सत्यं दमस्तपश्शौचं सन्तोषो ह्रीः क्षमाऽर्जवम् ।
ज्ञानं शमो दया ध्यानमेष धर्मः सनातनः ॥

End :

आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुयुक्तोऽहि पुण्यां गतिमवाप्नुयात् ॥
वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणां च निग्रहः ।
अहिंसा गुरुसेवा च निश्श्रेयसकरं परम् ॥

Colophon :

-- -- --

1120

Sl. No. 8421 धर्मपिण्डश्लोकः Ms. No. P. 5656/38

Beginning :

असत्कुले मृता ये च गतिर्येषां न विद्यते ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥१॥
× × × × द कुले ये च गतिर्येषां न विद्यते ।
तेषामुद्ध × × × × × × × × ॥२॥

End :

पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः ।
पितुर्मातुलपुत्राश्च विज्ञेया पितृबान्धवाः ॥
तेषां – – – – – – – – – – – ॥९॥
मातुः पितृष्वसुः पुत्राः मातुर्मातृष्वसुः सुताः ।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः ॥
तेषां – – – – – – – – ॥१०॥

Colophon :

– – – – –

1121

Sl.No. 8423 धर्मप्रवृत्तिः Ms. No. P. 113

Beginning :

अथाश्वयुजप्रतिपन्नि + + ते विश्वरूपनिबन्धने नवरात्रव्रतम्–
कलशस्थाप– – – –नन्दायामाश्विने सिते ।
पूजा शक्तिभावेन चण्डिकां भक्तवत्सलाम् ॥

End :

समत्वेऽपि तथैव स्याद्ग्राह्या कुतुपकालिकी ।

कुतुपाद्या मुहूर्तास्मिन् यदाचरति भा –– – – ॥

कुतुप × × पितॄणां दत्तमक्षयम् ।
प्रारभ्य कुतुपे श्राद्धं कुर्यां × × × × ।।

Colophon :

– –– ––

1122

Sl. No. 8431 **धर्मप्रवृत्तिः** Ms. No. P. 3789

Beginning :

नारायणं नमस्कृत्य कामदां च सरस्वतीम् ।
गणनाथं गुरूंश्चापि धर्मसंरक्षणाय वै ।।
धर्मप्रवृत्तिः क्रियते कलौ नारायणेन तु ।
विदुषां कर्मनिष्ठानां सम्मता धर्मवर्धिनी ।।

End:

श्रावण्यां बलराज्ये च पात्रे तस्योदये तथा ।
तैलाभ्यङ्गो न दुष्येत संक्रान्तिग्रहणादिषु ।।
तैलाभ्यङ्गमिति प्रोक्तं मङ्गलस्नानमुच्चरेत् ।
उत्सवादिषु कर्तव्यं सर्वदा शुभकाङ्क्षिभिः ।।

Colophon :

इति नारायणविरचिते धर्मप्रवृत्तौ स्थालीपाकमङ्गलन्तु सम्पूर्णम् ।।

1123

Si. No. 8445 **धर्मप्रवृत्तीयानुक्रमणी** Ms. No. P. 8857/2

Beginning :

ಧಾತೃನಾಮಸಂವತ್ಸರದ ಆಷಾಢ ಶು ೧೦ ಚಂದ್ರವಾರ ಧರ್ಮಪ್ರವೃತ್ತಿವಿಷಯಸೂಚೀ ಬರೆಯೋದಕ್ಕೆ ನಿರಂತರಾಯೋಸ್ತು.

೧) ಗ್ರಂಥಾವತಾರ.
೨) ಮೌನ.
೩) ಮೂತ್ರಪುರೀಷೋತ್ಸರ್ಗ
೪) [illegible]

End :

೧೩೯). ಗ್ರಹಣಶ್ರಾದ್ಧ ಗ್ರಹಣೆ ನಿತ್ಯಕರ್ಮಾಧಿಕಾರ.
೧೪೦). ಮಾಹಾತ್ಮ್ಯೆ. ತೀರ್ಥವಿಧಿ.
೧೪೧). ಸೌರಾ ಅಭ್ಯಂಗ.

Colophon :

ಸಂಪೂರ್ಣಮ್.

1124

Sl. No. 8446 धर्मशास्त्रम् **Ms. No. P. 4743**

Beginning :

निजधर्मनिरूढमानसानां
स्मृतिमुक्ताफलवीक्षणेऽलसानाम् ।
शिवराममखी किलाह्निकाग्र्यः
कुरुतेऽसौ भिषगीशयज्वसूनुः ॥

End :

वेदस्य श्रुत्या प्रत्यक्षेण विधानसः वैदिकानां मयादीनां कर्मण्यं (?) गृहस्थमधिकृत्य विधानप्रत्यक्षश्रुतिमूलत्वादित्यर्थः । स एव–

यथानदीनदाः सर्वे सागरे यान्ति संस्थितिम् ।
तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम् ॥

Colophon :

इत्याह्निकः समाप्तः ॥

1125

Sl. No. 8449 धर्मसङ्ग्रहः (स्कान्दीयः) **Ms. No. B. 1018**

Beginning :

कृषिं केचित्प्रशंसन्ति सारभद्रं न मान्यते ।

यस्यां छिन्दन्ति वृषणा वृषणा चैव नास्तिकाम् ॥(?)

कर्षयन्ति महाभारान् बध्नन्ति रगुयन्ति च । (?)
बहुरंशमयान्देशान्नयन्ति बहुकर × मान् ॥ (?)

End :

ज्वलते यत्र दैत्येन्द्र तुलसीकाष्ठपावकः ।
कुरुते वीक्षणं विष्णुः सन्तुष्टः सदृशं × × ना ॥ (?)
नृहत्वा (?) तं करे शौरिः पुरुषं स्वयमग्रतः ।
मा × तस्या पापानि पश्यतां त्रिलोकसाम् ॥ (?)
महोत्सवं च कृ × × तु जयशब्दपुरस्सरम् ॥

Colophon :

स्कान्दपुराणे महेश्वरखण्डे कौमरिकाखण्डे अध्यायः द्वितीयः ॥

1126

Sl. No. 8450 धर्मसारसङ्ग्रहः Ms. No. B. 983

Beginning :

आह्निकसभा--

राजधर्मान् प्रवक्ष्यामि यथावृत्तो भवेन्नृपः ।
संभवश्च यथा तस्य सिद्धिश्च परमा यथा ॥ १ ॥
ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि ।
सर्वस्यास्य यथान्याय्यं कर्तव्यं परिरक्षणम् ॥ २ ॥

End :

चतुर्वेदसम पुण्यमस्य शास्त्रस्य धारणात् ।
भूयो वाप्यतिरिच्येत पापनिर्यातनं महत् ॥ ११६ ॥
इत्येवं मानवं शास्त्रं भृगुप्रोक्तं पठेद्द्विजः ।
भवत्याचारवान्नित्यं यथेष्टां प्राप्नुयाद्गतिम् ॥ १२७ ॥

Colophon :

इति श्रीमद्भोसलकुलतिलकश्रीमन्महाराजाधिराजतुळजमहाराजविरचिते धर्मसारसङ्ग्रहे एकान्तसभाविचारो नाम द्वादशोऽध्यायः ॥

1127

Sl. No 8451 धर्मसिन्धुः Ms. No. P. 5892/2

Beginning :

अथ धर्मसिन्धौ प्रथमपरिच्छेदः-

श्रीविठ्ठलं सुकरुणार्णवमाशुतोषं
दीनेष्टपोषमथ संहृतिसिन्धुशोषम् ।
श्रीरुक्मिणीमतिमुषं पुरुषं परं तं
वन्दे दुरन्तचरितं हृदि सञ्चरन्तम् ॥ ४ ॥

\+ + + + ×

दृष्ट्वा पूर्वनिबन्धान् निर्णयसिन्धुक्रमेण सिद्धार्थान् ।
प्रायेण मूलवचनान्युद्धृत्य लिखामि बालबोधाय ॥ ४ ॥

तत्र कालः षड्विधः- वत्सरः, अयनं, ऋतुः मासः, पक्षः, दिवस इति ॥

End:

बहुधा विहृतो ह्यग्निराबसथ्यात्कथञ्चन ।
यावदेकोऽपि तिष्ठेत तावदन्यो न मथ्यते ॥
वैश्वदेवात्तथा होमात् प्राक् ज्ञेयं नैव मन्थनम् ।
पचनाग्नावपक्त्वाहः पुनराधानमर्हति ।
आरोपितारणी चोभे ऐका ॥

Colophon :

-- -- --

1128

Sl. No. 8452 धर्मसिन्धुसारः Ms. No. P. 7574/3

Beginning:

वाय विनश्यति ।
तत्राग्न्याधेयमिच्छन्ति पुनराधेयमेव वा ॥
अथानारोपितारण्योः क्षये ग्राह्ये नवे पुनः ।

तदभावे यदोद्वायादत्र स्यात्पुनराहुतिः ॥

End :

हव्यं कव्यं तथान्नं च बर्जयेच्च सदा यतिः ।
यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च ॥
न तीर्थबासी नित्यं स्यान्नोपवासपरो यतिः ।
न चाध्ययनशीलः स्यान्न व्याख्यानपरो भवेत् ॥

ऐतदे × × द्वेवार्थभिन्नपरम् । एते संक्षेपतो यतिधर्माः ॥ + + + +

तस्यान्ताभिधानस्योपाध्यायस्य सुतः कृती ।
काशीनाथाभिधो धर्मसिन्धुसारं समातनोत् ।।

Colophon :

इति श्रीमत्काश्युपाध्यायसूरिसूनु-यज्ञेश्वरोपाध्यायानुजानन्तोपाध्यायसूरिसूनु-काशीनाथोपाध्यायविरचिते धर्मसिन्धुसारे तृतीयपरिच्छेदोत्तरार्धः समाप्तः ॥

1129

Sl. No. 8455 धर्मसिन्धुसारानुक्रमणिका Ms. No. C 3856/1

Beginning :

अथ धर्माब्धिसारे प्रथमपरिच्छेदस्य अनुक्रमणिका लिख्यते–

१. मङ्गलाचरणश्लोकाः ।
१. तत्र कालः षड्विधः ।
.१ संवत्सरः पञ्चधा ।
१. अयनं द्विविधम् ।
१. ऋतुः द्विविधः ।
१. मासाः चतुर्विधः ॥

End :

८९. पर्यङ्कशौचप्रयोगः ।
७७. आतुरसन्यासः ।
७७. मृतयतिसंस्कारः ।

Colophon :

इति अनुक्रमणिका समाप्ता ॥

1130

Sl. No. 8456 धर्माර्णवः Ms No. C. 903

Beginning :

नेवान् गुरून्नमस्कृत्य विद्वत्पीताम्बरः सुधीः ।
धर्मार्णवं करिष्यामि सर्वलोकोपकारकम् ॥
भट्टः पीताम्बरो नाम विद्वत्कश्यपसूनुना ।
धर्मार्णवस्तु क्रियते लोकानां धर्मवर्तिनाम् ॥

End:

पारम्पर्यप्रमाणेन पदवाक्यमुपेयिवान् ।
धर्मार्णवविवेकेन पीताम्बरो व्यजिज्ञिपत् ॥
+ + + + + + + ।
परम्परावृत्तिमती विधेया विज्ञप्तिरेषां विदुषां मदीया ॥
पुत्रः कश्यपविदुषो – – – नाम्ना पीताम्बरेण तु ।
क्रियते पुस्तक चेदमङ्गीकुर्वन्तु सज्जनाः ॥

Colophon :

इति श्रीमत्कश्यपात्मजसूनुपीताम्बरभट्टविरचिते धर्मार्णवे सकलधर्मशास्त्रसारः सम्पूर्णः ॥

1131

Sl. No. 8457 नक्तनिर्णयः Ms. No. P. 5723/34

Beginning :

अथ नक्तनिर्णयः । वराहपुराणे—

नक्तव्रतेषु सर्वेषु प्रदोषव्यापिनी तिथिः ।
एकादशीं विना सर्वशुक्ले कृष्णोऽपि वा समा ॥
एकादश्यान्तु यन्नक्तं उपवासादि नेतरत् ॥

End.

नक्तव्रते तु रात्रौ चेत् घटिकात्रयमुत्तमम् ।
घटिकाषट्ककालस्य मध्यमः परिकीर्तितः ॥
तथा निशीथपर्यन्तो जघन्यः काल उच्यते ॥

नक्तव्रते नक्तभोजने ॥

Colophon :

इति नक्ततिथिनिर्णयः ॥

1132

Sl. No. 8459 **नक्षत्रनिर्णयः** Ms. No. P 5723/68

Beginning :

अथ खण्डनक्षत्रनिर्णयः–

यस्मिन्नस्तमयाद्धूर्तास्तं नक्षत्रमुपोषयेत् ।
असम्भवे तु नक्षत्रं ग्राह्यं नक्षत्रनिशीथयुक् ॥
उपवासे यथार्क्षस्य तथा नक्तैकभुक्तयोः ॥

End :

अश्विनी रोहिणी ज्येष्ठा मूला हस्ता तथैव च ।
पूर्वविद्धैव कर्तव्या कृष्णपक्षे विशेषतः ॥
एताः परयुताः कार्याः शुक्लपक्षे विशेषतः ॥

Colophon :

इति नक्षत्रनिर्णयः ॥

1133

Sl. No. 8460 **नग्नप्रच्छादनविधिः** Ms. No. P. 5723/81

Beginning :

नग्नप्रच्छादनं श्राद्धं स्नानान्ते तु मृतेऽहनि ।
घटे तण्डुलसम्पूर्णे वाससा परिवेष्टिते ॥
पिधाय कांस्यपात्रेण तस्मिन्नाज्यं निरूप्य च ॥

End :

व्यासः—

वासस्तण्डुलवत्पात्रं प्रदीपं कांस्यभाजनम् ।
दहनानन्तरं दद्यात् नग्नप्रच्छादनं हि तत् ॥

सञ्चयनाङ्गपरं श्राद्धं तेनैवोक्तम् ॥

Colophon:

— .. —

1134

Sl·No 8461 **नग्नस्वरूपं** Ms. No P. 142/64

Beginning :

नग्नस्स्यान्मलिनं वस्त्रं नग्नः का × × बाह्य × × ।
स × × नग्नस्त्वार्धकटिं वस्त्रं नग्नः कौपीनवाससा ॥
अकच्छः पुच्छकच्छो वा द्विकच्छपरिवेष्टितः ।
द्विगुणं तु बहिः कच्छं दश नग्नाः प्रकीर्तिताः ॥

End :

कच्छबन्धनवेलायां वामपादस्य दक्षिणे ॥
उद्धृत्य यदि मूढात्मा रौरवं नरकं व्रजेत् ॥

Colophon :

— — —

1135

Sl. No. 8462 **नरकचतुर्दशीनिर्णयः** Ms. No. P. 5967-1

Beginning :

पौर्णमास्यां सिते पक्षे चतुर्दश्यां विधोरये ।
अलक्ष्मीपरिहारार्थं मङ्गलस्नानमाचरेत् ॥

इषेमासि–

आश्वयुक्कृष्णपक्षस्य चतुर्दश्यां विधूरयन् ।
कर्तव्यं मङ्गलस्नानं नरैः नरकभीरुभिः ॥

End :

दीपनीराजनादत्र सैषा दीपावली स्मृता ॥ इति ॥
इषे कृष्णचतुर्दश्यां इन्दुक्षयतिथावपि ॥
× × दौ स्वातिसंयुक्ते तदा दीपावली भवेत् ॥

Colophon :

— — —

1136

Sl. No. 8463 **नवकुण्डलक्षणम्** Ms. No. P. 3924/23

Beginning :

ಈಶಾನ್ಯ ಇಂದ್ರನ ವಿದಿಕ್ಕಿನಲ್ಲಿ ಸೂರ್ಯನಿಗೆ ಪಂಚಾಶ್ರಕುಂಡವಹುದು. ಆಗ್ನೇಯದಲ್ಲಿ ಚಂದನಿಗೆ ಯೋನಿಕುಂಡವಹುದು. ದಕ್ಷಿಣದಲ್ಲಿ ಅಂಗಾರಕನಿಗೆ ಅರ್ಧಚಂದ್ರಾಕಾರದ ಕುಂಡ.

End :

दाडिमं पनसं चैव ग्रहप्रीतिफलं विदुः ।

ಸಮಿತ್ತುಗಳು–

अर्कः पलाशः खदिरः अपमार्णथ (?) पिप्पली ।
उदुम्बरशमी दूर्वा कुशश्चैव समित्क्रमात् ।।

Colophon :

Extra Information :

कर्णाटकसंस्कृतोभयभाषात्मकोऽयं ग्रन्थः ! ग्रन्थेऽस्मिन्– ग्रहाणां कुण्डानि, तदाकारः, तत्तद्ग्रहप्रीतिङ्करदूर्वाक्षतासमिधादिद्रव्याणि, इत्येते विषयाः अन्याश्च ग्रहसम्बन्धिन्यः विषयाश्च सङ्कलितः ।।

1137

Sl. No. 8464 नवकोटिदेवतानिर्णयः Ms. No. P.4212/37

Beginnngi :

यातुधानाः पिशाचाश्च राक्षसाः क्रूरकर्मणः ।
वसन्ते रसमन्नस्य तस्मात् कुर्वन्तु मङ्गलम् ।।
पूर्णबोधहृदयाम्बुजकर्णिकाग्र-
देशे वसन्तमतसीकुसुमावतंसम् ।
श्रीमद्विचित्रनवरत्नविभूषिताङ्गं
भैष्मीपतिं गुणनिधिं प्रणमामि कृष्णम् ।।

End :

नथाहि– ब्रह्माद्याः गुणोपासकान्ताः सर्वेऽप्येते जीवाः पुनः त्रिविधाः अंशविभागयोग्याः तदयोग्याश्चेति ।।

Colophon :

— — —

Extra Information :

ग्रन्थान्ते–चायमधःप्रदर्शितः श्लोकः दृश्यते यथा–

त्यजेत्पर्युषितं पुष्पं × × अवालुकं जलम् ।
× × × यत्र त्रयं पर्युषितं स्मृतं ।। इति ।।

1138

Sl. No. 8465 नवमीनिर्णयः Ms. No. P. 5723/51

Beginning :

अथ नवमी– सा तु पूर्वविद्धा ग्राह्या, वसुरन्ध्रयोरिति युग्मवाक्यात् ।

अष्टमी नवमीयुक्ता नवमी चाष्टमीयुता ।
अर्धनारीश्वरीश्वरप्राया उमामाहेश्वरी तिथिः ॥ इति ॥

End :

यात्रां विवा × × क्षां कुर्यात् अष्टम्यां श्रवणेऽपि वा ।

स्कन्दपुराणेऽपि–

कुमारी पूजयत्या × दशमी पूर्वसंयुता ।
स्वल्पापि परतो ग्राह्या यदि शुद्धादिपूर्वतः ॥

Colophon ;

इति नवमीनिर्णयः ॥

1139

Sl. No. 8467 **नवरात्रनिर्णयः** Ms. No. P. 4124/38

Beginning :

अथ आश्वीजशुक्लप्रतिपन्निर्णीयते । विश्वरूपनिबन्धे–

कलशस्थापनं कुर्यात् नदायामाश्विने सिते ।
पूजयेद्भक्तिभावेन चण्डिकां भक्तिमान्नरः ॥

End :

देवीमुद्दिश्य कर्तव्यं देव्याः पूजादिकं च यत् ।
न त्यजेत्पूजनं देव्याः कारयेदग्निहोत्रवत् ॥

Colophon :

-- -- --

1140

Sl. No. 8.70 **नवश्राद्धविधिः** Ms. No. P. 5723/80

Beginning :

अथ नवश्राद्धानि– अत्र तावत न संज्ञकमन्तर्दशाहक्रियमाणानां सर्वसंज्ञामिति निवेशयेत् । आश्वलायने दशाहपर्यन्तानां नवश्राद्धकालो गम्यते ॥

End :

अत्र नागरखण्डे विशेषः अभिहितः–

नवसप्तविंशा राज्ञां नवश्राद्धान्यनुक्रमात् ।

आहन्तयोः वर्णयोस्तु षडित्याहुर्महर्षयः ॥

Colophon :

– –– ––

1141

Sl. No. 8473 नान्दीनिर्णयः Ms. No. P 4180/2

Beginning :

अथ नान्दीनिर्णयः–

जीवमानेपि पितरि नान्दीश्राद्धं कथं भवेत् ।

येभ्य एव पिता दद्यात्तेभ्यो दद्यात्तु पुत्रकः ॥

मातृश्राद्धं पूर्वं स्यात्पितॄणां तदनन्तरम् ।

ततो मातामहादीनां नान्दीश्राद्धं त्रयं स्मृतम् ॥

End :

वापीकूपतटाकजातविधिबयात्रासु दाने महापुंसेषु व्रतचूडाकर्मणि । शुक्रे ज्येव प्रकशिते विगते चेद्दोषो न च त्वत्र × × (?) च बाथां (?) कूपत (!) कपूर्ति विधिवच्छान्ति करोति बुधः ॥

Colophon :

– –– ––

1142

Sl. No. 8475 नान्दीश्राद्धविधिः (वृद्धिश्राद्धम्) Ms. No. P.5726/122

Beginning :

अथ वृद्धिश्राद्धम् । अथातोऽभ्युदयश्राद्धमहं वक्ष्यामि शौनकः–

समन्त्रणं × × णां कुर्यात्पूर्वेद्युरेव हि ॥

गृहे न (?) जनजाते तु भूते पुण्याहवाचनम् ॥

End :

भोजनार्थानिमाद्राय (?) पाणौ मग्नमथापिवा ॥
अग्नये कव्यवाहाय सोमायेत्येकैकमाहुतिम् ॥
यथेष्टं भोजयेद्विप्रान् × × × × ।
× × न भोजनसं × × × त्वा तान् श्रावयेद्विप्रान् ॥

Colophon:

— — —

1143

Sl. No. 8476 नान्दीविवेचनम् Ms. No. C 1129

Beginning :

श्रीमत्कण्वपुरीवासिगोपालं गोभिरीडितम् ।
नत्वा श्रीरङ्गनाथाख्यः श्रीनिवासतनूद्भवः ॥१॥
विवाहादिषु नान्द्याश्च विधिं सम्यग्विविच्य च ।
परिशिष्टं दर्पणं च पारिजातं विशेषतः ॥२॥

End :

दशत्रयोदशदिनं नान्दीस्थापनमुच्यते ।
लग्नान्तरं पुनः कार्यं मासादूर्ध्वं न कारयेत् ॥

मासादूर्ध्वं पुनर्नान्दी स्थापनं न कुर्यादित्यर्थः ॥

Colophon :

-- -- --

Extra Information

श्रीरङ्गपत्तनस्थेन रङ्गनाथेन धीमता ।
नान्दीविवेचनं ग्रन्थ लिखित्वा सर्वतुष्टये ॥
लोकोपकारसिध्यर्थं समीपे जगदीशितुः ॥

इति सार्धैकश्लोकः ग्रन्थान्ते दृश्यते ॥

1044

Sl. No. 8477 **नागचतुर्थीनिर्णयः** Ms. No. P. 4848/5

Beginning

स्मृतिनिर्णये नागचतुर्थीनिर्णयः–

एकादशी तथा षष्ठी अमावास्या चतुर्थिका ।
उपोष्याः परसंग्रका – – – – पूर्वेण सन्तः ॥ (?)

स्मृतिसंग्रहेपि–

चतुर्थी परेष्यगणनाधव्रतस्य × × × × तु ।
विना ××ते ग्र × × × × प्रकीर्तिता ॥

End :

श्रावणे पञ्चमीशुक्ला सा प्रोक्ता नागपञ्चमी ।
तां परित्यज्य पञ्चम्याः चतुर्थी सहिता जिता ॥

इति सङ्ग्रहोक्तेः दिनद्वये मध्याह्नव्यासौ पूर्वैर्वा परदिने मध्याह्नादूर्ध्वं परा ॥

Colophon :

— — —

1145

Sl. No. 84 3 **नागपञ्चमीनिर्णयः** Ms. No. P. 1364/6

Beninning :

ज्योतिः–

षष्ठी युक्ता यदा कार्या पञ्चमी नागपूजने ।
चतुर्थ्यां न कदा चैव कर्तव्या न कदाचन ॥

End :

षष्ठीयुतायां पञ्चम्यां श्रावणस्य सिते तथा ।
पूजयेत्पन्नगान् मृण्मया × × हितादिभिः ॥

Colophon :

— — —

1146

Sl. No. 8481 **नानाजातिनिर्णयः** Ms. No. P. 5256/1

Beginning :

नानाजातिनिर्णयः–

भगवन् सर्वशास्त्रार्थपरिज्ञानवतां वर ।
जातिनिर्णयमस्माकं वद वेदैकदर्शितम् ॥

सूतः–

वक्ष्ये लोकोपकाराय जातिनिर्णयमादरात् ।
अगस्त्योऽपि पुराऽपृच्छत् प्रणम्य वृषवाहनम् ॥

End :

इत्याकर्ण्य मुनीश्वराः श्रुतिमतं सूतोपदिष्टं परं
सत्यानन्दसुखप्रकाशपरमं ब्रह्मात्मविज्ञानदम् ।
पीत्वा जातिविनिर्णयं सकललोकाम्भोधिपारं सदा
सत्यास्तेयदयार्जवादिसहिताः तुष्टा बभूवुः भृशम् ॥

Colophon :

इति श्रीस्कान्दे सूतसंहितायां शिबमाहात्म्यखण्डे द्वादशोऽध्यायः ॥

1147

Sl. No. 8482 **नामकरणनिर्णयः** Ms. No. P. 742/43

Beginning :

× × द्रेह्नि द्व × × × द्वाविंशे षोडशे दिने ।
जन्मर्क्षे जन्मदिवसे द्वात्रिंशेह्नि गते दिने ॥
कुर्वीत नामकरणं × × × × × × × ॥

End :

वेद × × त्राणि कर × × पादपादार्धं घटिका भवेत् ।
प × × विनया रसयुतया परमेष्ठि × × × × × नया भक्ता ।
गुणिगुणितं गुणमान × × × × प्राक्प्र × × द्रुतागता नाड्यः ॥

Colophon :

— — —

1148

Sl. No. 8487 नारायणबलिविधिः Ms. No. P. 7145/2

Beginning :

अथ नारायणवलिविधिरुच्यते । अथ चमर्याः—

नारायणबलिः कार्यः लोकगर्हाभयान्नरैः ।
तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीन्मनुः ॥

End :

देवगृहे नदीतीरे वाऽग्निमुखसमाधायायेत्यादि + + + + श्रीधरीये—

द्वादश्यां श्रवणे वाऽपि पञ्चम्यां पर्वणोरपि ।
प × × × × × ×॥

Colophon :

-- -- --

1149

Sl. No. 8489 नारायणसारसङ्ग्रहः Ms. No. C 435/6

Beginning :

श्रुतिस्मृतीतिहासपुराणागमयुक्तिसिद्ध-शङ्खचक्रोर्ध्वपुण्ड्रादिधारणं परमवैदिकधर्मः; इति वेदविदां सम्प्रदायः + + + + ।

'धर्मं जिज्ञासमानानां प्रमाणं प्रथमं श्रुतिः ।'

इत्युक्तप्रकारेण तत्रादौ श्रुतयो विलिख्यन्ते ॥

End:

अहिंसा सत्यवचनं सर्वभूतानुकम्पिता ।
दमो दानं यथाशक्ति गार्हस्थ्यो धर्म उच्यते ॥
स्वधर्मकर्मार्जितजीविताना
स्वकेषु दारेषु सदा रतानाम् ।

जितेन्द्रियाणामतिथिप्रियाणां
गृहेऽपि मोक्षः पुरुषोत्तमानाम् ॥

Colonhon :

इति श्रीनारायणसारसङ्ग्रहः समाप्तः ॥

1150

Sl. No. 8493 **नित्यकर्मविधिः** (मराठीसंस्कृतभाषामिश्रा) Ms No. C. 1454

Beginning :

अथ नित्यकृत्यं लिख्यते–

प्रातः कालनुठिमालायज्ञोपवीतसम्भारिदर्शनकरियै । मालादास्य धर्म है । जने उको अधिकार न होय तौ मालामात्रको सम्भौरपीछे श्रीमदाचार्यमहाप्रभुको श्रीगुसाँईजीको श्रीनीसातों-स्वरूपको स्वगुरूको सरणपूर्वकनामले इदं डवतकरियै ॥

End:

भगवान् षें जु ऐश्वर्यसंपन्नहो इकें रक्षकहें । अरुभगवदीयभक्तिमानहेम् । तवक-छुचिंतातरहीं । भगवाम् भक्तिभक्तिमान् ॥

Colophon :

इति औसेचितस्छिरराखिसे वाकथासरणकैरम् ॥ इति श्रीद्वारकेशस्य कृतिः ॥

1151

Sl. No. 8495 **नित्यग्रन्थः** Ms. No. P. 2380/33

Beginning :

अथ परमैकान्तिनः भगवदाराधनप्रयोगं वक्ष्ये । भगवत्कैङ्कर्यैकरतिः परमैकान्ती भूत्वा श्रीभगवानेव स्वशेषभूतं मां स्वकीयैरेव कल्याणगुणतमैः + + + + + + स्वात्मानं प्रीतं कारयितुं उपक्रमते ; इत्यनुसन्धाय + + यागभूमिं गच्छेत् ॥

End:

तस्मिन् काले तु मां देवि मत्कृतं वारयेदघम् ।
स्वं सर्वतुष्यः स्वामिन् ततः किं करवाण्यहम् ॥

त्वत्प्रीतये त्वयैवाहं त्वदीयैर्मन्त्रसाधनैः ॥

त्वत्प्रसादेन युक्तः सन् करिष्ये कर्म तावकम् ॥

Colophon :

इति श्रीभगवद्रामानुजविरचिते भगवदाराधनविधिः सम्पूर्णः ॥

1152

Sl. No. 8498 नित्यग्रन्थव्याख्या Ms. No. P. 9182/11

Beginning

ब्राह्मे मुहूर्ते उत्थाय हरिर्हरिरिति सप्त जलेन श्रोत्रेण वाऽऽचम्य ग्राहग्रस्ते गजेन्द्रे स्वति + + + ओं वसुरण्यो विभूरसि ॥

End :

श्रीमते परवासुदेवाय नमः ॥
ओं वासुदेवाय नमः ॥
ओं संकर्षणाय नमः ॥
ओं प्रद्युम्नाय नमः ॥
ओं अनिरुद्धाय नमः ॥

Colophon :

— — —

1153

Sl. No. 8499 नित्यनैमित्तिकक्रियानिर्देशनिर्णयः Ms. No. P. 2584/8

Beninning :

सगोत्रं योजयेच्छ्राद्धे सगोत्रं यज्ञकर्मणि ।
दानं दद्यात्सगोत्राय कन्यादानं तु वर्जयेत् ॥
चित्रान्नेन बलिं दद्यात् रात्रौ श्राद्धमकर्मणि ।
आवाहनं च सौरं च ग्रहयज्ञे च वर्जयेत् ॥

End :

तीर्थोदकानि सर्वाणि सर्वकुम्भेषु निक्षिपेत् ।
वापीकूपतटाकेषु नदीप्रस्रवणेषु च ॥
सर्वतीर्थानि तुल्यानि जलान्यायययत्ततः ।
चतुष्कोणेषु कुम्भेषु पूरयित्वा यथाविधि ॥

Colophon

— — —

Extra Information :

सगोत्रयोजनविचारः, श्राद्धपाकविचारः, नित्यनैमित्तिकयोः, नित्यपरिमर्जनविचारः, गर्भिणीपतिदीक्षाविचारः, कर्मनैष्फल्यकारणविचारः, देवपितृमातृगणाधिपपूजानुक्रमविचारः, वृध्याद्याशौचानन्तरकर्तव्यशौचक्रमविचारः, पुंसवनमारभ्य आधानान्तकर्मकर्तव्यदानविचारः, नान्दीश्राद्धविचारः, गृहप्रवेशादिषु कर्तव्यस्य कुम्भपूजादेः विधिः इत्येते अंशाः ग्रन्थेऽस्मिन् सङ्कलिताः ॥

1154

Sl. No. 8502 नित्यनैमित्तिकतर्पणविधिः Ms No. P. 7913/27

Beginning :

पितृपक्षे व्यतीपाते सङ्क्रान्तौ तीर्थपर्वसु ।
निषिद्धेऽपि तिथौ वारे कर्तव्यं तिलतर्पणम् ॥

End :

हुङ्कारे तु भवेत्प्रेतः शिरःकम्पी तु वायसः ।
पात्रत्यागी भवेदन्धः अमौनी नरकं व्रजेत् ॥

Colophon :

— — —

1155

Sl. No. 8503 नित्यमन्त्रानुष्ठानदीपिका Ms. No. P. 970

Beginning :

यत्प्रसादेन वेदार्थो हस्तामलकतां गतः ।
नमामि शठजिद्योगिचरणाम्बुरुहं हि तत ॥
आपोहिष्ठादिमन्त्राणां व्याख्यास्सन्ति सहस्रशः ।
तदन्तरार्थानुसारेण व्याख्येयं क्रियते मया ॥

End :

इतिवदुत्तरोत्तरं तव प्रीतिवर्धकास्त्वदिच्छानुविधायिनस्त्वत्स्वरूपगुणविभूत्यनुभवैकरास भवेमेत्यर्थः ।

षष्टिप्रबन्धनिर्माता शठकोपमुनीशितुः ।
दासो नारायणमुनिः नित्यमन्त्रानुदञ्चयत् ॥

Colophon :

— — —

1156

Sl. No. 8504 नित्यविधिनिर्णयः Ms. No. P. 4953/2

Beginning :

× × × × × ×
स्वभावाद्यत्र विचरेत्कृष्णसारस्वतो मृगः ।
धर्मदेशः स विज्ञेयः द्विजानां धर्मसाधनः ॥ +
+ + ब्राह्मे मुहूर्ते चोथाय चिन्तयेदात्मनो हितम ।
गुरुं विष्णुं नमस्कृत्य मातापित्रोस्तथैव च ॥

End :

घाचिको वैश्वदेवाग्निरित्येतैरग्निरर्चनम् । (?)
इतरेषां व्रतानां तृ समुद्भव इतीष्यते ॥
+ + +
वास्तुश्राद्धे सपिण्डानां अन्ते पुण्याहवाचनम् ।
सङ्कल्प ×× नान्दी ××× पुण्याहभाक् ×× तु ॥

Colophon :

— — —

1157

Sl. No. 8505 नित्यश्राद्धविधिः Ms. No. P. 2584/4

Beginning :

कुर्या × × × × कश्राद्धात्सङ्कल्पविधिनान्वहम् ।
नित्यश्राद्धमदैवं स्यात् दक्षिणापिण्डवर्जितम् ॥

End :

पाणि × × × षान्नं पिण्डहीनं करोति यः ।
उच्छिष्टं तद्भवेदन्नं दानाच्च नरकं व्रजेत् ॥

Colophon :

— — —

1158

Sl. No. 8508 **नित्यानुसन्धेयविषयः** (संस्कृतान्ध्रमयः) **Ms. No. P. 6449**

Beginning :

కాలాకాలమునాండుకాలం మునాండూ × × × జిత్సిం × × × × ముని యుడా ఆ × × × × × ధ్యాస × రామాడ్కి × × రఘువరమునునా చిన్నల్లు పేద్దల్లః బుద్ధివించినా ॥

End :

गुरुमन्त्रपरित्यागे रौरवं नरकं प्रजेत् ।
ఇంతను మంత్రోపదేశమ్మైనందుకు ఫలము ।
अष्टाक्षरश्च मन्त्रस्य स्मरणे × मुक्तिदो हरेः ।
तद्वर्तना यथानित्यं मन्त्रपाठेन उच्यते ॥

Colophon :

— — —

1159

Sl. No. 8509 **नित्यार्चनविधिः** **Ms. No. P.2380/35**

Beginnngi :

पुंसे परस्मै लक्ष्म्यै च नमस्नबकिनां स्तुतिम् ।
कुर्महेङ्क्रियालब्धसंस्काराब्धितितिर्षया ॥
पूर्वाचार्यान् नमस्तोमैः अर्चयेद्भक्तिभावितैः ।
यत्पादभक्तिर्वैकुण्ठपदप्राप्त्यधिरोहिणी ॥

End :

विष्णोर्निवेदितं सर्वं पश्चात भुञ्जीत तत्स्वयम् ।।
कृतं श्रीभट्टकार्येण क्रियादीपः समुज्ज्वलः ।।
प्रेक्षध्वं पुण्डरीकाक्षपरिचर्यापरायणाः ।।

Colophon :

– –– ––

1160

Sl. No. 8510 नित्यस्नानसङ्कल्पः Ms. No. P. 5108/27

Beginning :

श्रीगोविन्द गोबिन्द विष्णोराज्ञया प्रवर्धमानस्य आद्यब्रह्मणः द्वितीयपरार्धे श्वेतबराह-कल्पे वैवस्वतमन्वन्तरे कलियुगे प्रथमपादे ।।

End :

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु ।।
तुङ्गभद्राकृष्णवेण्यां गौतमीस्नान करिष्ये ।।

Colophon :

– –– —

1161

Sl. No. 8511 नित्याह्निकविधिः Ms. No. B.918/4

Beginning :

शिवगङ्गास्नानं करिष्ये– अतिक्रूर + + + + + महंसि ।
इति भागीरथीप्रोक्ता पिङ्गळा यमुना स्मृता ।
तयोर्मध्यगता नाडी सुषुम्नाख्या सरस्वती ।।
ध्यानह्रदे ध्यानजले रागद्वेषमलापहे ।
यस्स्नाति मानसे तीर्थे स याति परमां गतिम् ।।

End :

सर्वान् पितृभिस्तर्पयामि । सर्वपितृगणाभिस्तर्पयामि (?) । सर्वपितृपत्नीस्तर्पयामि । सर्वपितृगणपत्नीस्तर्पयामि । आचम्य ब्रह्मार्पणमस्तु ; शिवार्पणमस्तु ॥

Colophon :

— — —

Extra Information :

मन्त्रस्नानविधिमारभ्य– भूतिधारणविधिः, मन्त्रजपविधिक्रमः, स्त्रीणां मन्त्रजपक्रमः, सन्ध्यावन्दनं, ब्रह्मयज्ञविधानं, इत्येते विषया ग्रन्थेऽस्मिन् उपपादिताः ॥

1162

Sl. No. 8512 **निबन्धसङ्ग्रहः** Ms. No P 62/4

Beginning :

द्विमुण्डनन्तु सम्प्राप्ते यदि युग्मं कथं भवेत् ।
उपनये तु विध्युक्तं चौलकर्मणि मन्त्रवित् ॥
गायत्र्या सर्वकर्माणि आज्य × × × वै गुरुः ।
तद्धृतं प्राशयेन्मूकं पश्चात्तन्त्रं समाचरेत् ॥

End :

ॐ अदितेऽनुमन्यस्व । अनुमतेऽनुमन्यस्व । सारस्वतेऽनुमन्यस्व । वामनश्च प्रसीदति देवसवितः प्रसुवेत्यादिना नलं बर्हिर्भिः सकलैः सार्धं परिषिञ्चेत् । प्रदक्षिणामिति देवसवितरिति यजुः ॥

Colophon :

— — —

Extra Information :

ग्रन्थेऽस्मिन् उपाकर्मादिकर्मणां निर्णयः सङ्गृहीतः ॥

1163

Sl. No. 8531 नानानिबन्धसङ्ग्रहः Ms. No. C. 1130

Beginning :

श्रीरङ्ग × × × देवं गणनाथं सरस्वतीम् ।
कुर्वे विवाहकाले तु प्रतिकू × × सिद्धये ॥
× × × मरण × × × ×कृते × तः ।
× × × × सम्प्राप्तौ × वाद्यात्यन्तरे तथा ॥

End :

श्रीरङ्ग ×कृत श्री × × × × या ।
रङ्गनाथाख्यविदुषा सङ्गृहीतो य × × × × ॥
× × × × × × प्रीतौ श्रीशैलपदाम्बुजे ।
× × × × × र्थं नानाग्रन्थोत्थसङ्ग्रहम् ॥

Colophon :

इति श्रीरङ्गनाथ × × × + रङ्गशास्त्रिणा + + + नानानिबन्धसङ्ग्रहः समाप्तः ॥

1164

Sl. No. 8532 निर्णयबिन्दुः Ms. No. 2705

Beginning :

सकलनिबन्धनं नुत्सा (?) तिथिनिर्णयः प्रस्तूयते । तिथिर्द्वेधा– संपूर्णा खण्डा च । संपूर्णायामसन्देहः । अखण्डा दिनद्वयसम्बन्धिनी तत्र प्रतिपद्युक्ता ॥

End :

'आभाता सिनपक्षेषु मैत्रश्रवणरेवती । वियोने पारणं कुर्यात् ;' इत्यादि वचनात् । अथ शिबरात्रिः । निशीथव्यापिन्येव निशीथद्वयेऽपि व्याप्तौ तूत्तरैव इति ॥

Colophon :

इति माधवदेवसूनुना अनन्तदेवेन विरचितो निर्णयबिन्दुः समाप्तः ॥

1165

Sl. No. 8533 **कालनिर्णयमाला** Ms. No. C. 1028

Beginning :

प्रणम्य पाण्डुरङ्गं तं पुण्डरीकह्रदे स्थितम् ।
पण्डितानां सुबोधाय वर्णये कालनिर्णयम् ॥
श्रीवत्सान्वयजातेन गुम्फिता रुक्मसूनुना ।
निर्णयानामियं माला विद्वत्कण्ठे विराजताम् ॥

End :

पुत्रकन्याजनौ नित्यं नादीश्राद्धं समाचरेत् ; इति ।

एतानि सर्वाण्यपि निमित्तानि । एषु नान्दीमुखान्पूजयेत् ।

\+ \+ \+ \+

असिर्विशनः खड्गःतीक्ष्णधारो दुरासदः ।
श्रीधर्मो विजयश्चैव धर्मपालस्तथैव च ॥
श्रीवत्सान्वयधूर्तस्य विदुषामग्रेसरस्याश्रितं
ध्वांसध्वंसपटीयसो भगवतो रुक्माङ्गदस्यात्मजः ।
कृष्णस्तन्मुखताधिगत्य विधिवच्छास्त्राणि सम्प्रेरितः
सख्या त्र्यम्वकशर्मणा व्यरचयच्छ्राद्धानुगां प्रक्रिया ॥

Colophon :

इति नान्दीश्राद्धनिर्णयः ।

इति श्रीविद्वत्कुलतिलकमुकुटमणिश्रीरुक्मसूरिसूनुविरचितायां निर्णयमालायां श्राद्धानुगा प्रक्रिया समाप्ता ॥

1166

Sl. No. 8534 **निर्णयरत्नम्** Ms No. B 219

Beginning :

लक्ष्मीनारायणं नत्वा गुरून् निर्णयरत्नकम् ।
करिष्ये धर्मशास्त्रेभ्यः मन्दभूसुरतुष्टये ॥ १ ॥

तत्र कालः षोढा– दिवसः, पक्षः, मासः, ऋतुः, अयनं, अब्द इति ॥

End :

शतं सहस्रमथवा सर्वदोषनिबर्हणम् ।
शिवालये प्रपद्याद्वै दीपदोषोपशान्तये ।। ११ ।।

Colophon :

इति श्रीमच्छलारिनरसिंहाचार्याणां निजशिष्येण शेषेण विरचिते श्रीमन्निर्णयरत्ने द्वितीयपरिच्छेदः समाप्तः ।।

1167

Sl. No. 8536 निर्णयसारः Ms. No. C. 2349

Beginning :

त्रिविधातपतप्तानां शरणं करुणं महः ।
गोपालाख्यं स्वतः प्रख्यं विश्वधाम नामा तत् (?) ।। १ ।।

अथ निर्णयसारो लिख्यते– तत्रादौ कालनिर्णयः । तत्र कालः, अब्दः, अयनं, ऋतुः, मासः, पक्षः, दिवसः इति षोढा ।।

End :

एकादशाहे चन्द्रं पुनः संस्कारश्चेति प्रायश्चित्तकाण्डे हेमाद्रिः । 'दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुक् द्विजः;' इति उशनसो वचनम्, असुकृप्रायश्चित्तमिति विज्ञानेश्वरः । चण्डालादिभिः मारितानां दुर्मरणमृतानां ।।

Colophon

– – –

1168

Sl. No 8547 निर्णयसिन्धुः Ms. No. C. 100

Beginning :

कारुण्यैकनिकेतं रामं सीतालतायुक्तम् ।
विश्वामित्रान्वयाय व्रतति (?) समालम्बिशाखिनं वन्दे ।। १ ।।

हेमाद्रिमाधवमते प्रविचार्य सम्यक्
आलोच्य तत्त्वमथतीर्थकृतां परेषाम् ।
श्रीरामकृष्णतनयः कमलाकराख्यः
काले यथामति विनिर्णयमातनोति ॥ ७ ॥ +++

तत्र संक्षेपतः कालः षोढा ॥

End :

तद्विधिरन्यश्च विशेषः प्रागुक्तः इत्यलं बहुना ।

एवं निरूपितमिदं गहनन्तु धर्म-
तत्त्वं विचार्य वचनैश्च नयैश्च सम्यक् ।
तद्दोषदृष्टिमपहाय विवेचनीय
विद्वद्भिरित्यविरतं प्रणतोस्मि तेषु ॥ १ ॥

+ + +

जगति सकलविद्यां सिन्धुमुष्टिन्धयानां + + + × × × ।
+ + + + + यदि भवति विदग्धैः तद्धयवश्यं विमृश्यम् ॥ ७ ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीण-श्रीमद्रामेश्वरभट्टसूरिसूनु नारायणभट्टसुत-विद्वन्मुकुट-हीराङ्कुरश्रीरामकृष्णभट्टात्मज-कमलाकरभट्टकृते निर्णयसिन्धौ तृतीयः परिच्छेदः समाप्तः । समाप्तश्चायं निबन्धः ॥

1169

Sl. No. 8561 निर्णयसिन्धुविषयानुक्रमणिका Ms. No. C 4070/1

Beginning :

अथ प्रथमपरिच्छेदः—

१. अब्दनिर्णयः ।

२. अब्दभेदः ।

३. अयननिणय: ।

३. ऋतुनिर्णयः ।

३. मासनिर्णयः ।

३. सङ्क्रान्तिनिर्णयः ।

३. सङ्क्रान्तिदानानि ।।

End :

२४१. यतिसंस्कारः ।

२४२. मूर्धानं शङ्खेन भेदयेत् ।

२४२. कुटीचस्य दाहः ।

२४२. तस्य विधिमाह ।

२४२. हंसपरमहंसानां ।

२४२. क्रियापि नास्ति ।

२४२. त्रिदण्डिनां द्वादशेऽहनि नारायणबलिः इत्युक्तम् ।।

Colophon :

इति तृतीयपरिच्छेदानुक्रमणिका समाप्ता ।।

1170

Sl. No. 8563 **निर्णयसिन्धुसङ्ग्रहः** Ms. No. P. 4555

Beginning :

ನಿರ್ಣಯಸಿಂಧುಸಂಗ್ರಹಗ್ರಂಥ ಬರೆಯುವುದಕ್ಕೆ ನಿರ್ವಿಘ್ನಮಸ್ತು-

तत्र संक्षेपतः कालः × × × × इति। तत्र × × माधवमते पञ्चधा- श्रवणः, सौरः, चान्द्रः, नक्षत्रः, बार्हस्पत्य इति । गुरोर्मध्यमराशिभागेन बार्हस्पत्यः ।।

End:

ज्योतिषो विवादमध्ये पितरौ मृता च
कपार्तिकं वै विधिना विधिक्रिया ।
सद्यः समाप्ये विधिवद्यथाक्रमः
सपिण्डनं × × × × × ।।

Colophon :

इति श्रीकमलाकरभट्टकृतौ निर्णयसि – – – पक्षतिथि-नक्तएकादशीग्रहणव्रता × मास निर्णयः समाप्तः ॥

1171

Sl. No. 8564 निश्चयाम्बुधिः Ms. No. P. 2584/9

Beginning :

पश्चिमादिशि माव × × कालौ च राक्षसौ ।
उत्तरां दिशमाश्रित्य मधुमन्थौ च राक्षसौ ॥
तेषां निर × × सनार्थाय चतुर्दिक्षु परिस्तृता ।
+ + + + + + + +
+ + + + + + पाषाणे व्याधिसम्भवः ।
धरण्यां दुःखमाप्नोति दौर्भाग्यं दारुकासने ।
यशोहानिः पलवेनित्तविवितमं (?) – – – – ।
– – – – – – – – – कुशासने सर्वसिद्धिकम् ॥

End:

× × × न्धार्थेऽस्मिन् प्रकृतिकामिर्णात्यादिसर्वप्रायश्चित्तान्ते पूर्णाहुतिं हुत्वा उत्तर-परिषेचनादिब्रह्मविसर्जनान्तं कुर्यात् ॥

Colophon :

-- — --

Extra Information :

ग्रन्थेऽस्मिन्- हिरण्यदानविधिः, आसनविधिः, पाकविषयः, वैवाहिकविषयः, गृहिणी-धर्माः, श्राद्धविचारः इत्येते विषयाः विवृताः ॥

1172

Sl. No. 8565 निषिद्धान्नशाकनिर्णयः Ms. No. P. 1364/24

Beginning :

ब्रह्मौदने तथा च × × × सीमन्ते प्रथमार्तवे ,
मासिके च तथा कृच्छ्रे नैव भोजनमाचरेत् ॥

Edn :

कृष्णकाळिङ्गबिल्वोदुम्बरमिस्सटान् ।
एतानि सेवते यस्तु तस्य दूरतरो हरिः ॥

Colophon :

— — —

1173

Sl. No. 8566 **निष्क्रमणविधिः** **Ms. No. P. 5726/136**

Beginning :

अथ निष्क्रमणम्–

स × रोहन्तु कर्तव्यं दशमे द्वादशेऽहनि ।
न प्र × नाथवा × नापराह्णे न मध्यमे ॥
पूर्वाह्णे पूर्वरात्रौ वा माता वा स्त्रीजनैस्सह ॥

End

चतुर्थे मासि कर्तव्यं चन्द्रस्यैव तु जन्मतः ।

शङ्खः–

चतुर्थे मासि कर्तव्यं बालस्यादित्यदर्शनम् ।
चतुर्थे मासि कर्तव्यं शिशोः चन्द्रस्य दर्शनम् ॥

Colophon :

— — —

1174

Sl. No. 8571 **नैवेद्यसमर्पणविधिः** **Ms. No. P. 4001/26**

Beginning :

देवस्य दक्षिणहस्ते अमृतोपस्तरणमसीति आपोशनं दद्यात् । तुलसीदलं गृहीत्वा प्राणाय स्वाहेत्यादिपञ्चमन्त्रानुदीरयेत् । मधुवाता ऋतेत्यादि वैदिकमन्त्रांश्च जपित्वा + + + निवेदयेत् ॥

End :

प्रत्यक्षलवणैर्योगात् अपक्वं यस्तु भुञ्जते ।
पक्वे तु कामठं भुक्त्वा रौरवं नरकं व्रजेत् ॥
सगुणं नारिकेलन्तु प्रत्यक्षलवणं तथा ।
राजमाषं महामाषं भुक्त्वा चान्द्रायणं चरेत् ॥

Colophon :

-- -- --

1175

Sl. No. 8574 पञ्चकालक्रियादीपः Ms. No. P. 1294/1

Beginning :

वन्दे जगद्गुरुं श्रीशं यस्य चाज्ञा श्रुतिस्स्मृतिः ।
यस्य लीलाजगज्जन्मस्थितिसंहरणादयः ॥ + + +
शतक्रतुचतुर्वेदिश्रीनिवासार्यदेशिकः ।
पञ्चकालक्रियादीपं कुरुते विदुषां मुदे ॥

End :

ततो यावन्निद्रा समभ्येति तावन्मनसा नारायणमनुस्मरेत् ; निद्रान्तरेऽपि प्रवुद्धस्सन् भगवद्गुणानुवर्णनं कुर्यात् ॥

Colophon :

इति श्रीमद्रामानुजसिद्धान्तस्थापनाचार्य-शतक्रतुचतुर्वेदि-श्रीनिवासाचार्यविरचिते पञ्चकाल-क्रियादीपे योगनिरूपणाख्यः पञ्चमः परिच्छेदः । + इति पञ्चकालक्रियादीपस्सम्पूर्णः ॥

Extra Information :

ग्रन्थसमाप्त्यनन्तरमयमधःप्रदर्शितो भागस्ताले दृश्यते—

अनेकस्मृतिविज्ञेयकृत्याकृत्यप्रकाशकः ।
पञ्चकालक्रियादीपः ज्ञानध्वान्तनिरोधकः ॥
शतक्रतुचतुर्वेदिश्रीनिवासार्यनिर्मितः ।
सन्ततस्समीक्ष्य सन्तोषं प्राप्नुवन्तु विमत्सराः ॥

1176

Sl. No. 8575 पञ्चगव्यविधिः Ms.No.P. 2422/5

Beginning :

देवलः–

ज्ञानाज्ञानादिकं सर्वं प्रायश्चित्तं परं गुरो ।

प्राशनं पञ्चगव्यानां को विधिः किं क्रिया पृथक् ॥

सनत्कुमारः–

शृणु वत्स प्रवक्ष्यामि पञ्चगव्याशनक्रमम् ।

पञ्चगव्यप्राशनं स्यात् महापातकनाशनम ॥

End :

प्रणवेनोत्थाप्य, उपस्थाय, होमात् पूर्वमेव भगवते निवेदयेत् । शरीरशुद्ध्यर्थं पञ्चगव्य-प्राशनं करिष्ये ; इति सङ्कल्प्य, यत्त्वगस्थीति मन्त्रमुच्चार्य तदङ्ग गायत्रीजपं यथाशक्ति कुर्यात् ॥

Colophon ;

— — —

1177

Sl. No. 8579 पञ्चदशीनिर्णयः Ms. No. P. 5726/63

Beginning :

अथ पञ्चदशीनिर्णय –

एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी ।

अमावास्या तृतीया च ता उपोष्याः परान्विताः ॥

पुराणेऽपि–

पौर्णमास्या तु कर्तव्या सप्तमीतिथिवन्नरैः ॥

अमावास्या तु कर्तव्या भूतयुक्ता सदा बुधैः ॥

\+ + + + + + +

पौर्णमासी महाराज पुराणे निश्चये गते ॥

End :

पूर्वविद्धैव सावित्रीव्रते पञ्चदशीतिथिः । + +

व्रतान्तराणि × × × परेऽहन्येव सर्वदा ॥

वह्निपुराणेऽपि–

परेह्नि सङ्गवादूर्ध्वं पूर्णिमामाव्रतान्तरे ।

पूर्वविद्धा सदा ग्राह्या पूर्णिमामाव × व्रते ॥

Colophon :

इति पञ्चदशीनिर्णयः ॥

1178

Sl. No. 8 80 पञ्चमसप्तमसापिण्ड्यनिर्णयः Ms. No. P. 4181/17

Beginning :

अथ पञ्चमसप्तमयोः सापिण्ड्यं वर्ण्यते– पिण्डेन सह वर्तत इति सपिण्डः । सपिण्डस्येदं सापिण्ड्यम् । तद्द्विविधम्– सगोत्रे चान्यगोत्रे च ॥

End :

कन्याद्वयं न चैकस्य दद्याद्भ्रात्रोः न च द्वयम् ।

द्विमङ्गलं नैकगृहे कुर्यादेव युगोद्भवौ ॥

युगोद्भवौ– यमलसम्भवौ ।

भिन्नोदरजयोर्दद्यात् कन्यायुग्मं शुभप्रदम् ।

एकोदरजयोर्वापि दद्यादित्याह कश्यपः ॥

Colophon :

– – –

1179

Sl. No 8582 पञ्चमहायज्ञनिर्णयः Ms. No P. 3374/21

Beginning :

अथ पञ्चमहायज्ञान् येन केनापि द्रव्येण वा वैश्वदेवान्प्रागेवान्नमुद्धृत्य, तदन्नं चतुर्धा विभज्य करोति । श्री परमेश्वरप्रीत्यर्थं पञ्चमहायज्ञैः यक्ष्ये । विद्युदसि इति अप उपस्पृष्ट्वा

+ + + + + देवयज्ञेन यक्ष्ये ।।

End :

नमो ब्रह्मण इति त्रिरनूच्य वृष्टिरसीत्यप उपस्पृश्य (?) अतिथिमभ्यागतं वा × × कांक्षे-दागोदोहनकालमघमपोह्य बन्धुवर्गेण सह भुञ्जीयात् ॥

Colophon :

— — —

1180

Sl. No. 8586 पञ्चमीनिर्णयः Ms. No. P. 5723/40

Beginning :

अथ पञ्चमी–

प्रतिपत्सम्मुखा कार्या या भवेदपराह्णिकी ।
पूर्वाह्णिकीति सा कार्या द्वितीया तादृशी विभो ॥

हारीतोऽपि–

चतुर्थीसहिता कार्या षष्ठ्या चैव न संयुता ॥

End :

तत्र पूर्वेद्युरेव मध्याह्नव्यापित्वं ; न पूर्वेद्युः । तत्र मध्याह्नव्यापिन्यां पञ्चम्यां एकभक्तव्रतं कार्यम् । उभयत्र व्यापित्वे युग्मवाक्यात् शुक्लकृष्णादिव्यवस्थायाः निर्णयः ॥

Colophon :

— — —

1181

Sl. No. 8589 पञ्चविंशतिसंस्काराः Ms. No. P. 4402/5

Beginning:

कर्मणां वक्ष्यमाणानामयं तावदनुक्रमः ।
पुण्याहवाचनविधिरङ्कुरार्पणकर्म च ॥
अथो पितृभ्योऽभ्युदयश्राद्धं कौतुकबन्धनम् ।
विधिरग्निमुखस्यापि विधिग्रह × × स्य च ॥

Edn :

विधिराग्रयणश्चापि तदा प्रत्यवरोहणम् ।
पार्वणं चाष्टकेत्यादि वक्ष्यते चात्र तत्त्वतः ॥

इति संस्काराः ।

पञ्चविंशतिसंस्कारैः संस्कृता ये द्विजातयः ।
ते पवित्राश्च योग्याः स्युः श्राद्धादिषु सुयन्त्रिताः ॥

Colophon :

इति संस्काराः ॥

1182

Sl. No. 8590 पञ्चसंस्कारनिर्णयः Ms. No. P. 3132/3

Beginning :

वसन्ते दीक्षयेद्विप्रान् ग्रीष्मे राजन्यमेव च ।
शरदस्समये वैश्यं हेमन्ते शूद्रमेव च ॥
स्त्रियं च वार्षिके काले दीक्षयेत यथाविधि ॥
मन्त्रारम्भः चैत्रमासे बहुदुःखफलप्रदः ॥

End

वीरान्मानो रुद्रभामितोऽवधीर्हविष्मन्तो नमसा विधेम ते ।

यस्य स्मृत्या च नामोक्त्या तपोहोमक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन ।
यद्धुतं तु मया देव परिपूर्णं तदस्तु मे ॥
प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥

Colophon :

-- -- --

1183

Sl. No. 8593 पञ्चसंस्कारसङ्ग्रहः Ms. No. C. 1272

Beginning :

साधुचातकमेघाय वेदपङ्कजभानवे ।
बोधचम्पकभूषाय वेदव्यासाय ते नमः ॥
अगण्यसगुणाम्भोधिदोषगन्धविवर्जितम् ।
मुमुक्षुसेव्यं श्रीरङ्गपतिं नौमि रमाश्रयम् ॥
\+ + + + + + + +
श्रुतिस्मृतिपुराणादीन् समालोच्य यथामति ।
पञ्चसंस्कारविषये सङ्ग्रहः क्रियते मया ॥

End :

× × × × × × × ×
× × × × रङ्गपतितीर्थाख्येन सद्वृत्तिना ।
× × × × × × ×
श्रीमद्विट्ठलसन्निधौ विरचितं श्रीमत्पञ्चसंस्कारसङ्ग्रहम् ॥ (?)
× × × × × × ×
यः पठति शृणोति सकलस्मृत्युक्तमार्गानुगम् ।
भक्त्या तत्कथितक्रियाश्च कुरुते यो वै लिखत्यादरात्
तस्मै श्रीरमणस्तनोति विमला आनन्दसत्सन्ततिम् ॥

Colophon :

इति श्रीवैष्णवधर्मशास्त्रे पञ्चसंस्कारसङ्ग्रहे यागसंस्कारः समाप्तः ॥

Extra Information :

वाणिवालकुलोत्पन्नकृष्णाचार्यसुधीसुतः ।
वेङ्कटोपपदकृष्णः पञ्चसंस्कारसङ्ग्रहम् ॥
अलिखत् + + + + हृदब्जगः ।
सच्चिदानन्द + + + + कृतामरः ॥

इति ग्रन्थान्ते दृश्यते ॥

1184

Sl. No. 8594 पञ्चसंस्काररत्नमाला Ms. No. P. 2550/2

Beginning :

× × × × थ सङ्कल्प्य प्राणायामपुरस्सरम् ।
कलशो निध्यसिध्यर्थं (?) यज्ञो देवस्य इत्यथ ॥
गृणीता स्थापनान्ते तु कृत्वा तत्र प्रतिष्ठितम् ।
देवमावाह्य तद्वह्नौ चतुर्थ्यन्ते यज्ञे व्रतम् ॥ (?)

End :

परमं वैदिकं शास्त्रमेतद्वैष्णवमुत्तमम् ।
ज्ञात्वैव परमैकान्ती पूजयेद्विष्णुमादरात् ॥
य इदं शृणुयाद्भक्त्या नित्यं विष्णोश्च सन्निधौ ।
अश्वमेधसहस्रस्य फलं प्राप्नोत्यसंशयः ॥

\+ + + + + + + +

रत्नैरद्भुतदीधितिप्रणिहितान्तर्ध्वान्तसन्दोहकै-
स्तापाद्यैः रचितां हि रङ्गपतितीर्थाख्येन सद्वृत्तिना ।
श्रीमद्व्यासयतीन्द्रशिष्यमुनिना मालां गले बिभ्रति
श्रीनारायणकिङ्करो हरिवशीकाररक्षमार्हो भुवि ॥

श्रीमद्विठ्ठलसन्निधौ विरचितां श्रीपञ्चसंस्कारस-
न्मालां यः पठते शृणोति सकलां स्मृत्युक्तमार्गानुगाम् ।
भक्त्या तत्कथितक्रियाश्च कुरुते यो वै लिखत्यादरात्
तस्मै श्रीरमणस्तनोति विमलामानन्दसत्सन्ततिम् ॥

Colophon :

-- -- --

1185

Sl. No. 8597 पक्षोदरविवाहनिर्णयः Ms. No. P. 4181/19

Beginning :

कल्पकारिकायां पक्षोदरविवाह उक्तः–

नैकस्य कन्याद्वयदानमिष्टं कन्यायुगं भ्रातृयुजोः न दद्यात् ।
एकस्य युग्भ्यां च गुणादिसत्त्वे दद्याद्वधू चास्य विभिन्नकाले ॥

End:

कूटस्थाच्च चतुर्थिकां यदि पुमान् न्चातुर्थिकस्तूद्वहेत्
××× षष्ठगतां तृतीयपुरुषः तार्तीयगां पञ्चमीम् ।
उद्वाह्या अपि पञ्चमः शुभकरः सर्वे मुनीनां मतं
धात्री भिन्नकरे गृहीततनये सम्बन्धदोषो न हि ॥

Colophon :

-- -- -

1186

Sl. No. 8601 परमहंसलक्षणम् Ms. No. P. 6052/8

Beginning :

शिखा यज्ञोपवीतं च त्यक्त्वा सर्वपरिग्रहान् ।
यः समः सर्वभूतेषु परमहंसः स उच्यते ॥१॥
दण्डमेकं वहन्नित्यं ज्ञानध्यानपरायणम् ।
अद्वैतनिरतो नित्यं सङ्गकोधविवर्जितम् ॥२॥

End:

सर्वेषणाविनिर्मुक्तः स भैक्षं भोक्तुमर्हति ॥ ४ ॥
एकपीठं जगत्सर्वं एकमाकाशमालयम् ।
ईश्वरस्य गृहं विश्वं कुतः सीमावलङ्घनम् ॥ ५ ॥

Colophon :

-- -- --

1187

Sl·No· 8607 **पर्यङ्कशौचविधिः** Ms· No· C· 199/4

Beginning :

अथ पर्यङ्कशौचविधिः—

वामेऽभ्यागतपादाभ्यां स्वहस्तार्धं च दक्षिणे ।
मृद्द्विभागं विभज्याथ गरुडासनमासितः ॥ १ ॥
पादयोश्च मृदः पञ्च ततः × × × एव च ।
द्वे चैकं च मृदं दद्याज्जानुजङ्घादितः क्रमात् ॥ २ ॥

End :

तृतीये पञ्च तिस्रश्च तिस्रो द्वे च चतुर्थके ॥३॥
द्वेचैकं च मृदं दद्याच्छौचे पर्यङ्कशब्दिते ॥

Colophon :

इति पर्यङ्कशौचविधिः ॥

1188

Sl· No· 8609 **पर्वनिर्णयः** Ms. No· P· 5723/73

Beginning :

अथ पर्वनिर्णयः । तत्र मत्स्यपुराणम्—

अमावास्योनतां ऋक्षे यदा चन्द्रदिवाकरौ ।
एषां पञ्चदशी रात्रिः अमावास्या ततः स्मृता ॥

End :

कात्यायनोऽपि विशेषमाह—

गायत्र्यन्वाधानयोर्मध्ये ग्रहणं चन्द्रसूर्ययोः ।
नवो नवो यमादित्याः चित्रमुदुत्यमुद्वयम् ॥
यथा लिङ्गश्रुवेणैव हुत्वाज्येनेष्टिमाचरेत् ॥

Colophon:

इति पर्वनिर्णयः ॥

1189

Sl. No. 8611 **पर्ववर्ज्यविचारनिर्णयः** Ms. No P. 2584/6

Beginning :

उष्णोदकं तथा तैलं दिवास्वापं च सङ्गमम् ।
वर्जनीयाः प्रयत्नेन दशम्यादिदिनत्रये ॥
अन्नपान च ताम्बूलं सङ्गमं केशनाशनम् ।
दन्तधावन-नखच्छेद-तारमध्वान्नदर्पणम् ॥

End :

स्कान्दे–

एकादश्यां खगाधीश न भोक्तव्यं सुराधिप ।
द्वादश्यां तत्र होतव्यं अन्यथा नरकं व्रजेत् ॥

\+ + + + + + + +

स्कान्दे–

न होतव्यं न होतव्यं एकादश्यां कदाचन ।
जुहुयाद्यदि मूढात्मा रौरवं नरकं व्रजेत् ॥

Colophon :

— — —

1190

Sl. No. 8613 **पवित्रविधिः** Ms. No. P. 742/69

Beginning :

अपवित्रकरे जप्तं दत्तं भुक्तं हुतं तपः ।
राक्षसाः प्रतिगृह्णन्ति न तृप्तिः पितृदेवताः (?) ॥

End :

शोकमोहभयग्रस्ता चिरं शोचन्त्यबुद्धयः ।
महान्त ×× महाराजा क्षणं ×× ति वा न वा ॥

इति इतिहाससमुच्चये चोक्तम् ॥

Colophon

— — —

1191

Sl. No. 8618 **पाकयज्ञनिर्णयः** Ms. No. P. 4311/9

Beginning :

अथ प्रसङ्गात् अनाहिताग्नेः पिण्डपितृयज्ञ उच्यते– पिण्डैस्साध्यः पिण्डपितृयज्ञः । अदृष्टचन्द्रायां प्रतिपद्यपराह्ण एव यदि पूर्वेद्युः चन्द्रदर्शने सत्युत्तरेद्युः पूर्वाह्णे पर्वसन्धौ तदपराह्ण एव च । प्रयोगः ॥

End :

कृष्णाजिनमुलूखलं मुसलं शूर्पमाज्यस्थालीं चरुस्थालीं मृण्मयपात्रं दर्वीं तृणं च वृष्टिरसि + पानाम् । अप उपस्पृश्य । अपः पिण्डानभ्यवहारे ब्रह्मणि वा प्राशयेत् ; सन्तिष्ठते पिण्डपितृयज्ञ इत्यलं भूयसा ॥

Colophon :

इति श्रीपौराणिकधर्मभट्टसूनुश्रीमद्द्विजन्यकूटमाणिक्योमाशङ्करभट्टचन्द्रचूडकृतः पाकयज्ञनिर्णयः समाप्तिमगमत् ॥

1192

Sl. No. 8622 **पाकयज्ञनिर्णयः** Ms. No. P.4181/22

Beginning :

नारायणभट्टीये–

आदिमध्यावसानेषु पाकयज्ञादिकर्मसु ।
तत्कर्तुरभिवृध्यर्थं त्रैविद्यैः सद्द्विजोत्तमाः ॥
आशिषं वाचयेयुस्ते वेदोक्तैः मण्डलैः पृथक् ।
चौलोपनयनाद्येषु विवाहे च विशेषतः ॥

End :

तद्दिने वापि कर्तव्यं दम्पत्योरभिवृद्धये ।
नाश्रीः कदाचिदाप्नोति भद्रमेव सदा तयोः ॥

यथेष्टं भोगमाप्नोति देवतानां प्रसादतः ।
ततः समाप्य विधिवत दम्मती तु मुदा नयेत् ।।

Colophon :

इति नारायणभट्टीये पाकेन विधिः ॥

1193

Sl. No. 8624 पाञ्चकालिककर्मक्रमः Ms. No. P. 5712/1

Beginning :

अथ परमैकान्तिनां पाञ्चकालिकानुष्ठानक्रमं वक्ष्ये । ब्राह्मे मुहूर्ते हरिः हरिः हरिः इति सप्तकृत्वोक्त्वोत्थाय पुनः हरिर्हरिर्हरिरिरिति त्रिरुच्चार्य पादौ प्रक्षल्य प्राङ्मुखः स्थित्वा + + +

ग्राहग्रस्ते करीन्द्रे रुदति सरभसं तार्क्ष्यमारुह्य धावन्
अघूर्ण माल्यभूपान्ननपरिकरो मेघगम्भीरघोषः ।
आबिभ्राणो रथाङ्गं शरमसिमभयं शार्ङ्गचापौ सखेटौ
हस्तैः कौमोदकीमप्यवतु हरिरसावंहसां संहतेर्नः ॥

End:

अणुरहं सर्वदैककारणभूतस्य सर्वरक्षकस्य सर्वशेषिणः श्री × × × पतेस्तवैव अनन्या हि निरुपाधिकशेषभूतोऽहम् ; इति शेषत्वानुसन्धानरूपं योगं कुर्वन्, क्षीरसागर + नम इति स्मरन् शयनेऽङ्गपरिवर्तनसमये मध्ये मध्ये शेषत्वानुसन्धानयोगं कुर्वन् शयित्वा पुनर्ब्राह्ममुहूर्ते उत्तिष्ठेत् ॥

Colophon :

— — —

1194

Sl. No. 8625 पञ्चकालिकपद्धतिः Ms. No. P. 2098

Beginning :

श्रियः पतिं भजेमाचार्यरूपधरमहर्निशम् ।
सन्तो दीपाः प्रपन्ने ... पदैर्क्कर्य ...कृतादराः ।।

अज्ञाननिग्रहा × × सहधर्मचरीं श्रियम् ।
नमामि सर्वजगतां जननीं करुणामयीम् ॥
\+ + +
त्रयीशिखरसूरीन्द्रसम्प्रदर्शितया दिशा ।
प्रदर्श्यते × × नां पाञ्चकालिकपद्धतिः ॥

End:

सङ्कीर्तनेन यागस्वाध्याययोगफलं भवति ॥
जयन्तु गुरवोऽस्माकं जयन्तु भगवत्प्रियाः ।
जयन्तु भगवद्धर्माः जयतु श्रीनिकेतनः ॥
यत्र भागवता नित्यं पञ्चकालपरायणाः ।
निवसन्ति सदा युक्ताः तत्क्षेत्रं नैमिशाद्वरम् ॥

Colonhon :

इति पञ्चकालपद्धतौ प्रथमः परिच्छेदः ॥

1195

Sl. No. 8627 **पारणविधिः** Ms. No. P. 5723/72

Beginning :

अथ पारणविधिः—

विद्धासु परया तिथ्या तिथिष्वासु यथाविधि ।
उपवासैकभक्तानि कुर्यात्प्रातश्च पारणम् ॥
पूर्वतिथ्यासु बिद्धासु तिथ्यन्ते पारणं विदुः ॥

End :

तिथ्यन्ते पारणं यामत्रयादर्वाक्समापयेत् ।
अन्यथा पारणं प्रातरन्यतिथ्युपवासिनः ॥
नक्षत्रोपवासे उपवासनक्षत्रान्ते पारणं कुर्यात् ॥

Colophon :

इति पारणकालः ॥

1196

Sl. No. 8628 **पाषाणश्राद्धविधिः** Ms. No. P. 2273/1a

Beninning :

मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनाऽङ्गिराः ।
यमापस्तम्बसौवर्ताः कात्यायनबृहस्पती ॥
पराशरव्यासशङ्खाः लिखितो दक्षगौतमौ ।
शातातपो वसिष्ठश्च स्मृतिकर्तार ईरिताः ॥ + + +
अतः परं प्रवक्ष्यामि पाषाणश्राद्धनिर्णयम् ॥

End:
तथा च स्मृतिः –

सत्क्रियां देशकालौ चाशौचं ब्राह्मणसम्पदम् ।
पञ्चैतान् विस्तरो हन्ति तस्मात्तं परिवर्जयेत् ॥

अत्रापि विस्तरवर्जनम्– अनिमन्त्रितद्विजविषयमिति मन्तव्यम् ॥

Colophon :

इति पाषाणश्राद्धस्वरूपप्रकरणं समाप्तम् ॥

1197

Sl. No. 8629 **पपाणोत्थापननिर्णयः** Ms. No. P. 5726/105

Beginning

त्रींस्त्रीन् धर्मोदकान्ते तु ततः कर्ता जलाशये ।
क्षिपेद्दशाहपाषाणं अरण्ये वा चतुष्पथे ॥
तैलेन तिलपिष्टेन धात्री कल्केन मङ्गलैः ॥

End :

आशौचाद्विप्रमुच्यन्ते ब्राह्मणैः स्वस्तिवाचनैः ।
गृहपाकं समश्नीयुः क्षारमादि यथेप्सितम् ॥
आरोहेयेयुश्च खट्वादीन् सह स्त्रीभिः यथेच्छया ॥

Colophon :

इति पापाणोत्थापनकालः ॥

1198

Sl. No. 8635 **पिण्डदाननिर्णयः** Ms. No. P. 8777/16

Beginning :

पितृवंशे मृता ये च गतिर्येषां न विद्यते ।
आवाहयिष्ये तान् सर्वान् कुशपुष्पैस्तिलोदकैः ॥
पितृवंशे मृता याश्च गतिर्यासां न विद्यते ।
आवाहयिष्ये ताः सर्वाः कुशपुष्पैस्तिलोदकैः ॥

End :

तातामबात्रितयं सपत्निजननी मातामहानां त्रयं
सस्त्रीस्त्रीतनयादितातजननीस्वभ्रातृकाः स्वास्त्रियः।
ताताचात्मभगिन्यपत्यधवयुज्जाया पिता सद्गुरुः
शिष्याप्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे ॥

Colophon :

-- -- --

1199

Sl.No. 8636 **पितृक्रियाधिकारिनिर्णयः** Ms. No. P. 742/65

Beginning :

इष्टं श्राद्धे क ××× क्षा सङ्कीर्त्या वैश्वदैविके ।
नान्दीमुखे सत्यवसुकाम्ये दुरि × × चकाः ॥

End :

पक्षत्रिपक्षके चैव आदिमध्यादिपञ्चसु ।
पितृमातामहश्चैव जामाता भगिनीत्रयम् ॥
श्वशुराश्चेति विज्ञेया सप्तगोत्राः प्रकीर्तिताः ।
एवं विंशतिविंशत्या षोड × × श्च चतुर्दश ।
द्वादशी च दशाष्टौ च कुलमेकोत्तरं गतम् ॥

Colophon :

-- -- --

1200

Sl. No. 8640 पितृमेधकारिका Ms. No. P. 6769/6

Beginning :

ते ।

कारिकास्तत्र लिख्यन्ते प्रायशः स्मृति ×× दिताः ।
सङ्गृह्य स्फुरणार्थाय नव्याः क्वचिदुदीरिताः ॥

+ + सङ्ग्रहात्प्रतिपाद्यते–

उदोद्घातश्च सङ्कीर्णं परिभाषा च कर्तृता ।
अग्निसन्धिर्दुर्मृतादिनिवेशो – – – – – ॥
पितृमेधब्रह्ममेधावन्तर्वत्न्यादिसस्क्रिया ।
ततो दशाहकृत्यं स्यादेकाहश्चेति पूर्वतः ॥

End :

त्रिवर्षात्प्राग्विवाहेऽपि मरणं याति कन्यका ।
निखनेद्वा क्षिपेद्वापि पुनस्संस्कारमर्हति ॥

Colophon :

-- -- --

Extra Information :

ग्रन्थेऽस्मिन्– उपोद्घातः, तिथिवारविचारः, स्वसूत्रालाभकर्तव्यं, दाहकर्तारः, अग्निविवेकः विच्छिन्नाग्निसन्धानक्रमः, रजस्वलासूतिकाविषयेऽग्निसन्धानक्रमः, दुर्मृतिप्रायश्चित्तं, अकालमृति-प्रायश्चित्तं, पर्युषितप्रायश्चित्तं, उपनयनात्पूर्वं मृतस्य दहनादिविचारः, शिशुसंस्कारविवेकः इतीमे विषया वर्णिताः ।

1201

Sl. No. 8641 पितृमेधसङ्ग्रहः Ms. No. P .8423/6

Beginnngi :

अथ समन्त्रसंस्कारः । मुमूर्षोर्मन्त्रेण स्नापनमथ दानश्रुतिः–

जपो मृते दुःखव्यक्तिस्नपनविधिचूर्णादिकरणं
अनुशानिङ्कलधोज्वलनशयनं प्रतहवनम् ।

तथाङ्गुष्ठासन्दीपनवसादानविषय:

चरुर्वाहोद्योगो ह्यतिविहितमन्त्राग्निहरणम् ॥

End :

इत्यग्निमुपस्थाय श्मशानानवलोकिनः ।

गत्वा जलाशयं कुर्युः भातुरव्यञ्जनं ततः ॥

स्नानमुक्तक्रमात्कुर्युः ते तु धाता पुनात्विति ॥

Colophon :

इति प्रथमदिनक्रमः । इति पितृमेधः ॥

1202

Sl. No. 8648 **पितृमेधसारः** Ms. No. P. 8597/3

Beginning :

अथावभृथेष्टिं व्याख्यास्यामः—

तत्र देहः परमं हविः पुरुषाहुतिर्ह्यस्य प्रियतमेति नयते ॥

End :

श्राद्धविघ्ने द्विजातीनां आमश्राद्धं प्रकीर्तितम् ।

अमावास्यादिनियतं माससंवत्सराद्दते ॥

इति हारीतः ; इति हारीतः ।

Colophon :

— — —

1203

Sl. No. 8656 **पितृमेधसारव्याख्या** Ms. No. P. 8507/4

Beginning :

× × × कंकानर्थधरैरवध्यैः

आराध्यते यज्ञविधार्थकृत्यैः ॥

पु × × × × समस्ताश्ममुदे

समस्तोत्तमः परस्तादुपते नमस्तात् ।

शिष्टानुशिष्टः पितृमेधसारः प्रश्न + + + + +
+ + + + + कर्ता तथा वैदिकसार्वभौमः।
+ + + + + +
+ + + प्रश्नं तद्व्याकरवाणि + + + + ॥

End :

श्राद्धविघ्ने द्विजातीनां आमश्राद्धं प्रकीर्तितम् ।
अमावास्यादिनियतं मासि संवत्सरादृते ॥

इति हारीतः × × × ख्यानमेतत् द्विरुक्तिः प्रश्नसमाप्तिं द्योतयति ॥

Colophon :

पञ्चदशः खण्डस्समाप्तः ।

इति हारीतकुलतिलकस्य × × × वैदिकसार्वभौमस्य कृतिषु पितृमेध × × × श्नव्याख्यानं समाप्तम् ॥

+ + + + + + + + + ।
साटोद्धारमितस्ततः + + + वैदिकसार्वभौमः ॥

1204

Sl. No. 8659 पुण्ड्रधारणचषकनिर्णयः Ms. No.B 780/4

Beginning :

कृत्वा करण्डं बिल्वस्य फलं पक्वं मनोहरम् ।
हारिद्रं पूरयेच्चूर्णं लक्ष्मीरूपमनुत्तमम् ॥
फलादन्यत्र बिल्वस्य यश्चूर्णं पूरयेद्द्विजः ॥
अवैष्णवः सविज्ञेयः तं कुप्यति हरिप्रिया ॥

End :

नालिकेरस्य भागेन कमठाकृतिना बुधः ।
द्विनेत्रैव कुर्वीत पात्रं वै पुण्ड्रधारणे ॥

आदाय लेखयेच्चारु कृत्वा कूर्माकृतिं नरः ।।
दिग्गजानथ शेषं वा तस्योपरि यथाक्रमम् ॥

Colophon :

समाप्तोऽयं ग्रन्थः ॥

1205

Sl. No. 8662 **पुण्यकालनिर्णयः** Ms. No. P. 4925/9

Beginning :

अमवास्या तु सोमेन सप्तमी भानुना सह ।
चतुर्थी भानुपुत्रेण सोमपुत्रेण चाष्टमी ॥

End:

चतस्रस्तिथयस्त्वेताः सूर्यग्रहणसन्निभाः ।

इति स्मृतिरत्नाकरे । तत्रैव व्यासः—

स्नास्यतो ह्यरुणः कान्तिं जुह्वतोऽग्निः श्रियं हरेत् ।
भुञ्जतोमृत्युराप्यं (?) तस्मान्मौनं चरेत्त्रिषु ॥

Colophon :

— —

1206

Sl. No. 8667 **भर्तृहीनस्त्रीपुंसवनविधिः** Ms. No. P. 6297/49

Beginning :

अद्य गर्भे तु सम्प्राप्ते पश्चाद्भर्ता मृतो यदि ।
तिलोदकं च गृह्णाति दशाहं तु विधीयते ॥
स्मृत्युक्तकाले कर्तव्या सीमन्तोन्नयनक्रिया ।
तद्वत् पुंसवनं चैव उक्तकाले तथैव च ॥

End :

हिरण्यवर्णाः शुचयः पावकाः, इति चतसृभिः पवमानस्सुवर्जन इत्येतेनानुवाकेन मार्ज-यित्वाभिषेचयेत् । एवमेव पुंसवनमिति ॥

Colophon:

इति भर्तृहीनस्त्रीपुंसवनं समाप्तम् ॥

1207

Sl. No. 8669 पुत्रदाननिर्णयः Ms. No. P 8539/3

Beginning :

दत्तपुत्रत्वस्थापकवचनानि–

ब्राह्मणाना × × × × × कर्तव्यः पुत्रसङ्ग्रहः ।
तदभावे सगोत्रे वा न चान्यत्र तु कारयेत् ॥

End :

शास्त्रान्तरस्य ज्येष्ठभ्रात्रादावपि संभवेनास्मदिष्टसिद्धेः । द्वितीयपक्षे उक्तवचन × × × × × त्वविधायित्वेन दानसिद्ध्यभावेन देय ॥

Colophon :

— — –

1208

Sl. No. 8687 पुत्रस्वीकारविधिः Ms. No. C. 1421

Beginning :

मानव-आत्रेय-विज्ञानेश्वर-चन्द्रिका-कालादर्श-कालनिर्णयादिस्मृतिकर्तृभिः × × विचा-× × पु × × × स्वीकरणमारभ्य शौचान्तं यथावन्निरूपणाद्विदुषां सुखबोधार्थं अनेक-स्मृतिपर्यालोचनवता शिष्टपरम्परानुष्ठानदर्शितमथो यथामति पुत्रस्वीकारविधिर्निरूप्यते ॥

End :

अग्निर्होत्रा ग्रहपतिस्त राजा इत्यत्र ग्रहपतय इति तस्मिन् दाक्षायणीयेष्टौ च दीक्षा-मस्मै – – – – – – तथा ग्रहतावेवाद्य सुत्यामित्यालेखन इति । तस्मात् उपदेशमात्रानु-सारिभिरवश्यं ऊहनीयम् ॥

Colophon :

इति श्रीरामचन्द्रविरचितः पुत्रस्वीकारनिर्णयस्समाप्तः ॥

1209

Sl. No 8690 पुत्रस्वीकारविधिः Ms. No. P. 2681/3

Beginning :

भिन्नोदरे च दत्ते च पितृव्यतनये तथा ।
दाराग्निहोत्रसंयोगे न दोषः परिवेदने ॥

अस्यार्थः– मातृपुत्रयोः परिवेत्त्रादिदोषो नास्ति । तथा दत्त × × जनककुले ज्येष्ठ-भ्रातृसत्वे दत्तके विवाहादौ परिवेत्त्रादिकं नास्ति ॥

End :

पुत्रं प्रतिग्रहीष्यन् बन्धूनाहूय राजनि चात्रेध स्व × मध्ये × व्याहृति × × "अदूर-बान्धवं संनिकृष्टमेव गृह्णीयात् ;" इति वसिष्ठेनोक्तः । अदूरबान्धवमित्यनेन अत्यन्तदेशभाषा-विप्रकृष्टस्य प्रतिषेधः ॥

Colophon :

-- -- -- .

1210

Sl. No. 8693 पुत्रस्वीकारविधिः (शौनकीयः) Ms No. P 3646/23

Beginning :

अथातः पुत्रसङ्ग्रहविधिं व्याख्यास्यामः– शोणितशुक्लसम्भवौ मातृपितृनिषेकस्य तस्य प्रदानपरित्यागविक्रयेषु मातापितरौ प्रभवतः, न स्वैकप्रतिग्रहः ॥

End :

सुकृते जातवेदस इतीज्यया जुहोति : अयाज्यया जुहोति ; उपजुहोति ; व्याहृतिभिस्ततः स्विष्टकृदादिवामदेव्यब्राह्मणजपपर्यन्तं कृत्वा एतद्वै वाससी कुण्डले अङ्गुलीयकम्। यद्येवं कृते औरसपुत्रवत् उत्पाद्यते तु भागेषु भवतीत्याह भगवान् रौरकिः ॥

Colophon :

— — —

1211

Sl. No. 8702 पुनर्विवाहकारिका **Ms. No. P. 6771/3**

Beginning :

प्राक्तोयमाज्यभागान्तं × × कमिषे प्रदक्षिणम् ।
अन्वारम्भे तु सोऽमायां षोडशाज्याहुतीर्हुनेत् (?) ॥
गृहीत्वा पाणिनोत्थाय वाजवर्जं प्रदक्षिणम् ॥
प्रदक्षिणत्रयं कृत्वा तुभ्यमग्नेति मन्त्रतः ॥

End :

सोमाङ्गारकशुक्राश्च विशाखा भरणी तथा ।
अमानन्दा च × × ता च पुनस्सन्धानवर्जिताः ॥
प्रतिपत्पर्वसन्धानं कर्मकर्तृविनाशनम् ॥

Colophon :

— — —

1212

Sl. No. 8703 पुनर्विवाहनिर्णयः **Ms. No. P. 5951/56**

Beginning :

धर्मप्रवृत्तौ–

पत्नीवियोगे प्रथमे च वर्षे नोचेद्द्विवर्षे पुनरुद्वहन्तु ।
अमामसेदूर्ध्वमशुभप्रदं स्यात् (?) वसिष्ठगार्ग्यो हि पराशराद्याः ॥

End :

येन सार्धं प्रकुर्वीत मातापित्रोर्मृतेऽहनि ।
पर × × शुपक्षौ तु पगुनीमर्दरात्रताम् (?) ॥
तदंगदाहनं कुर्युः वैराजाश्रीर्विनश्यति (?) ॥

Colophon :

-- -- --

Extra Information :

अन्ते उपनयनाध्यायः—

अधनादष्टमे वर्षे जन्मतो वाग्रजन्मना ।
वैरद्यामेकदेशे × × × क्षाभिवृद्धये ॥ (?)

इत्यस्ति अधिकम् ॥

1213

Sl. No. 8706 **पुनस्संस्कारनिर्णयः** Ms. No P. 4972/6

Beginning :

शरीराणां न विन्देरन् देशान्तरमृतस्य च ।
संगृह्यामौ स तस्य देतदाह .... क्लसिः ॥

अस्थौ स्थिरे अग्निः रक्षणीयः । अस्थ्यभावे त्वशरीरकस्य विनष्टवह्नेरुदकक्रियैव ॥

End :

बर्जनीयानि × × सतां भरणीं कृत्तिकां तथा ।
आश्लेषां च धनिष्ठां च शतभिषादिचतुर्थकान् ॥
त्रिपुष्कराभाणि ---- रोहिणी च पुनर्वसु ॥

Colophon :

-- -- --

1214

Sl. No. 8701 **पुरुषार्थसुधानिधिः** (पुरुषार्थचिन्तामणिः) Ms. No. A. 198

Beginnngi :

ब्रह्मविष्णुमहेशानां सर्वेषां जगतां प्रभुः ।
ईश्वरो नित्यकालात्मा विभुर्विजयेततराम् ॥

अत्रेस्समुद्भवाद्रामकृष्णसूरिरभूत्कुलात् ।
आटवेले इति ख्यातात्तन्नेत्राच्चन्द्रमा इव ॥
तदात्मजो विष्णुभट्टः पुरुषार्थप्रभासके ।
ग्रन्थे चिन्तामणौ कालसम्यग्ज्ञानप्रसिद्धये ॥

End :

विदुषा विष्णुभट्टेन पुरुषार्थप्रकाशके ।
चिन्तामणौ कर्मकालसम्यग्ज्ञानप्रसिद्धये ॥
+ + + + + + + ।
रचितः कालखण्डो यस्तेन तुष्यतु शङ्करः ॥
+ + + + + + + +
धर्मसंस्थापनार्थायेहावतीर्णैरीश्वरांशतः ।
प्रवर्त्यो जगतीपालैः सदा धर्मविवृद्धये ॥

Colophon :

इति आटवेळे-उपनामक-श्रीमद्रामकृष्णसूरिसूनुविष्णुभट्टकृते पुरुषार्थचिन्तामण्याख्यग्रन्थे कालखण्डः समाप्तिमगमत् ॥

1215

Sl. No. 8708 पुरुषार्थसुधानिधिः Ms. No. A. 172

Beginning :

नायकं सर्वलोकानां विनायकमनाथकम् ।
नानाकल्पधरं नौमि विघ्नादीनां विनायकम् ॥
हारगौराम्बरधरां हरिणाक्षीं हरिप्रियाम् ।
शारदां शरदम्भोजवदनां शुभदां भजे ॥

End :

संशोहि भासः सर्वस्य जगतः जनकोऽभवत् ।
इयमन्तिमतत्त्वेन समाकर्ण्य करोऽद्भवत् ॥ (?)

Colophon:

इति पुरुपार्थसुधानिधौ मोक्षस्कन्धे आध्यात्मिककथनं नाम सप्तदशोऽध्याय: । समाप्तोऽयं ग्रन्थ: ॥

1216

Sl. No. 8713 प्रतिपन्निर्णयः Ms. No. P. 5723/36

Beninning:

प्रतिपन्नाम विज्ञेया चन्द्रस्य प्रथमा कला ॥
पूर्वाह्णे बापराह्णे वा त्रिमुहूर्ता परे तिथिः ॥

स्मृत्यन्तरेऽपि–

प्रतिपत्सम्मुखा कार्या या भवेदपराह्णिकी ॥ इति ॥

End:

वृद्धगर्गः–

मुख्यायाः पूर्वविद्धायाः प्रतिषद्यं च सम्भवेत् ।
बल्युत्सवं तु कर्तव्यं दूरानी (?) × × × मुत्तरेऽहनि ॥ इति ।
सम्भवे पूर्वविद्धैव निषिद्धा परसंयुता ॥

Colophon:

इति प्रतिपन्निर्णयः ॥

1217

Sl. No. 8717 प्रतिसरविधिः Ms. No. P. 3085/23

Beginning

शालितण्डुलसम्पूर्णं सताम्बूलं सभूतिकम् ।
नवकृत्वा त्रिगुणितं तन्तुसंयुक्तकंसकम् ॥
उपविश्य ततः पश्चात् पार्श्वासीनैर्द्विजैस्सह ॥
पूर्णकुम्भं ततो विद्वान् स्थापयेत् पुरतस्सुधीः ॥

End :

यद्वा उषस्पतिरिति भस्मना च साम्ना भस्म निधाय च सूत्र इति विशेषः ।

सर्वमङ्गळ× × × मादौ कर्तव्यमेव च ।

महर्षीणां गौतमेन मतं (?)लोकहिताय च ॥

Colophon :

— — —

1218

Sl. No. 8719 **प्रथमाशाखान्यायनिर्णयः** **Ms. No. C 2936**

Beginning :

उमासुतं देवनरादिवन्दितं परात्परं विश्वपतिं गणाधिपम् ।

नमामि वेदान्तसमूहगोचरं परेशसूनुं परमार्थरूपकम् ॥ १ ॥

\+ + + +

मया कृतः प्रथमजा, शाखाविनिर्णायकः ॥ ३ ॥

End:

शाखाप्रथमपूर्वायाः तस्याः न्यायस्य निर्णयः ।

इत्याख्यं च महाग्रन्थं बालबोधेन यत्नतः ।

\+ + +

विद्योदयो निराकुर्यात् अविद्यातिमिरं सदा ।

सहस्रांशुरिवाशेषं मुद्राकिरणराजिभिः ॥ १ ॥

Colophon :

इति प्रथमशाखान्यायनिर्णयः ॥

1219

Sl. No. 8728 **प्रपन्नधर्मसारसमुच्चयः** **Ms. No. A. 357**

Beginning :

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।

वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

श्रीनिवासं नमस्कृत्य शेषाचलनिवासिनम ॥
परमैकान्तिनां सम्यग्वक्ष्याम्याचारनिर्णयम् ॥

End:

एवं पञ्चकालानुष्ठानमामरणान्तं कुर्वन् परमपदं प्राप्नोतीति श्रीरङ्गमाहात्म्ये सम्यगभिहितम् । अभिगमनोपादानेज्यास्वाध्यायेज्यास्वाध्यामहं (!) योगः । अनेसदेवदच्छिद्रं भगवति भक्तः परं पदं यति ॥

Colophon:

इति भारद्वाजकुलतिलकवङ्गीश्वरान्वयजातस्य श्रीसुन्दरार्यपुत्रस्य वैकुण्ठनाथस्य कृतिषु प्रपन्नधर्मसारसमुच्चये योगशेषस्वाध्यायो नाम षष्ठः परिच्छेदः ॥

1220

Sl·No. 8731 **प्रपन्नाचारनिर्णयः** Ms. No. P. 7117/4

Beginning :

अथाभिगमनमुच्यते– तत्रादौ सतामावासयोग्यधर्मदेशानाह–
अत्र मनुः–

सहायाद्यत्र विचरेत् कृष्णसारमृगो द्विजः ।
विज्ञेयो धर्मिको देशः म्लेच्छदेशस्ततःपरम् ॥

End :

प्रातस्स्मरामीत्यादि श्लोकत्रयं पठति; वाक्यगुरुपरम्प × × तदन्तरं मन्त्रत्रयं, तदनन्तरं अष्टश्लोकी, तदनन्तरं तिरुमुडियडवु इति ॥

Colophon :

इति प्रपन्नविषयः ॥

1221

Sl. No. 8734 **प्रपन्नाह्निकम्** Ms. No. P. 3794/1

Beginning :

यत्स्मृतिः सर्वसिद्धीनां अन्तरायनिवारिणी ।

तस्मै श्रीरम्यजामातृमुनये विदधे नमः ॥

पुराणसंहितावाक्यैः शिष्टाचारानुसारतः ।
ग्रथितं स्मृतिवाक्यैश्च प्रपन्नाह्निकमुत्तमम् ॥

End :

नीतौ तु गर्भशङ्कित्वात् स्नानं मैथुनिनः स्मृतम् ।
× × त्रकौ तु यदा गच्छेत् शौचं मूत्रपुरिषवत् ॥
स्मृत्युक्तस्याननुष्ठानात् निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ॥

Colophon :

प्रपन्नाह्निकं समाप्तम् ॥

1222

Sl. No.8746 **प्रमाणसङ्ग्रहः (मुक्तकश्लोकाः)** **Ms.No. C. 2662/3**

Beginning :

मातामहादयस्तिस्रो मातामह्यादयस्त्रयः ।
स्वयमेव तु गोत्राणि सप्तगोत्राः प्रकीर्तिताः ॥
कुले ऋतुत्रयादर्वाक् मङ्गलानि तु मुण्डनम् ।
प्रवेशे निर्गमे चैव न कुर्यान्मङ्गलत्रयम् ॥

End :

सूतकान्तरिते वह्नौ मनो वा भूर्भुवादिकम् ।
मध्ये पर्वणि संक्रान्तौ पुनः सन्धानमाचरेत् ॥
पिता मातामहश्चैव जामाता भगिनीत्रयम् ।
श्वशुरश्चेति विज्ञेयाः सप्तगोत्राः प्रकीर्तिताः ॥

Colophon:

— — —

1223

Sl. No. 8750 **प्रयोगचन्द्रिका** Ms. No. P. 2398/7

Beginning :

श्रीभूमिनीलादिसमेतं सम्प्रणम्य गर्भाधानपुंसवनसीमन्तजातकर्मनामकरणान्नप्राशनचौलोपनयनव्रतसमावर्तनोद्वाहगृहवेप्रशानां तत्र तत्रोपयोगिनां प्रयोगः ॥

End :

इत्येकधाऽग्निप्रतिष्ठाद्याज्यभागान्ते वास्तोष्पते प्रतिजानीहि ; वास्तोष्पते शग्मया वास्तोष्पते प्रतरणोमीवहा ; वास्तोष्पत इति चतसृभिर्हुत्वा जयाद्यग्न्युपस्थाना ॥

Colophon :

इति प्रयोगचन्द्रिकायां सप्तदशः खण्डः ॥

1224

Sl. No. 8752 **प्रयोगचन्द्रिका** Ms. No. A. 668/1

Beginning :

यस्य निःश्वसितं वेदाः यो वेदार्थज्ञानशक्तिमान् ।
तं वन्दे परमात्मानं दक्षिणामूर्तिमव्ययम् ॥
+ + + + + + + + + + + +
आपस्तम्बादिसूत्रार्थं रुद्रयामलमेव च ।
विचार्य महादेवेन अकारि दर्शपूर्तपद्धतिः ॥

End :

लिपिन्यासमन्त्रन्यासपूर्वकं स्थिरप्रतिष्ठोक्तविधिना प्राणप्रतिष्ठां कृत्वा महापूजां कुर्यात् । महद्दोषादौ तदनुगुणमहापूजाविधिः । रजस्वलादिस्पर्शे तु पुनः प्रतिष्ठा कार्या ॥

Colophon :

इति श्रीमन्महादेवीये प्रयोगचन्द्रिकायां पुनःप्रतिष्ठाप्रकरणम् ॥

1225

Sl. No. 8753 प्रयोगचिन्तामणिः (श्रीरामकल्पद्रुमः) Ms No. C. 4111/1

Beginning :

प्रणौमि जानकीजानिं पितरं कमलाकरम् ।
अम्बामरुन्धतीं शीलां लक्ष्मीं लक्षणशालिनीम् ॥ १ ॥ ++
अनन्तसंज्ञस्तु तदात्मजोसौ श्रीरामकल्पद्रुममातनोति ॥

End :

हरदत्तस्तु– त्रयोदश्यां माध्यवर्षश्राद्धं श्राद्धमित्याह । प्रतिकृष्णपक्षं प्रतिपदाद्यासु-मतिथिषु ष × वश्यं कृष्णपक्षश्राद्धम् ॥

Colophon :

इति माध्यवर्षश्राद्धम् । इति कमलाकरभट्टात्मज-अनन्तभट्टकृते श्रीरामकल्पद्रुमान्तर्गते संस्कारकाण्डे सप्तसंस्थाः समाप्ताः ॥

इति प्रयोगचिन्तामणिप्रयोगः ॥

1226

Sl. No. 8754 प्रयोगचूडामणिः (बोधायनीयः) Ms. No. P. 294/3

Beginning :

अथाष्टकाहोमहौष्यादिमासत्रयेषु कृष्णपक्षस्य सप्तम्यां अष्टम्यां नवम्यां माघमासस्य पौर्णमास्यां च कार्यः ; तैष्यादिमासत्रये षष्ठ्यां अष्टम्यां अपरपक्षस्यापि वा ॥

End :

कुक्षौ वरुणगङ्गा च शङ्खस्याप्यधिदैवते ।
शङ्खमध्यस्थितं तोयं भ्रामितं केशवोपरि ॥
अङ्गलग्नं मनुष्याणां ब्रह्महत्याशतं दहेत् ।
किञ्चिच्छंखोदकेन कलशोदकं सम्प्रोक्ष्य यागभूमिं च पूज × × × ॥

Colophon :

इति श्रीमद्बोधायनीये नृसिंहकृतप्रयोगचूडामणिमालिकायां नैमित्तिककाण्डः समाप्तः ॥

1227

Sl. No. 8755 **प्रयोगदर्पणम्** Ms. No. P. 2174

Beginning:

सङ्कल्पावाहनदौ तत्तल्लिङ्गविभक्तिकं गोत्रनाम च कीर्तयेत् । गोत्रापरिज्ञाने काश्यपगोत्रम् । नामपरिज्ञाने पृथिवीपदम् । × × × × महानां क्रमेण ब्रूयात् ॥

End

दहनदिनात्परेद्युरेकोद्दिष्टस्यामुकगोत्रस्य ब्राह्मणहस्तेऽपः प्रदाय षट् × × × × श्रीवैकुण्ठं गमिष्यन्तं प्रीयतां सीतारामः ॥

Colophon :

सीतारामयुत × × प्रेरितेन मयाधुना ।
प्रयोगदर्पणाभिख्यो लिखितः स्मृतिसङ्ग्रहः ॥

1228

Sl. No. 879) **प्रवरनिर्णयः** Ms. No. P. 8078/4

Beginning :

असमानर्षगोत्रजामि । ऋषेरिदमार्षम् । प्रवरगोत्रप्रवर्तकस्य मुनेर्व्यावर्तको मुनिगण इत्यर्थः ॥

End :

प्रजामुत्पादे (?) चान्द्रायणं विवाहमात्रं कृच्छ्रं चरे × × त्र ग्रन्थान्तेऽष्टोत्तरशतं .... निद....होमः । परित्यक्त्वा तां जननीवद्रक्षेदिति इति मूर्त्यादिलक्षणानि आभ्यन्तराणि तु इतरत्र ....त्त्यशकुनरूपे × × द्रष्टव्यानि ॥

Colophon :

इति विवाहप्रकरणे प्रवरनिर्णयः समाप्तः ॥

1229

Sl. No. 8797 प्रवरमञ्जरी Ms. No. A. 82

Beginning :

अथ प्रवरमञ्जरीप्रारम्भः —

यज्ञं यत्स्थं यदीयं जगदिदमखिलं यल्लयं यत्प्रधानं
यत्प्रेष्यं + + + + + + + + + + ।
+ + + × +
अ चार्यान् वेदकल्पान् × × × तन्निरतान् कल्पसूत्रप्रणेतॄन्
सर्वान् बोधायनादीन् प्रणिपतितजगत्प्राणशीलान् प्रणम्य ।
× × × × × ×
तत्सूत्रोपात्तगोत्रप्रवरसुमनसां मञ्जरीं तां करीष्ये ॥

End :

ऋषेरधीती भवति । नान्यवरणे दद्यान्नापुत्राय नाशिष्याय नासंवत्सरोषिताय । सर्वेषां पङ्क्तिपावनानामुपरिष्टाद्भवति यः प्रवराध्यायमधीते यः प्रवराध्यायमधीते ॥

Colophon :

इति पुरुषोत्तमपण्डितविरचितायां प्रवरमञ्जर्यां महाप्रवरसूत्रकाण्डसमाप्तिर्भवति ॥

1230

Sl.No. 8798 प्रवरमञ्जरी Ms. No. B. 97/1

Beginning :

असगोत्रा द्व्यामुष्यायणानां ससार्षेय इति केचित् ।

पञ्चानां त्रिषु सामान्यमविवाहस्त्रिषु द्वयोः । इति ।
भृग्वङ्गिरगणेष्वेवमेकोऽप्यन्यत्र वार्यते ॥

End:

द्वयोरैक्येऽप्यविवाहः । अन्यत्र– अत्र्यादिपञ्चगणेषु एकेषु ऐक्येऽपि विवाहो न काय इति ।

प्रवरविवेकिन्याख्या रचिता श्रीनिवासविदुषेयम् ।
परिणयने गोत्राणां संशयच्छेत्री विपश्चितां हि मुदे ॥

Colophon :

इति प्रवरमञ्जरी ॥

1231

Sl. No. 8802 प्रायश्चित्तदीपिका Ms. No. P. 2703

Beginning :

नत्वा बोधायनाचार्यं तेनोक्तश्रौतकर्मणाम् ।
विध्यतिक्रमणे प्रायश्चित्तदीपः प्रकाश्यते ॥
श्रौते बोधायनोक्तानि प्रायश्चित्तानि यानि तु ।
व्याख्याता पद्यगद्येयं (?) गोपालेन तु सूरिणा ॥

End :

विष्णुक्रमोत्सर्गमात्रं कर्मैतद्वचनं भवेत् ।
दृष्टप्रयोजनार्थानि स्वामिकार्याणि यानि तु ॥
तूष्णीमध्वर्युरन्यानि कुर्यान्मन्त्रान् जपेत्पतिः ।
अदृष्टार्थानि पूर्यते जपेन्मन्त्रांश्च तानपि ॥

Colophon :

इति प्रायश्चित्तदीपिकायां अग्निहोत्रप्रकरणं समाप्तम् ॥

1232

Sl. No. 8804 प्रायश्चित्तदीपिका Ms. No. C. 427

Beginning :

यस्य प्रसादान्मूकोऽपि भवत्यागमपारगः ।
वेङ्कटेशमहं वन्दे सर्वाभीष्टप्रदायकम् ॥
वत्सवंशावतंसेन वरदाधीशयज्वना ।
क्रियते सोमयज्वना प्रायश्चित्तप्रदीपिका ॥

End

अत्रायं भावः-यद्यप्येषा प्रायश्चित्तप्रदीपिका गुरु × × दिदोषयुक्ता, तथापि विदुषां यथार्थोपदेशरूपेण अनुग्रहेण सर्वदोषविनिर्मुक्तो भवेत्। ततश्च विदुषामनुग्रहादेव अनया प्रायश्चित्तप्रदीपिकयैव ममापि यथार्थप्रायश्चित्तानुष्ठानं स्यादिति ॥

Colophon :

वत्सवंशावतंसेन वरदाधीशयज्वना।
सोमपेन कृता वृत्तिः प्रायश्चित्तप्रदीपिका ॥

1233

Sl. No. 8808 **प्रायश्चित्तनिर्णयः** Ms. No. P. 5919/12

Beginning :

× × × × × कृच्छ्रात्मकस्यार्धमेव विधातव्यमिति न्यायेन विंशत्युत्तरषट्शताधिकसहस्र-संख्याकप्राजापत्यकृच्छ्रात्मके शक्यप्रत्याम्नायरूपेणाचरिते अशीतिवर्षवृद्धस्ये × × × षोडश-वर्षस्य बालकस्य स्त्रिया रोगिणश्चार्धमेव विधातव्यमिति वचनात् ॥

End:

प्रायश्चित्तान्यनेकानि तपःकर्मात्मकानि वै।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥

इति स्मरणात् यस्य स्मृत्येत्यादि + + + यत्कृतं तु मया देव परिपूर्णं तदस्तु ते। अनेनाचरितेन सर्वप्रायश्चित्तेन भगवान् सर्वात्मकः श्रीविष्णुः प्रीयताम्। तत्सद्ब्रह्मार्पणमस्तु ॥

Colophon :

— — —

1234

Sl. No. 8816 **प्रायश्चित्तमुक्तावलिः** Ms No. C. 1993/1

Beginning :

यस्योदये मखभुजां प्रचरन्त्यशेषाः
पुण्याः क्रियाः प्रतिदिनं ह्यवनार्थमाय।

सोऽयं तमिस्रदलनो दिशतादभीष्टं
भानुस्त्रयीमयतनुः परिपूर्णरूपः ॥ १ ॥
+ + + + +
आलोच्य निखिलान् ग्रन्थान् समाकर्ण्य गुरोर्गिरः ।
दिवाकरेण विदुषा प्रायश्चित्तं निरूप्यते ॥ ३ ॥

End :

नियमब्रह्मचर्यहविष्याशनभूशय्यादयः । एवं सङ्कल्पपूर्वकं श्रुत्वा समाप्तौ सति सामर्थ्ये + + + + सन्तोष्य द्विजान् भोजयेत्तेभ्यो दक्षिणां दद्यात् । एवं सर्वपुराणश्रवणे विधिरिति सर्वं शिवम् ॥

Colophon :

१२३ तमे पत्रे–

इति श्री-भारद्वाजमहादेवभट्टात्मज-सकलविद्यानिधान-श्रीदिवाकरविरचिते धर्मशास्त्रसुधानिधौ प्रायश्चित्तमुक्तावली समाप्ता ॥

1235

Si. No. 8819 प्रायश्चित्तशतद्वयी Ms. No. P. 2288/1

Beginning :

नैमित्तिकेषु श्रुतिलक्षणेषु
सूत्रे यदस्पष्टमिवाल्पबुद्धेः ।
तद्भाष्यवृत्त्याद्यनुसृत्य सम्यक्
सुखाववोधाय विविच्यते तत् ॥
श्रुत्युक्तकर्मण्यकृतेऽन्यथा वा
कृतेऽस्य चित्तं श्रुतिलक्षणं स्यात् ।
पुंसोऽपराधे श्रुतिलक्षणं च
निमित्तसंख्यादि विवक्ष्यते नु ॥

End :

अनुक्तमप्यत्र परिस्फुटं यत्
तद्भाष्यवृत्त्याद्यनुसृत्य सम्यक् ।

तत्राप्यनुक्तं च तदुक्तरीत्या
यथानिमित्तं स्वयमूहनीयम् ॥

Colophon :

समाप्ता शतद्वयी ॥

1236

Sl. No. 8823 प्रायश्चित्तशतद्वयीव्याख्या Ms. No. P 2288/2

Beginning :

आपस्तम्बं मुनिं नत्वा प्रायश्चित्तशतद्वयीम् ।
मन्दानां सुखबोधार्थं व्याकरिष्ये यथामति ॥

\+ + + + + + + + +

हविर्यज्ञप्रायश्चित्तेषु सोमप्रायश्चित्तेषु च मन्दबुद्धीनां सूत्रे यदस्पष्टमिव प्रतीयते तदेव प्रायश्चितम् ॥

End :

न तावदस्मिन् संग्रहे सर्वाणि प्रायश्चित्तेष्ट्यादीनि साकल्येन प्रतिपादितानि ; विस्तर-प्रसङ्गात् । अतोऽत्रानुक्तं स्पष्टत्वात भाष्ये वृत्तौ सम्यग्-बोद्धव्यम् । न च भाष्यादावपि सर्वं वक्तुं शक्यते ; पुरुषाणां प्रमादादिसम्भवेनातिगहने कर्ममार्गे नानाविधस्खलनसम्भवात् । अत-स्तत्राप्यनुक्तं सूत्रभाष्याद्युक्तन्यायानुसारेण तत्तत्कर्मनिमित्तानुगुणनैमित्ति × × स्वयमेवोहनी-यमिति सिद्धम् ॥

Colophon :

इति श्रीवत्सकुलभूषण श्रीवेङ्कटेश्वरवाजपेयिनः कृतौ प्रायश्चित्तशतद्वयीव्याख्याने चतुर्थ-प्रकरणम् ॥

1237

Sl. No. 8828 प्रायश्चित्तसङ्ग्रहः Ms. No. P. 2503/21

Beginning :

प्राजापत्ये तु गामेकां दद्यात्सान्तपनं द्वयम् ।

पराकतप्तकृच्छ्रातिकृच्छ्रे तिस्रस्तु गाः स्मृताः ॥

End :

कुछ्रे सान्तपनाख्ये भवति षडधिका विंशतीस्सैव हीना
द्वाभ्यां चान्द्रायणं स्यात् तपसि कृशबलो भोजयेद्विप्रमुख्यान् ॥

Colophon :

— — —

1238

Sl. No. 8831 प्रायश्चित्तसहोदयः Ms. No. C. 3846

Beginning :

अथ छन्दोगानां ततक्रतोः स्वस्वकर्मातिक्रमे विहितानि प्रायश्चित्तानि उच्यन्ते । तत्तत्कर्मवैगुण्यपरिहाराय तेषामवश्यमनुष्ठीयमानत्वात् ॥

End :

स्वयंहोता स्वयं देही स्वयमेव उपतिष्ठेत अग्निहोत्रमिति । हौम्यशेषं दक्षिणा इति । एवं अन्यान्यपि प्रायश्चित्तानि द्रष्टव्यानि इति शिवम् ॥

Colophon :

इति श्रीमन्नागरकुलोत्पन्न-त्रिपाठी-श्रीसूरजित्तनूजदेवेश्वरात्मजसदारामकृतौ प्रायश्चित्तसहोदये प्रकीर्णप्रायश्चित्तप्रयोगः समाप्तः ॥

1239

Sl. No. 8833 प्रायश्चित्तसुधीमणिः Ms. No. C. 907

Beginning :

कपोलनिष्यन्दिमदाम्बुधारा
सिन्धौ × × × × × × रालिः ॥
विनायको दैवतसार्वभौमः
पायादपायादमितप्रभावः ॥

अथ ब्रह्महत्या प्रायश्चित्तम् ॥

End :

श्री गोपालपदाम्भोजस्मरणाच्च विशेषत: ।
श्रीमद्गोपालकृष्णोऽस्तु प्रसन्नो मम (देवता) सर्वदा ।
श्रीरञ्जिताङ्घ्रियुगल: × त्रिवर्गैस्सुपूजित: ।
तृणावर्तादिसंहर्ता × × × × × × ॥
××× ××× ××× कृतोऽयं ग्रन्थसङ्ग्रह: ॥
× × × × × × × × ×

Colophon :

इति प्रायश्चित्तसुधीमणि: सम्पूर्ण: ॥

1240

Sl.No. 8834 प्रायश्चित्तसुबोधिनी Ms. No. P. 3787

Beginning :

आर्हे (?) कोलग्रामवासी श्रीनिवासमखी सुधी: ।
बालानुद्दिश्य तनुते प्रायश्चित्तसुबोधिनीम् ॥

तत्रादावनुद्धरणप्रायश्चित्तमुच्यते । उदयात्पूर्वमस्त × × × वँ आहवनीयानुद्धरण-प्रायश्चित्तार्थम् ॥

End :

सोमव्यतिरिक्तकर्ममध्ये पत्नीमरणे कथञ्चिच्छेषसमाप्ति: । होममध्ये पत्नीमृतौ निर्मन्ध्य-नतां (?) दापयित्वा क्रतुस्समापनीय × तत्र शेषभ × × × मार्जालीये प्रक्षेप: कार्य इति वदन्ति ॥

Colophon:

– –– ––

1241

Sl. No. 8835 प्रायश्चित्तसुबोधिनी Ms. No. A. 651

Beginning :

श्रीमत्कण्वपुराधीशं गोपालं सकलेष्टदम् ।
नत्वा श्रीरङ्गनाथाख्य: प्रायश्चित्तसुबोधिनीम् ॥

करोमि विबुधप्रीत्यै यथामति बुधेष्टदाम् ।
माधवीयां मञ्जरीं च शातातपस्मृतीरितम् ॥
हेमाद्रिं च मयूखं च वीक्ष्य सम्यक् विविच्य च ॥

End :

अच्युतानन्तगोविन्दनामोच्चारणभेषजात् ।
मुच्यन्ते सकलाः रोगाः सत्यं सत्यं वदाम्यहम् ॥
एवं यः कुरुते मर्त्यः विष्णुलोकं समश्नुते ।
अन्यथा कुरुते यस्तु यावदाभूतसंप्लवम् ।
नरकं यान्ति ते सर्वे नात्र कार्या विचारणा ॥

Colophon :

इतिवर्णचतुष्टयजप्यमन्त्राः समाप्ताः । इति प्रायश्चित्तसुबोधिनी सम्पूर्णा ॥

1242

Sl. No. ४837 प्रायश्चित्तेन्दुशेखरः Ms. No.P.7574/1

Beginning :

बालेन्दुशेखरं नत्वा बालबोधाय लिख्यते ।
बालकृष्णमुदे चापि प्रायश्चित्तेन्दुशेखरः ॥

यद्यथाविध्यननुष्ठानाद्युपचितशुभनाशकमेव तत्प्रायश्चित्तम् । तुलापुरुषाद्भवति व्याप्तिवारणाय एवेति । न तु फलान्तरजनकमित्यर्थः ॥

End :

किन्तु तत्र प्रायश्चित्तं स्वयमेव ज्ञात्वाथवा व्याजान्तरेण किञ्चित्पृष्ट्वा रहस्योक्तं प्रायश्चित्तं स्वयमेव रहसि सङ्कल्प्य महच्चेत् तत्क्षौरसहितमन्यथा क्षौररहितमाचरेदिति ॥

Colophon :

इति श्रीमदनन्तोपाध्यायसूनु-काशीनाथोपाध्यायविरचिते सर्वप्रायश्चित्तकृततत्प्रतिपादोक्त-प्रायश्चित्तादिप्रयोगसारसंग्रहः समाप्तः ॥

इति प्रायश्चित्तेन्दुशेखरः समाप्तः ॥

1243

Sl. No. 8842 बुधाष्टमीनिर्णयः Ms. No. P. 1364/41

Beginning:

यदा यदा सिताष्टम्यां बुधवारो भवेद्यदि ।
भवेत्तत्रा क्षयं सर्वं स्नानदानञ्च यत्कृतम् ॥

End

सन्ध्याकाले तथा रात्रौ प्रसुप्ते तु जनार्दने ।
बुधाष्टमी न कर्तव्या हन्ति पुण्यं पुराकृतम् ॥

व्रतप्रारम्भविषयोऽयम् ॥

Colophon :

-- -- --

1244

Sl. No. 8843 बृहच्छौनकीयम् Ms. No. P. 2567

Beginning :

पुण्याहवाचनं कर्म भगवान् शौनकोऽब्रवीत् ।
+ + + + + + + ॥
वेदतन्त्रविधि × × पुण्याहकरणं भवेत् ।
चतुर्भिरथवा सर्वैर्विप्रैस्तु – – – – वा भवेत् ॥

End :

स्त्रीशूद्राणां विप्रैः कारयित्वा तूष्णीं पिबेत् । इत्येतद्-ब्रह्मकूर्चं स्यान्मासि मासि पिबे-
+ + द्वि + + + + + + सर्वेषामेव पापानामिदं तु प्राशये । + + +

यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ।
प्राशनात् पञ्चगव्यस्य दहत्यग्निरिवेन्धनम् ॥

Colophon :

इति पञ्चगव्यविधिस्समाप्तः ।

इति बृहच्छौनकीये नान्दीश्राद्धविधिः ॥

1245

Sl. No. 8844 बृहज्ज्योतिषार्णवः Ms. No. C. 3843

Beginning :

वृषवाहनविघ्नेशौ हंसवाहां सरस्वतीम् ।
स्वेष्टं श्रीवटुकं नत्वा पितरं व्यङ्कटं ततः ॥ १ ॥
श्रीगौतमकुलोत्पन्नो ज्योतिर्विद्व्यङ्कटात्मजः ।
हरिकृष्णः करोत्यत्र कौलसंस्कारपद्धतिम् ॥ २ ॥

End :

पुण्यनक्षत्रपाचितैः चरणतलप्रलेपात् यथेप्सितं पन्थानं साधकः प्रतिदिनं गच्छति । एतैः लेपैः प्रभावेन वाञ्छितानि योजनानि साधको व्रजटतीत्यर्थः (?) ॥६१॥

Colophon :

इति देशान्तरगमनम् । इति श्रीज्योतिर्वित्कुलावतंसव्यङ्कटशमात्मजहरिकृष्णविनिर्मिते बृहज्ज्योतिषार्णवे धर्मस्कन्धे उपासनास्तबके पादुकासाधनदेशान्तरगमननिरूपणं नाम त्रिंशदुत्तरद्वि-शततमोऽध्यायः ॥

1246

Sl. No. 8853 बृहद्गौरीतृतीयानिर्णयः Ms. No. P. 1364/10

Beginning :

भाद्रसिते तृतीयायां विधूदये सभर्तृका ।
स्नाता च वाग्यता नारी बृहद्गौरीं समर्चयेत् ॥

End:

चन्द्रोदये तृतीया चेद्दिनद्वयेऽपि वर्तते ।
पूर्वविद्धा परित्याज्या कर्तव्या संयता परा ॥

Colophon :

— — —

1247

Sl·No. 8854 **बोप्पणभट्टीयप्रयोगः** Ms· No P· 8151/1

Beginning :

अथ गार्ह्याणि कर्माणि– उदगयनपूर्वपक्षाहः । पुण्याहेषु कार्याणि । यज्ञोपवीतिना· प्रदक्षिणम् । दक्षिण × × चारं कुर्यात्पुरस्तादुदग्वोपक्रमापवर्गौ । + + + + लौकिकेऽग्नौ कुर्यात् ॥

End :

अथातो नाकबलिविधिं व्याख्यास्यामः । + + + चतुर्दिक्षु नाकबलिदेवताभ्यो बलिमुदकपुरस्सरं विसृज्य दम्पति × × वस्त्रादिकं धृत्वा इन्द्राणीं सं × × × ॥

Colophon :

— — —

1248

Sl· No· 8855 **ब्रह्मचारिनिर्णयः** Ms. No· P· 5726/151

Beginning :

अथ ब्रह्मचारिधर्माः–

अथातः पालाशं दण्डं वा बैल्वखादिरं अभावे याज्ञियं कृष्णाजिनं च परिधाय च ग × जनं चोत्तरीयं क्षणा × मा × कानि चेति ॥

End :

स्त्रियं वा पुरुषं वापि याचयेद्याचितस्त्रिधा (?) ।
कृत्वैव भार्गवं गुर्वी द्विजदेवाग्नये परम् ॥
एवं भुञ्जीत मतिमान् स्वाध्यायं चान्वहं पठेत् ॥

Colophon :

इति दण्डाजिनोपवीत × जिनभैक्षाचरणक्रमः (?) ॥

1249

Sl. No. 8865 **भक्ष्याभक्ष्यप्रायश्चित्तम्** Ms. No. P. 4776/8

Beginning:

इह तावत् जात्यादिदुष्टभक्षणनिबन्धनं प्रायश्चित्तं निर्णीयते । अत्र व्यासः—

संसर्गदुष्टं यच्चान्नं क्रियादुष्टं च कामतः ।

भुक्त्वा स्वभावदुष्टं च तप्तकृच्छ्रं समाचरेत ॥

End:

दरिद्रस्य वेदपारायणगायत्रीजपादिकमिति व्यवस्थापयेत् ।

किञ्चिदभ्यस्तमिदं समस्तं स्वार्थं परेषां गदितुं परं नः ।

श्रुतावबोधाचितशीलशाली विराजते वैदिकसार्वभौमः॥

Colophon:

इति भक्ष्याभक्ष्यप्रायश्चित्तनिर्णयः समाप्तः ॥

1250

Sl. No. 8866 **भक्ष्याभक्ष्यप्रायश्चित्तम्** Ms. No. P. 7617/7

Beninning:

इह तावत् जात्यादिदुष्टभक्षणनिबन्धनं प्रायश्चित्तं निर्णीयते । अत्र व्यासः—

संसर्गदुष्टं यच्चान्नं क्रियादुष्टं च कामतः ।

भुक्त्वा स्वभावदुष्टं च तप्तकृच्छ्रं समाचरेत् ॥

End:

यत्किञ्चिदभ्यस्तमिदं समस्तं

स्वार्थं परेषां गदितुं समर्थः ।

श्रुतावबोधोचितशीलशाली

विराजते वैदिकसार्वभौमः ॥

Colophon:

इतिभक्ष्याभक्ष्यनिर्णयः समाप्तः ॥

1251

Sl. No. 8868 **भस्मधारणविधिः** Ms. No. P. 2881/1

Beginning

सोमस्कन्दं गणेशानं नत्वा विश्वेश्वरः सुधीः ।
व्याकरोम्यधुना भस्मत्रिपुण्ड्रविधिमुत्तमम् ॥
कालाग्निरुद्रो भगवान् यमुवाच कृपानिधिः ।
सद्योजातादिभिर्मन्त्रैः गृहीत्वा भस्म पञ्चभिः ॥

End :

सायमंहो विरहिता भूतिरंहो विनाशिनी ।
ऊर्ध्वपुण्ड्रं त्रिपुण्ड्रं वा धारयेत्तु यथाकुलम् ॥
उभयं वा यथाचारं धारयेद्वैदिको द्विजः ।
तन्त्रनिष्ठन्तु तन्त्रज्ञसिद्धमेवेति निर्णयः ॥

Colophon :

-- -- --

1252

Sl. No. 8875 **भोजनविधिः** Ms. No. P. 3758/5

Beginning :

× × × × × × × ।
पादप्रक्षाळनोच्छिष्टमाचामेद्यदि वा द्विजः ॥
भूमिं विलेपनं कृत्वा × × सान्निधापयेत् ।
अविलेपनभूम्यां तु भुक्त्वा चान्द्रायणं चरेत् ॥

End:

एकपङ्क्त्युपविष्टानां विप्राणां × × × × ।
× × × × × भाजने ॥
सद्यो × × × पात्रे शेषा × × × भोजयेत् ॥

एकपङ्क्त्युपविष्टा ये न स्पृशन्ति परस्परम् ॥
भस्मना कृतमर्याद × × × × × × ॥

Colophon :

-- --

1253

Sl. No. 8885 भ्रात्रादिपत्नीदायनिर्णयः Ms No. C. 1431

Beginning :

अथ प्रमीताविभक्तभ्रात्रादिपत्नीविषये निर्णयः–

यत्र भ्रातृसपत्नभ्रातृपितृव्याद्याः सम्भाविता दायाभगिनः पत्नीसहिता अपुत्रा अविभक्ता एव स्थिताः तेषां मध्ये + + + गृह्णन्ति ॥

End :

अविभक्तपुत्रपत्नीसत्वे मातुरपि तथैव इति स्वीकरणीयत्वात् । "असुतस्य प्रमीतस्य माता दायमवाप्नुयात् ।" इति वचनस्य विभक्तिविषयत्वादेव अप्रवृत्तेरिति सङ्क्षेपः ॥

Colophon :

इति भ्रात्रादिपत्नीविषये निर्णयः समाप्तः ॥

1254

Sl. No. 8890 मदनरत्नप्रदीपिका Ms. No. P. 8708/1

Beginning :

× × × × × × × र्थुर्यजमानः प्रागुत्तरदेशकालान्यतमदेशे काले प्राप्याधिवासनदिने कृतनित्यक्रियः प्रारब्धोपवास × × × × × × × तं सम्पूज्य कुशयवजलपाणिरचेत्यादिदेशकालकीर्तनान्ते + + + भूलोकराजत्वप्राप्तिकामः × × धान्यपर्वतमहादानं प्रतिपादयिष्ये । लवणतैलादिदानेषु वक्ष्यमाणप्रकारेण फलं सकलं सङ्कीर्त्य × × × पर्वतदानं प्रतिपादयिष्ये ॥

End :

अपत्यध्वंसनं × × ण्डं यत्कण्ठवर्जितम् ।
तस्माल्लक्षणसंयुक्तं कुण्डं कुर्याद्विचक्षणः ॥

स्थण्डिलं वापि कुर्वीत सुभिद्धिः सिकतैः सितैः ।
हस्तमात्रप्रविस्तारं सुसमञ्चं गुणोन्नतम् ॥

अथ दानानि— तत्र सर्वदानापेक्षया षोडशानां महादानानां अभ्यर्हितत्वात् प्रथमं तान्युच्यन्ते ॥

Colophon :

इति कुण्डलक्षणानि । इति श्रीकोदण्डपरशुरामेत्यादिविविधविरुदावळीविराजमानमानोन्नतमहाराजाधिराज-श्रीशक्तिसिंहात्मजमहाराजाधिराजमदनसिंहदेवविरचिते मदनरत्नप्रदीपे दानविवेकोद्योते कुण्डमण्डपप्रकरणम् ॥

1255

Sl. No. 8894 मलमासनिर्णयः Ms. No. P 1364/43

Beginning :

स्मृत्यन्तरे—

यस्मिन्मासः × × क्रान्तिः सङ्क्रान्तिद्वयमेव वा ।
मलमासस्स विज्ञेयः मासस्स्यात्तु त्रयोदश ॥

End :

एक एव यदा मासः सङ्क्रान्तिद्वयसंयुतः ।
मासद्वयगते श्राद्धं तस्मिन्नेव प्रशस्यते ॥

Colophon :

इति मलमासः ॥

1256

Sl. No. 8895 अधिकमासनिर्णयः Ms. No. P. 2742

Beginning :

वन्देहं गणनाथं वाञ्छितसिद्धिप्रदायिनं देवम् ।
आर्यासहचरमनिशं श्रीशं वागीश्वरीशमार्यांश्च ॥

+ + + + + + +

बालोदीरितमर्थं गृ × × × हि नैव तुष्यन्ति ।

इत्यधिकमासादिश्रुति विशदीकरवाणि कौतुकाद्विषमाम् (?)॥

End :

आलोड्याखिलधर्मशास्त्रनिचयं संसर्गतां हस्यति
द्वन्द्वस्वोत्तरसुभवादिकयते वर्षे सुधीमियंदा (?)।
गङ्गातीरनिवासिभिः कृतममुं पन्थानमव्याहतं
गृह्णन्त्वार्यजना इषादिषु नृणां तत्तत्क्रियासिद्धये ॥

Colophon:

-- -- --

1257

Sl. No. 8905 **मलमासश्राद्धनिर्णयः** Ms. No. P. 4212/4

Beginning :

सांवर्तः–

मलमासे मृतानां तु मलमासे विधीयते ।
शुद्धमासे मृतानां तु शुद्ध एव विधीयते ॥

एतत् प्रथमाब्दिकविषयम् ॥

End :

अधिमासे तु संप्राप्ते वासरे प्रथमे यदि ।

गर्गः–

क्वचित् त्रयोदशेऽपि स्यात् × × व्रतः ।
× × × र्घे यच्छ्राद्धं मातपित्रोर्मृतेऽहनि ॥
मलमासे न कर्तव्यं व्यासस्य वचनं तथा ॥

Colophon :

-- -- --

1258

Sl. No. 8908 **महादानप्रायश्चित्तम्** Ms. No. P. 7866

Beginning :

अथ महादानप्रायश्चित्तमुच्यते— यजमानः सम्भारानादाय नद्यास्तीरं गत्वा शुचौ देशे परिषदं निवेश्य परिषदुपदिष्टप्रायश्चित्तानुष्ठानयोग्यतासिद्ध्यर्थं × × पकर्षणस्थानं करिष्ये ; इति सङ्कल्प्य— ॥

End :

× × × × पुनस्संस्कारपूर्वकम् ।
पञ्चगव्यं पिबेत् पश्चात् शुद्धिमाप्नोति × × ॥

कारणपूर्वकविधिः पराशरमाधवीये—

विधिनागमने × × तिमते मिहितम् ।
विधिनागमने कृच्छ्रमहोरात्रसमन्वितम् ।
व्रतस्थागमने कृच्छ्रं सपादं तु समाचरेत् ॥

Colophon :

— — —

1259

Sl. No. 8913 **महालक्ष्मीव्रतनिर्णयः** Ms. No. P. 5723/47

Beginning :

अस्यामेव तिथौ श्रीमहालक्ष्मीव्रतोपक्रममुक्तम्—

मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते ।
अष्टम्यां पूजयेल्लक्ष्मीं सर्वकामार्थसिद्धये ॥

End :

वृद्धौ साम्येप्यनग्नेर्युवतिवृपलयोः शश्वदेवाहिताग्नेः
पूर्वस्त्यक्त्वापराह्णं स्पृशति कुतपसंस्पर्शतोऽयं विधिः स्यात् ॥

Colophon :

-- -- --

1368

Sl·No 9225 **श्राद्धदिननिर्णयः** Ms. No P. 64/5

Beginning :

वामहस्ते तिलान् दर्भान् रङ्गवल्लीं गृहे तथा ।
ललाटे तिलकं दृष्ट्वा निराशाः पितरो गताः ॥
दानाध्ययनदेवार्चाजपहोममन्त्रनादिकान् ।
न कुर्यात् श्राद्धदिवसे पत्निपाणां विसर्जनात् ॥

End :

आश्वयुक् शुक्लनवमी मुहूर्तं वा कला यदि ।
तिथिः सा सकला ज्ञेया लक्ष्मीविद्याजयार्थिभिः ।
सूर्योदये परे रिक्ता पूर्णा स्याद्परा यदि ।
बलिदानं प्रकर्तव्यं तत्र देशे शुभावहम् ॥

Colophon :

-- -- --

1369

Sl. No. 9230 श्राद्धनिर्णयः **Ms. No. P 1364/60**

Beginning :

त्रिपक्षे द्वादशे पक्ष × × × चतुर्विंशतिपक्षके ।
पक्षत्रिपञ्चके चैव हयादिमध्यान्तपञ्चके ॥

End :

द्वौ पिण्डौ पितृनाम्नैव दद्याज्जीवत्पितामहः ।
प्रपितामहस्य चैकन्तु पितुः प्रत्याब्दिकादिषु ॥

Colophon :

-- -- --

1370

Sl. No. 9253 श्राद्धनिर्णयदीपिका **Ms. No. P. 4668**

Beginnngi :

× × शवजातीयद्विगुणम् । सोदकनिर्हारे दशाहः । असपिण्डालङ्करणे । अज्ञाना-दुपवासः । अशक्तौ स्नानम् । ज्ञानतः पादकृच्छ्रः ॥

End:

दक्षिणामूर्तिभक्तेन तिरुमलेन विपश्चिता ।

शुश्रूषुस्वान्तशुद्ध्यन्तसन्देहध्वान्तशान्तये ॥

सत्पात्रपूर्णस्येवार्द्रविवक्षादशयान्विता ।
जीयादुद्योतिता सेयं श्राद्धनिर्णयदीपिका ॥

Colophon :

इति श्रीदक्षिणामूर्तिप्रसादसमासादितसाहित्यविद्यासम्प्रदायः सपराशरकुलकासारकैरवचन्द्रस्य तिर्मलकवेः यशोजीविमामन्देहतिरुमणिदीपिका (?) श्राद्धनिर्णयदीपिका सम्पूर्णा ॥

1371

Sl. No. 9254 श्राद्धपद्धतिः Ms. No. P. 1848

Beginning :

श्रीमदर्जुनपूर्तार्थं नृहरिं सद्गुणाकरम् ।
प्रह्लादार्तिहरं देवं लोकेशेशमुपास्महे ॥
मूलस्मृतिं समालोक्य सारानुद्धृत्य यत्नतः ।
क्रियते सुखबोधाय गृह्यादिश्राद्धपद्धतिः ॥

अथ वृद्धिश्राद्धम् । तच्च नैमित्तिकम ; वृद्धिश्राद्धं निमित्तत इति गालवश्रवणात् ॥

End :

श्राद्धाङ्गतर्पणं परेद्युः प्रातः कुर्यात् । पक्षमहालये तु श्राद्धानन्तरं तस्मिन्नेव दिने कुर्यात् ॥

Colophon :

इति श्रीनारायणोपाध्यायविरचिते महालयश्राद्धप्रयोगः समाप्तः ।
रौद्र्यब्दे फाल्गुने मासि नृसिंहाचार्यसूनुना ।
श्रीनारायणदासेन रचिता श्राद्धपद्धतिः ॥

1372

Sl. No 9255 श्राद्धपद्धतिः Ms No. C. 194

Beginning :

भौमेऽर्के भृगुजे मघागृहनिशासप्तम्यनङ्गाह्वया (?)
नन्दाजन्मनि ते पुंयनियुगे नो पर्णा साधितैः ।

नोद्वाहव्रतचौलवृद्धिषु समार्धां धैकमासक्रमा-

न्नो दुष्येत्तु मृतौ महालयगयापुण्याहतीर्थादिषु ॥१॥

End:

देवीमार्जनशोकवर्हिरथ धूतां च पिण्डे जना-

भ्यङ्गो वासमुपास्थिताश्च यजुषामूर्जं परेतश्रुतिः ।

कृत्वा प्रोक्षितगोत्रवृद्धिकथनं स्वस्त्यक्षयं दक्षिणा

घोराग्निग्रहपात्रचालनावसर्गो तर्पणं श्वो दिने ॥ (१)

Colophon :

इत्यनन्तदेवकृतश्राद्ध-श्राद्धपद्धतिः ॥

1373

Sl. No. 9356 श्राद्धपरिभाषा Ms. No. P. 4311/10

Beginning :

भट्टोमाशङ्करसुतः चन्द्रचूडामणिस्सुधीः ।

श्राद्धानां प्रकृतिभूतं मासिश्राद्धं वदत्यथ ॥

मासिश्राद्धमिति कर्मनामधेयम्– तच्च मासि मासि कर्तव्यमिति सूत्रकारवचनात् इति ॥

Edn :

श्राद्धं कुर्यात् व्रतं कुर्यात् × × य पितृसेवितम् ।

ऋतुमत्यामृतं दद्यादर्धं × × × × र्णा ॥

Colophon :

इति पौराणिकभट्टकृते पाकयज्ञनिर्णये श्राद्धपरिभाषा समाप्ता ॥

1374

Sl. No. 9258 श्राद्धपाकनिर्णयः Ms. No. P. 1364/88

Beginning

प्रेतश्राद्धे पृथक्पाकं कुर्याद्धोमं समाचरेत् ।

[illegible] पाको विधीयते ॥

End :

प्रत्यब्दे मासिके चैव श्राद्धं कृत्वा विधानतः ।
तच्छेषेणैव कुर्वीत वैश्वदेवं द्विजोत्तमाः ॥

Colophon:

— — —

1375

Sl. No. 9259 श्राद्धपूर्वकृत्यनिर्णयः Ms. No. P. 4967/8

Beginning :

पूर्वेद्युः रात्रौ औपासनानन्तरं संकल्पं कृत्वा अन्नेन हविषा मासिश्राद्धविधानेन श्वः करिष्ये; इति सङ्कल्प्य, ब्राह्मणानुक्तलक्षणसम्पन्नान् मन्त्रयते ॥

End :

आर्द्रकं सगुडं मद्यं भस्म सौवापमिश्रितम् ।
भोजये × × × × चे त्सप × × × × × ॥
माषं सर्वत्र नैवेद्यं अग्नेः पिण्डेषु वर्जयेत् ।
यथा मद्यं तथा माषा निषिद्धाः पिण्डकर्मणि ॥

Colophon :

— — —

1376

Sl. No. 9261 श्राद्धपूर्वाह्णकृत्यनिर्णयः Ms. No. P. 5726/113

Beginning :

अथ श्राद्धदिनात्पूर्वाह्णकृत्यमाह प्रचेताः—

श्राद्धभुक् प्रातरुत्थाय प्रकुर्याद्दन्तधावनम् ।
श्राद्धकर्ता न कुर्वीत दन्तानां धावनं बुधः ॥

End :

प्रशस्ततिथि × क्षेषु नखादि छेदयेद्द्विजः ॥

देवलः—

तैलमुद्वर्तनं स्नानं स्नानीयं च पृथग्विधम् ।
पात्रैस्ताम्रमयैर्दद्यात् वैश्वदेविकपूर्वकम् ॥

Colophon :

इति पूर्वाह्णकृत्य × × ॥

1377

Sl. No. 9262 श्राद्धप्रकरणम् (धर्मप्रवृत्यन्तर्गतः) Ms. No. P. 1364/44

Beginning :

दन्तधावनमभ्यङ्गं नखकेशनिकृन्तनम् ।
कर्ता कुर्वीत पूर्वेद्युः भोक्ता चैव परेऽहनि ॥

End :

पितृयज्ञात्परो धर्मः पितृयज्ञात्परं तपः ।
पितृयज्ञात्परं कर्म न चैवास्तीह भूतले ॥

Colophon :

इति नारायणविरचितायां धर्मप्रवृत्तौ श्राद्धप्रकरणं समाप्तम् ॥

1378

Sl. No. 9265 श्राद्धप्रायश्चित्तम् Ms. No. P. 3865/2

Beginning :

श्राद्धे निमन्त्रितानां भोजनकाले परस्परस्पर्शे पात्रस्थमन्नं भुक्त्वा भोजनान्ते अष्टशतगायत्रीजपं कुर्यात् । भोजनकाले अन्योन्योच्छिष्टलेपनस्पर्शे स्पृष्टप्रदेशं अन्येन पाणिना प्रक्षाल्य भोजनान्ते स्नात्वा + + + प्रायश्चित्तं समाचरेत् ॥

End :

तत्र अग्निसन्धाने आपस्तम्बिनां तु अनुगतौ वा सन्धाने वा न तन्तुमन्त्रादिहोमः । तदनुष्ठानं तु अन्यपरम्परया प्राप्तम् । अनाज्ञातत्रयं व्याहृतित्रयं च कार्यम् ॥

Colophon

— — —

1379

Sl. No. 9267 श्राद्धभङ्गप्रायश्चित्तम् Ms. No. P. 4708/2

Beginning :

यल्लाजीये–

श्राद्धवमनप्रायश्चित्तमाह–

त्रयाणां पितॄणां मध्ये पितुश्च वमनं यदि ।

तद्दिने चोपवासश्च पुनश्श्राद्धं परेऽहनि ॥

End :

आषाढीमवधीं कृत्वा पञ्चमं पक्षमाश्रिताः ।

काङ्क्षन्ति पितरः क्लिष्टाः मानमप्यन्वहं जलम् ॥

Colophon :

-- -- --

1380

Sl. No. 9268 श्राद्धभेदनिर्णयः Ms. No. P. 8771/2

Beninning :

अथ श्राद्धानि । तान्यष्टौ– पार्वणं, पूर्वेद्युः, अष्टकं, अन्वष्टक्यं, मासिकं, काम्यं, आभ्युदयिकं, एकोद्दिष्टं चेति । पर्वामावास्या, तत्र भवं पार्वणम् ॥

End :

भुक्तशेषेणोच्छिष्टान्ते निपूर्णयान्ने वाग्ने तमयेति समानम् । अन्यदेवं प्रत्याब्दिकानि चेति । मासिश्राद्धं यदि पार्वणं × × × पार्वणं यदा विकल्प्यते, काम्यं च तच्च क्रियेत, तदा पार्वणं मासिश्राद्धं च तेनैव सिध्यतः ॥

Colophon :

-- -- --

1381

Sl. No. 9269 श्राद्धभोजनप्रायश्चित्तम् Ms. No. P. 9·45/13

Beginning :

प्रत्याब्दिके शतं प्रोक्तं मासिकेषु च षट्शतम् ।

सपिण्ड्यां त्रिसहस्राणि प्रेते[श्राद्धे] त्रिंशत्सहस्रकम् ॥

End :

प्रत्यङ्मुखे प्रवास. स्यात् रोग: स्याद्दक्षिणामुखे ।
न भक्षयेत्तु मरणं पुन: श्राद्धं परेऽहनि ॥

Colophon :

-- -- --

1382

Sl No. 9270 श्राद्धविवेकः Ms. No. P. 4335/26

Beginning :

अन्तरा मृतसूतके निर्णये उच्यते । तत्रैव–

विवाहयज्ञयोर्मध्ये सूतकं सूति चान्तरा ।
शेषमन्नं परैर्देयं दातॄन् भोक्ता च न स्पृशेत् ॥

अत्र निमन्त्रितेषु विप्रेषु प्रारब्धश्राद्धकर्मणीति द्वितीयोपन्यासात् ॥

End :

'स तदा वाचयेद्विप्रान् सकला सिद्धिरस्त्विति ।' पितृयज्ञस्य श्राद्धस्य सकला सिद्धिः सकलाङ्गसिद्धिरस्त्विति भवन्तो ब्रुवन्त्विति प्रार्थनेन मन्त्रितान् विप्रान् सकलाङ्गसिद्धिरस्य श्राद्धस्यास्त्विति वाचयेदित्यर्थः । इति ॥

Colophon :

इत्यानुकल्पश्राद्धविधिः ॥

1383

Sl. No. 9271 श्राद्धविवेकः Ms. No. C. 2975

Beginning:

प्रसीदतु स नो हरिस्त्रिदशवैरिसीमन्तिनी
नवीनविधवाजनव्रतविधानदीक्षागुरुः ।
यदीयपदपङ्कजस्मरणवीतसर्वेनसः
पुनर्भवगतागतं जहति वीतमोहा बुधाः ॥

चिरन्तनानेक + + + + + + रुद्रधरेण सम्यक्
+ + + + + + वितन्यते श्राद्धविवेक एषः ॥

End:

सम्पूर्णं स्यादिति श्रुतिरिति पठित्वा विष्णुं स्मरेत् । नित्यश्राद्धीयमन्नं ब्राह्मणाय प्रतिपादयेत् ; जले वा क्षिपेत् ॥

Colophon :

इति श्राद्धविवेके उत्तरक्रियापरिच्छेदः चतुर्थः ।
इति महोपाध्यायश्रीरुद्रधरकृतः श्राद्धविवेकः समाप्तः ॥

1384

Sl. No. 9272 श्राद्धसंकल्पविधिः Ms. No. P. 5983/4

Beginning :

श्रीमन्नारायणाय परिपूर्ण × र्णवाय
विश्वोदयस्थितिलयोस्तुनितिप्रदाय (!) ।
ज्ञानप्रदाय विबुधासुरसौख्यदाय
सत्कारणाय विततत्ताय नमो नमस्ते ॥

End :

ब्रह्मणोन्तर्यामि-श्रीमध्वाचार्याणां हृत्कमलमध्यनिवासि-अनन्तकल्याणगुणपरिपूर्ण-क्षीराब्धिशायि-भारतीरमणमुख्यप्राणान्तर्गत-लक्ष्मीवेङ्कटरमणस्य + + + श्राब्दस्वामी श्रीमध्ववल्लभ-श्रीमज्जनार्दनस्य समाराधनं करिष्ये ॥

Colophon :

-- -- --

1385

Sl. No. 9285 श्रीवैष्णवधर्मसङ्ग्रहः Ms. No. P. 3051/3

Beginning :

लक्ष्मीनृसिंह तव पादसरोजयुग्मे

श्री...परकालयतिराजसुपूजिते च
शुद्धं मदीयहृदयं दृढमस्तु लग्नम् ॥
श्रीरामानुजसिध्दान्तनिर्धारणधुरन्धरः ।
परकालयतीन्द्रो मे सन्निधत्तां सदा हृदि ॥
ब्राह्मे मुहूर्ते सम्प्राप्ते उत्थाय हरिर्हरिरिति सप्तकृत्वः उच्चार्य ॥

End :

ब्रह्मचारिणस्तु रात्रौ चरमयामादौ उत्थानपादप्रक्षाळनाचमनपूर्वकवेदाभ्यासः + + भैक्षभोजनपुनर्वेदाध्ययनसायंसन्ध्योपासनसमिदाधानपुनर्भैक्षभोजनवेदाभ्यासाः इति धर्मः ॥

Colophon :

-- -- --

1386

Sl. No. 9286 श्रीवैष्णवधर्मसङ्ग्रहः Ms. No. P. 1689/1

Beginning :

श्रीमान् वेङ्कटनाथार्यः + । + सदा हृदि ॥
लक्ष्मीनृसिंह्म तव पादसरोजयुग्मे
ब्रह्मेन्द्ररुद्रमुनिबृन्दशिरोभिवन्द्ये ।
श्रीमच्छठारियतिराजसुपूजितश्च
शुद्धं मदीयहृदयं दृढमस्तु लग्नम् ॥
+ श्रीरङ्गनाथयमिना प्रमाणपथवर्तिना ।
श्रीवैष्णवसदाचारनिर्णयोऽयं निबध्यते ॥

End :

भगवन्निवेदनपूर्वभैक्षभोजनपुनर्वेदाध्यनसायंसन्ध्योपासनसमिधाधानपुनर्भैक्षभोजनवेदाभ्यास इति धर्मः ॥

Colophon :

श्रीभगवद्रामानुजसिध्दान्तनिर्धारणसार्वभौमानां श्रीमच्छठकोपश्रीरङ्गनाथस्वामिनां कृतिषु आह्निकं सम्पूर्णम् ॥

1387

Sl. No. 9289 श्रीत्रैषणत्राह्निकम् (श्रुतिस्मृतिसारः) Ms. No. P. 6880/1

Beginning :

× रक्रिया चापि चतुर्दशी च
स्त्रीसेवनं नष्टकला प्रपुंसाम् ।
आयुःक्षयार्थं मुनयो वदन्ति
.... ॥

इत्यभ्यङ्गस्नानविधिः ।

अथ दीपोत्सवचतुर्दशीस्नानविधिमाह ॥

End

अन्वाधानेष्टिमध्ये तु ग्रहणे चन्द्रसूर्ययोः ।
नवो नवोयमादित्यश्चित्रमुदुत्य उद्वयम् ।
यथा लिङ्गं स्रुवेणैव जुहुयादाहुतीरिमाः ॥

Colophon :

इति श्रुतिस्मृतिसारे औपासनप्रायश्चित्तप्रकरणं समाप्तम् ॥

1388

Sl. No. 9290 श्रौतसिद्धान्तः Ms. No. C 3562

Beginning :

सकलनिगमवेद्यं वेदविद्यैकलभ्यं
सुरनरमुनिदेवैर्वन्दितद्वारदेशम् ।
सुजनहृदयगम्यं ब्रह्मविद्याविनोदं
भवभयहरणं त्वां साम्बमीशं भजामः ॥ १ ॥
अप्रमेयविभ × × रमेशं पारणीयगुणगण्यमगण्यम् ।
पामरैरपि न इरैः यरिमेयं (?) लिङ्गरूपधरमीशमिमीम ॥ २ ॥

End :

श्रीमद्भाद्रपदेऽथ मासि गु × × × त्प्रीतयेयं मता
शुक्रेऽप्यत्र च पक्षके भृगुदिने श्रीमद्दशम्यां तिथौ ।

अध्यायैरथ पञ्चभिश्च × × × पूर्णः कृतः पण्डितैः
सत्तर्कैकनिकेतनैः प्रतिदिनं संस्मारणीयः सदा ।।
राजारामशुचित्रततप × × × पिंतमानस ।
त्वदीये श्रौतसिद्धेऽस्मिन् शुद्धः पञ्चदशोऽप्यगात् ।।

Colophon :

इति श्रीक्षत्रियवर्यपशु × × नुराजारामकारिते हृदयरामविरचिते श्रौतसिद्धान्ते नाना-ग्रन्थसङ्ग्रहे आशौचविषये शिव × × र्चनानिर्णयो नाम पञ्चदशोऽध्यायः । इति श्रौतसिद्धान्तः सम्पूर्णः समा × × × × × ।।

1389

Sl. No. 9291 **श्वश्रूस्नुषादायनिर्णयः** Ms. No. C. 166

Beginning :

श्रीमन्नृसिंहकरुणारसपूर्णदृष्टि-
संप्राप्तसंततसुनिर्मलचित्तवृत्तिः ।
नत्वा गुरून् प्रवितनोति यथामतीह
श्वश्रूस्नुषाधनविवादतमःप्रकाशम् ।।

End :

वेदार्थप्रकाशिकायां अस्यार्थः विद्यारण्यतीर्थैः प्रदर्शितः ।

+ + + +

विचार्य धर्मशास्त्राणि सारमुद्धृत्य यत्नतः ।
सिद्धान्तोऽयं सुविज्ञप्तः सतां सन्तुष्टिहेतवे ।।

Colophon :

— — —

1390

Sl. No. 9293 **श्वेतमृत्तिकाधारणविधिः** Ms. No. P. 6179/2

Beginning :

अथातः श्वेतमृत्तिकाधारणविधिं व्याख्यास्यामः– प्राङ्मुखोदङ्मुखो वा उपविश्य ऋतोरिव ते व्रतमहत् । सत्यं मा ।।

End:

अष्टाक्षरेण जलमासिच्य × × × × × वराहेण कृ × न सितवाहुसा ।

मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् ।
त्वया हतेन पापेन जीवामि शरदश्शतम् ॥

Colophon :

-- -- --

1391

Sl. No. 9295 षडशीतिनिर्णयः Ms. No. P. 6660

Beginning :

पादौ प्रक्षाल्य हस्तौ च संस्थाप्य चरणौ भुवि ।
सन्निबद्धशिखाकच्छः स्मृत्वा चैवेष्टदेवताम् ॥
दक्षिणं तु करं करं कृत्वा गोकर्णाकृतिवत्पुमः । (?)
माषमज्जनमात्रास्तु सङ्गृह्याथ पिबेदपः ॥

Edn :

यथाग्निर्देवानां, ब्राह्मणा मनुष्याणां, मेरुः शिखरिणां, गङ्गा नदीनां, वसन्तो ऋतूनां, ब्रह्मा प्रजापतीनां । एवमसौ मुख्या गायत्री छन्दो देवता ॥

Colophon :

-- -- --

1392

Sl. No. 9297 षड्व्रतनिर्णयः (उपनीताचरणीयव्रतनिर्णयः) Ms. No. P. 2990/3

Beginning

अथातः षड्व्रतानि– उपनयनं, गोदानं व्रातिकं, आदित्यव्रतं, महानाम्निकं, औपनिषदं, भौतिकब्रह्मसामव्रतं– इति । पञ्चेत्येके । महानाम्निकान्तान्यौपनिषदान्तान्यादित्यव्रतानीत्यपरे । तेषामुपाकरणविसर्गौ व्याख्यास्यामः ।

उपनीतं गायत्रं सामाध्यापयीत । यथाग्रन्थकालञ्चरित्वा हविष्यमन्नमेकदिनं माणवकं भुञ्जीत ॥

End :

औपासनमकृत्वा तु स्त्रियं वा योऽभिगच्छति ।
स्वमातृगमनं प्रोक्तं इति वैवस्वतोऽब्रवीत् ॥
× × × × × × × ×
द्वादशाहमनग्निश्चेत् सन्ध्यां चैव दिनत्रयम् ।
चतुर्वेदधरो विप्रः सद्यश्शूद्रो न संशयः ॥

Colophon :

— —

1393

Sl. No. 9298 **बोधायनीयस्मृतिसङ्ग्रहः** **Ms. No. P 4624/22**

Beginning :

श्रीनृसिंहं गणेशानं वाणीं विद्यां गुरूनपि ।
बोधायनमृषिं नत्वा वक्ष्यते श्राद्धपद्धतिः ॥
निर्णयानां च सिन्धुं च चन्द्रिकादिस्मृतीरपि ।
विलोक्य क्रियते सैषा या बोधायनशाखिनाम् ॥
अथ श्राद्धप्रकरणं वक्ष्यते च यथामति ॥

तत्र श्राद्धभेदास्तावदुच्यन्ते— नित्यनैमित्तिक-काम्य-वृद्धिश्राद्ध-सपिण्डीकरण-पार्वण-गोष्ठी-श्राध्द-शुध्यर्थ-कर्माङ्ग-दैविक-यात्रिक-पुष्ट्यर्थानीति द्वादशविधानि श्राध्दानि ॥

End :

अमायां तु कलामात्रं प्रतिपद्दृते रवौ।
अन्वाधानं चतुर्दश्यां सबोधायनकाण्वयोः ॥
चतुर्दशी तु सम्पूर्णा द्वितीया क्षयगामिनी ।
चतुरि × × यां स्या × × ते कव्यादिकी क्रिया ॥

Colophon :

षण्णवतिश्राध्दसमाप्तिवाक्यं यथा—

इति बोधायनीये षण्णवतिश्राध्दनिर्णयः ॥

Extra Information :

ग्रन्थेऽस्मिन्– श्राद्धभेदाः, श्राद्धकालः, षण्णवतिश्राद्धाः, विश्वेदेवाः, श्राद्धदेशाः, विप्राः, वर्ज्यविप्राः, कर्तृभोक्तृनियमाः, सव्यापसव्यविचारः, आचमनविधिः, दर्भाः, पवित्रत्यागकालः, श्राद्धद्रव्याणि, पाकाधिकारिणः, पाकभाण्डं, पचनाग्निः, श्राद्धारम्भकालः, अर्चनविधिः, भोजनमण्डलं, परिवेषणं, कर्तृजप्या मन्त्राः, भोजनकाले भोक्तृनियमः, स्थानविचारः, पिण्डविषयः, उच्छिष्टोद्वासनं, ग्रहणश्राद्धविचारः, इत्यादयः विचारा वर्तन्ते। सप्रयोगोऽयं ग्रन्थः बोधायनीयः ॥

1394

Sl. No. 9299 षष्ठीनिर्णयः Ms. No. P. 5723/41

Beginning :

अथ षष्ठी तु सप्तमीयुक्ता ग्राह्या युग्मवाक्यात्। विष्णुधर्मोत्तरे–

एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी।
अमावास्या तृतीया च ताः उपोष्याः परान्विताः ॥

End:

ब्रह्मवैवर्ते–

सप्तमी नाष्टमीयुक्ता न सप्तम्या युताष्टमी ॥

वसिष्ठः–

एकादशी तृतीया च षष्ठी चैव त्रयोदशी।
पूर्वविद्धा तु कर्तव्या यदि न स्यात्परेऽहनि ॥ इति ॥

Colophon :

इति षष्ठीनिर्णयः ॥

1395

Sl. No. 9301 षोडशमहादानविधिः Ms. No. P. 6876/1

Beginning :

हरिः ॐ षोडशकर्मसारा लिख्यन्ते–

आदावन्तेषु यज्ञेषु संस्कारेषु शुभेषु च।

सम्पूज्य गन्धमाल्याद्यैर्ब्राह्मणान् स्वस्ति वाचयेत्॥

धर्मकर्मणि माङ्गल्ये सङ्ग्रामेऽद्भुतदर्शने।
साध्यकर्मणि सर्वत्र यात्रायां स्वप्नदर्शने ॥

End :

ब्राह्मणान् भोजयित्वा आशीर्वचनं गृह्णीयात्। आ नो भद्राः शं न इन्द्राग्नीत्यमूषु वाजिनम्। श्री हरये नमः ॥

Colophon:

इत्युपाकर्मविधिः ॥

1396

Sl. No. 9303 **षोडशमहादानविधिः** **Ms. No. P. 4180/92**

Beginning :

अथ षोडशमहादानम्—

कन्यां कनकदासीं च शकटाश्वगजं गृहम्।
लाङ्गूलं कालपुरुषं कालचक्रं गवां महीम् ॥
स्वर्णशृङ्गीं च महिषीं तुलापुरुषमेव च।
आर्द्रकृष्णाजिनं चैव उभयतोमुखिषोडशी ॥

End :

पात्राण्युच्चालयेत्तेषां स्वयं शिष्योऽथ वा सुतः।
न स्त्रीभिर्न च बालाभिर्नान्यगोत्राणि वर्जयेत् ॥

Colophon :

-- -- --

1397

Sl. No. 9304 **षोडशश्राद्धनिर्णयः** **Ms. No. P. 2117/14**

Beginning :

इदानीं षोडशश्राद्धस्वरूपं कालमेव च।
कर्तव्ये च तथाऽवश्यं अभिधास्याम्यनुक्रमात् ॥
अविकारेण पूर्वोक्तमेकोद्दिष्टविधिर्न चेत् ॥

End:

सपिण्डीकरणादूर्ध्वं पृथक्पिण्डं न योजयेत् ॥
पृथक्त्वे तु कृते तस्य पुनः कुर्यात् सपिण्डताम् ॥

Colophon:

-- -- --

1398

Sl. No. 9305 षोडशोपचारविवरणम् Ms. No. P. 5984/3

Beginning :

आवाहनेन यो विद्वन् शतक्रतुफलं लभेत् ।
आसनं रुचिरं दत्त्वा शक्रत्वं समवाप्नुयात् ।

End :

सर्वकामस्तु नैवेद्यं दत्त्वा तृप्तिमना भवेत् ।
फलेन पुत्रवान् मर्त्यः ताम्बूलात्स्वर्गमाप्नुयात् ॥
प्रदक्षिणं ततः कृत्वा पापं हन्ति दिने दिने ॥

Colophon :

-- -- --

1399

Sl. No. 9306 सङ्करजातिनिर्णयः Ms. No SP. 904/9

Beginning :

स्मृतिदर्पणे जातिविवेकप्रशंसायां याज्ञवल्क्यः–

क्षत्रियाद्वैश्यकन्यायां माहिषोऽम्बष्ठ इत्यसौ ।
आयुर्वेदानथाष्टाङ्गान् पठेदेषः स्ववृत्तये ॥

End :

लक्षणोद्धारणं कृत्वा ततः शिल्पिनमुत्सृजेत् ।
शिल्पिहस्तस्पर्शदोषशान्तये शान्तिमन्त्रतः ॥
जलधिवासनं कुर्यात् ; मृद्गव्यपल्लवादिभिः इति आगमे ॥

Colophon :

1400

Sl. No. 9307 सङ्कल्पकालनिर्णयः Ms. No. B. 5726/111

Beginning :

अथ सङ्कल्पकालाः— यज्ञपार्श्वः। प्राणानायम्य, सङ्कल्प्य, आदौ सर्वेषु कर्मसु इदं करिष्ये ; इत्येवं कुर्यात् ; तत्कर्म निर्दिशेत् ॥

End:

तिथिवारनक्षत्रयोगकरणान्युक्त्वा उपनेष्ये ; विवाहं करिष्ये ; ज्योतिष्टोमेन यक्ष्ये ; स्नानं करिष्ये ; प्रातस्सन्ध्यामुपासिष्ये ; ते अमुकदानमद्य करिष्ये ; इति सङ्कल्प्य, उपक्रमेत् ॥

Colophon :

इति सङ्कल्पवाक्यम् ॥

1401

Sl. No. 9308 सङ्कल्पतार्क्ष्यः Ms. No. C. 2738

Beginning :

व्यङ्कटरमणं ध्यात्वा सत्कुलतुष्ट्यै हि पारिजातस्थम्।
व्यालोड्याधं त्वनुदत्सङ्कल्पालोकतार्क्ष्यं सः ॥१॥ ++
तत्र सत्कर्ममुख्याङ्गः सङ्कल्पः स्मृतिचोदितः।
तस्मिन् सत्कर्ममुख्याङ्गसङ्कल्पविषये तु यः ॥३॥

End :

संस्कारेण तामनूद्येताश्विकरणत्वेम द्वितीयायां तिथौ प्रतिपद्व्रतं करिष्य ; इति सङ्कल्पो न कार्यः ; निषिद्धत्वात् , प्रत्यवायश्रुतेश्चेति निष्कृष्टोऽर्थः ॥

Colophon :

इति श्रीमङ्गलाचरणसम्भाविताभिधानविरचिते सङ्कल्पतर्क्ष्ये सङ्कल्पजीवनोध्दाराख्यः प्रथमः पटलः ॥

1402

Sl. No. 9309 सङ्कल्पश्राद्धनिर्णयः Ms. No. P. 5726/93

Beginning :

× × × कालः । तत्र शातातपः –

कृष्णपक्षोष्टकादर्शो वृद्धिरादित्यसङ्क्रमः ।
चन्द्रसूर्यग्रहोत्पातश्राद्धच्छायागजच्छविः ॥
मृतिर्विप्रद्रव्यसम्पत् कालास्थित्यादिपञ्चकाः ॥

End :

सङ्कल्पमेव कर्तव्यं पार्वणन्त्वन्यथा भवेत् ॥

शातातपः –

महातीते गयाश्राद्धं × × त्रो × × हनि ।
कृत्वोद्धा × × × × पिण्डनिर्वापणं बुधः ॥

इति प्रागुक्तम् ॥

Colophon :

इति सङ्क्रान्तियुगादिमन्वादिश्राद्धकालः ॥

1403

Sl. No. 9311 संक्रान्तिनिर्णयः (संक्रमस्नाननिर्णयः) Ms. No. P. 970

Beginning :

एककाले पुत्रजन्मसंक्रान्तिचन्द्रसूर्योपरागेषु द्विजैर्भुक्त्वापि स्नानदानादिकाः कार्या इति रत्नावल्याम् ॥

End :

तत्तद्देशप्रसिद्धशिष्टाचारेण व्यवस्था द्रष्टव्येति कालनिर्णयकारपक्षस्येत्तिथि (?) । अतो यथोक्तविधयैव इह निर्णय इति निरसूयैरवहितमनस्कैरवधातव्यम् ।

सतां मुदेऽनसूयानां संक्रमस्नाननिर्णयः ।
परस्पराविरोधेन परकालोऽलिखद्यतिः ॥

Colophon :

1404

Sl. No. 9325 सङ्घातमरणक्रमनिर्णयः Ms. No. P. 5723/92

Beginning :

अथ सङ्घातमरणे क्रमः –

सह म्रियन्ते बहवः कर्ता × × कस्तथापि च ।
अन्तरङ्गक्रमेणैषां दहनादि यथाक्रमम् ॥
मरणक्र × × × × द्या मरणानुक्रमेण तु ॥

End :

कुर्यात्संवत्सरादर्वाक् श्राद्धमेकन्तु वर्जयेत् ।
द्वादशाहे सपिण्डन्तु अन्यैरपि यथाक्रमात् ॥

स्मृत्यन्तरेपि–

पितरौ प्रमृतौ यस्य देहस्तस्याशुचिर्भवेत् ।
पितृकर्मा × × × × × × × कारयेत् ॥

Colophon :

इति युगपन्मरणे क्रमभेदः ।

1405

Sl. No 9327 सञ्चयनविधिः Ms No P.5723/82

Beginning :

वर्णाशौचं त्रिधा कृत्वा प्रथमे सञ्चयः स्मृतः ।
द्वितीयभागे विप्राणां सञ्चयो मध्यमः स्मृतः ॥
तृतीयभागे हीनः स्यात् अस्थिसञ्चयने कृते ॥

End :

अङ्गिराः–

एकादशसु विप्रेषु रुद्रानुद्दिश्य भोजयेत् ।
प्रेतत्वस्य विमोकार्थं मधुक्षीरघृताशनैः ।
तस्मिन्नहि यथाशक्ति कुर्याद्ब्राह्मणभोजनम् ॥

Colophon :

— — –

1406

Sl. No. 9328 सन्ततिप्रशंसा Ms. No. P. 5894/1

Beginning :

........हीनो भवेल्लोके कोन्यस्तस्मादचेतनः ।
पुत्रहीनं वृथा जन्म पुत्रहीनं वृथा तपः ।
पुत्रहीनं वृथा रूपं पुत्रहीनं वृथा महः ॥

End :

पञ्च पर्वसु यः पत्नीं रमेत्कामातुरो भुवि ॥
सोऽनपत्यो भवेत्पत्न्यां मृतो नरकमाप्नुयात् ॥

Colophon :

-- -- --

1407

Sl. No. 9329 सन्ध्याकालनिर्णयः Ms. No. P. 2380/14

Beginning :

माध्याह्निकमपि न सन्ध्यावन्दनम्; सन्ध्यावन्दनलक्षितत्वाभावात् । सन्ध्या-ज्योतिः । आज्योतिर्दर्शना सन्ध्या; इति छान्दोग्यम् । माध्याह्निके तदभावान् न सन्ध्या ॥

End :

उत्तमा तारकोपेता मध्यमा लुप्ततारका ।
अधमा सूर्यसहिता मध्यमा लुप्तभास्करा ॥
अधमा तारकोपेता सायं सन्ध्या त्रिधा मता ॥

सन्ध्याकालातिक्रमे गायत्र्याः अष्टोत्तरजपः प्रायश्चित्तम् ॥

Colophon :

- -- --

1408

Sl. No. 9331 | **सन्ध्यावन्दनपद्धतिः** | **Ms. No. B. 399**

Beginning:

इह खलु सकलसत्कर्मपरिगणनायामादितः परिगणनार्हस्य सन्ध्यावन्दनकलापस्य स्वरूपविशेषजिज्ञासा यथाकथञ्चिद्विगुणोऽपि – श्रेयान् स्वधर्मो विगुणः इति भगवदुपदेशात्स्वधर्मत्वेन श्रेयसीति हृदि निधाय निरन्तरशुश्रूषापरीतोऽपि तत्सदाचार्यमुखकमलोदीरितसिद्धान्तसारसागरान्निर्गलितमतिरहस्यामृतमाकलय्य यथायोगं प्रकाश्यते ॥

End

श्रीमान् राघवदैवज्ञवंश्यः श्रीकृष्णपण्डितः ॥
कारयामास हि स्पष्टं सन्ध्यावन्दनपद्धतिम् ॥
पूर्णानन्दस्वरूपाय दक्षिणामूर्तये नमः ।
अज्ञान् करोमीति दीक्षिताय स्वचिन्तया ॥

Colophon :

— — —

1409

Sl. No. 9342 | **सन्मार्गदर्पणम्** | **Ms. No. P 6816**

Beginning :

× × × × द्विलोकोऽयं मन्यते नरम् ।
नारायणाश्रयाः जीवाः सोऽयमष्टाक्षराश्रयः ॥
अष्टाक्षरस्सदाचारैः गुरुं तातद्विजं भजे ॥
दयया दशमोपेतं दृढभक्तिक्रियापरम् ।
सखवाकूशीलसम्पन्नं रेखाकर्मसु कौशलम् ॥

End :

आत्मानं अन्तरात्मेति परमात्मेति तत्पुरुषोद्देशः । 'यज्ञोपवीती पार्वण्यां × कुर्यान्न पैतृकम् ।' इति बोधायनवचनात् । तस्मात् यज्ञोपवीती पार्वणं कुर्यादित्युक्त्या पार्वणं त्रैवर्णिकविषयम् । अत्र त्रैवर्णिकानामकर्तव्यमित्यर्थः । अत्रै × × × × × × × × × × × × ॥

Colophon :

— — —

Extra Information :

ग्रन्थेऽस्मिन्– कुत्रापि ग्रन्थनामनिर्देशो न दृश्यते; परन्तु अन्तिमपत्रे मषिकया केनापि 'सन्मार्गदर्पणम्'– इति लिखितो लेखः परिदृश्यते। तदेतदनुसृत्य ग्रन्थनामनिर्देशः कृतः ॥

1410

Sl. No. 9343 संन्यासकारिकाः Ms. No. C. 199/5

Beginning :

आपन्ने सङ्कटे घोरे चोरे व्याघ्रादिसङ्कुले।
भयभीतस्य सन्न्यासमङ्गिरा मुनिरब्रवीत् ॥ १ ॥
प्रवाहमध्ये पतित × शत्रुमध्ये गतोऽपि वा।
तदैव सन्यसेद्विद्वानातुरो वाथ दुःखितः ॥

End :

ममाक्षय्यब्रह्मलोकावाप्त्यर्थं द्विजसन्निधौ।
कुर्वेऽहमापत्सन्न्यासमित्युच्चार्य × × × ॥
× × × × × × ।
× × × × × × ॥

Colophon:

— — —

1411

Sl. No. 9344 संन्यासनिर्णयविवरणम् Ms. No. C. 1546

Beginning :

नमामि तातचरणान्स्वयातां (?) सर्वकामदान्।
यैः कृता — — — स्वाधीनार्थप्रकाराः कृपया मयि ॥
स्वमार्गीयपरित्यागं वक्तुं तद्धेतुमाहुः – पश्चात्तापनिवृत्त्यर्थमिति ॥

End :

पितृपदाब्जकृपया विवृतोऽस्ति यथामति।

सन्यासनिर्णयरतेन प्रसीदन्तु महेश्वराः ॥

भक्तिमार्गेषु पर्याये सिद्धान्ते सर्वथा मयि ।
तैरेव च कृतार्थोऽहमिति मे सुदृढा मतिः ॥

Colophon :

इति श्रीमत्प्रभुचरणैकधनेन श्रीवल्लभेन विरचितं सन्यासनिर्णयविवरणं सम्पूर्णम् ॥

1412

Sl. No. 9345 संन्यासपद्धतिः Ms No. P. 3121/1

Beginning :

अथ जीवश्राद्धप्रयोगः । अथ संन्यासविधिं व्याख्यायास्यामः– नारायणार्थं भागवतान् यतीन् पूर्वेद्युरपि ब्राह्मणान् भोजयेत् । चतुर्मूर्त्यर्थं चतुरोऽष्टौ भागवतान् भोजयेत् ॥

End :

नानानिबन्धकुसुमसारमुध्दृत्य निर्मितम् ।
सन्यासपद्धतिम × × सिभिस्सेव्यतां सदा ॥
सङ्गृहीतमिदं शास्त्रं यतीनां मोक्षसाधनम् ।
अनेन वरदो योगनारसिंहः प्रसीदतु ॥

Colophon :

इति श्रीरङ्गपतिभिक्षुविरचिता परमहंससंन्यासपद्धतिः समाप्ता ॥

1413

Sl. No. 9346 संन्यासपद्धतिः (संस्कारप्रकाशः) Ms. No. C. 1953

Beginning :

अथ संन्यासकर्तारं प्रति ब्रह्मानन्दीयपद्धतिमनुसृत्य प्रयोगमात्रमुच्यते । तत्रादौ औपासनाग्नियजमानं प्रति तादृशविधुरं प्रति च प्रयोगः । तत्रादौ निस्पृहः सर्वशः शान्त इत्यादिलक्षणैर्युक्त भिक्षुकं गुरुं संशोध्य तन्निकटे वर्षमेकं षण्मास + + + + उपवसेत् ॥

End :

दिवंगते गुरौ शिष्यैस्तदा कार्यमुपोषणम् ।

स्नात्वा सचेलं यतिभिरेषधर्मः सनातनः ॥

न स्नानमाचरेद्भिक्षुः पुत्रादिनिधने श्रुते ।
पितृमातृक्षयं श्रुत्वा स्नानाच्छुध्यति सांवर ॥ इति ॥

Colophon :

इति प्रतिष्ठानपुर वासिनारायणात्मजरुद्रदेवकृते प्रतापनृसिंहाख्ये संस्कारप्रकाशे यतिसंस्कारोपयोगनिर्णयः । संन्यासपद्धतिः समाप्ता ॥

1414

Sl. No. 9347 संन्यासप्रायश्चित्तम् Ms. No. 1522/4

Beginning :

संन्यासयोग्यतासिद्ध्यर्थं प्रायश्चित्तम्–

कृच्छ्रांस्तु चतुरः कृत्वा पावनार्थमनाश्रमी ।
आश्रमी चेत्तप्तकृच्छ्रं तेनासौ योग्यतामियात् ॥

प्राजापत्यानुकल्पः –

प्राजापत्यक्रियाशक्तौ धेनुं दद्याद् द्विजोत्तमः ॥

End :

संप्रेत्य वसितानां च महापातकिनां तथा ।
व्रात्यानामभिशस्तानां संन्यासं नैव कारयेत् ॥
प्रेतयज्ञतपोदानहोमस्वाध्यायवर्जितम् ।
सत्यशौचपरिभ्रष्टं संन्यासं नैव कारयेत् ॥

Colophon :

— —

1415

Sl. No. 9349 संन्यासविधिः Ms. No. C. 1863

Beginning :

आनन्दरूपं विभुमप्रमेयं विद्यासुपूर्णं परतः परेशम् ।
नारायणं दैवतमग्रगादं ...

श्यामं नितम्बार्पिततन्तुमेखलं विद्यानिधिं ज्ञानमहागुणाढ्यम् ।
निर्देशकं ज्ञानमहासुमार्गं व्यासं मुनीनामहमानतोऽस्मि ॥

End :

एवं हि विष्णुतीर्थेन प्रसादाद् गुरुकृष्णयोः ।
शिष्यो गुरुश्चाधिकारी सम्मतोऽत्र निरूपितः ॥
नमो नमो शेषचिदेकसारगुणैकधाम्ने पुरुषोत्तमाय ।
स्वभक्तसंसारविनाशनाय परामृतानन्दपदप्रदायिने ॥

Colophon:

इति श्रीमद्विष्णुतीर्थकृतः संन्यासविधिः समाप्तः ॥

1416

Sl. No. 9352 **संन्यासविधिः** **Ms. No. C. 199/1**

Beninning :

अथ चतुर्थाश्रमो निरूप्यते । स च 'पश्चात्प्रव्रजितो भवेत्'। इति पूर्वोदाहृत-वाक्यशेषेण विहितः । तत्राश्रमसमुच्चयपक्षमभिप्रेत्य पश्चादित्युक्तम् । यदा तु प्राग्भवीयसुकृत परिपाकात् बाल्य एव वैराग्योत्पत्तिस्तदा ब्रह्मचर्यादेव प्रव्रजेत् ॥

End :

अथ प्राङ्मुखोपविष्टाय शिष्यायोदङ्मुखोपविष्टो गुरुर्महावाक्यान्युपदिशति ; प्रणवं चोपदिशति ; नामपञ्चकीकृतवाक्याभिधानं करोति ; प्रणवं न्यासञ्च । ततः श्रीगुरूणां नमस्कारः । गुरुसेवां कुर्यात् ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यशङ्कराचार्यविरचितः परमहंससंन्यासविधिस्समाप्तः ॥

1417

Si. No. 9354 **संन्यासाधिकारः** **Ms. No. C. 1522**

Beginning :

संन्यासस्य कालनिषेधः—

अथ नित्यनिमित्तं च दानं च महदाह्निकम् ।

आश्रमस्वीकृतिः काम्यवृषोत्सर्गश्च निर्गतः ॥

अग्न्याधानाध्वरापूर्वतीर्थयात्राषरेक्षणम् ।
देवारामतटाकादिप्रतिष्ठामौञ्जिबन्धनम् ॥

End

व्रात्यानामभिशस्तानां संन्यासं नैव कारयेत् ।
मूकानां बधिराणाञ्च ह्यन्धानां पापकर्मणाम् ॥
तथैव विकलाङ्गानां संन्यासो न विधीयते ॥

Colophon :

इति संन्यासाधिकारः ॥

1418

Sl. No. 9355 संवत्सरादितिथिनिर्णयः Ms. No. P. 2634

Beginning :

अधिमासस्तयोराद्यः शुद्धमासः परो भवेत् ।
तत्र प्लवे केचिदाहुरधिकं – – – – – – – – ॥
परं परेत्वाद्यमाहुरधिकं – – – – – विपश्चितः ।
तत्र वच्मि दिनषष्टिकल्पनामेतयो × × × × ।
× × × × × × × × ।

ग्रन्थान्तरे–

क्रमादुपगते सूर्ये वृश्चिके वाथ धन्विनि ।
मकरे वाथ कुम्भे वाधिमासो विधीयते ॥

End :

उभयोरथ भावेन सन्ध्यायान्तु महोत्सवः ।

देवलः–

कृत्तिका द्वादशी शुक्ला रेवत्यर्कसमन्विता ।
उत्तिष्ठते तत्र विष्णुर्विमुक्तो योगनिद्रया ॥

भविष्योत्तरपुराणे ॥

Colophon :

– – –

1419

Sl. No. 9356 **संवत्सरोत्सवकल्पलता** **Ms. No. C. 1007**

Beginning :

कायवाङ्मनसा नित्यं वन्दे वल्लभनन्दनम् ।
श्रीविठ्ठलेशपादाब्जपरागारक्तचेतसा ॥
पाक्षि × × प्रवृत्तानां भक्तानां बोधसिद्धये ।
तथा चैकादशस्कन्धे श्रीकृष्णेनोत्सवं प्रति ॥

End:

कृत्वा प्रदक्षिणं - - - प्रणमेद्दण्डवद्भुवि ।
ततो गोपीशमुत्थाप्य डोलामुद्रा सयेत्तथा ॥ १ ॥
ऋक्भिः प्राप्तेच्छुभिः कार्यो चैवं डोलामहोत्सवः ॥

Colophon :

इति श्रीसंवत्सरोत्सवकल्पलतायां फाल्गुनोत्सवनिरूपणं नाम सप्तमं दलम् ॥

1420

Sl. No. 9357 **संवत्सरोत्सवादिनिर्णयः** **Ms. No. C. 1051**

Beginning :

श्रीमदाचार्यचरणान् प्रभुं श्रीविठ्ठलेश्वरम् ।
मत्वोत्सवानां × × × × × ।
तत्र प्रथमं अष्टमी समय एव निर्णयः ॥

End :

लीलाविचेष्टितं यस्य प्रथमं सह × × × × ।
× × × × × × × मूलाविद्यानिवर्तकम् ॥
पश्यन् द्वितीयं × × × ×·× × × ॥

Colophon :

— — —

1421

Sl. No. 9358 संसर्पाँहस्पत्यधिमासनिर्णयः Ms. No. P. 3958/3

Beginning :

श्रीमद्विष्णुमहोरसि प्रविलसत्कारुण्यपूर्णोज्ज्वला
या सा पद्मनिवासिनी भगवती × जातहस्ता चिरम् ।
यत्करुण्यनिरीक्षणो क्षणवशात् लब्धाष्टभूतिश्शिवः
पद्मा सा जयतात् मदीय × × तिभिः तुष्टान्तरङ्गे × दा ॥

संसर्पांहस्पत्यधिमासनिर्णयः क्रियते ॥

End :

डामरतन्त्रे–

संसर्पेऽपि च कर्तव्यं नवदुर्गाप्रपूजनम् ।
पूर्ववि × न × प × विद्धां च कारयेत् ॥
तस्मिन् संसर्पके मासि नवरात्रव्रतादिकम् ।
सम्पूज्य नवदुर्गाञ्च नक्तं कुर्यात्समाहितः ॥ इति ॥

Colophon :

— — —

1422

Sl. No. 9359 संस्कारनिर्णयः Ms. No. P. 7966/1

Beginning :

प्रणिपत्य महादेवं चन्द्रचूडेन धीमता ।
संस्काराणां प्रयोगस्य निर्णयः क्रियतेऽधुना ॥

तत्रादौ गर्भाधानमुच्यते – तत्रप्रथमरजोदर्शने × × महागर्गः प्रथमर्तौ तु पुष्पिणी – – – कृत्वा तस्मिस्तामुपदेशयेत् ॥

End :

जयादिप्रतिपद्यते । शम्याश्च परिध्यर्थे कर्मशेषं समापयेत् । ततोऽधिकममात्यानां शरीरनाशे तच्छान्त्यर्थं दक्षिणतः इमं जीवेभ्यः परिधिं दधामि; पर्वतेन + + + + इत्यलमतिविस्तरेण ॥

Colophon :

इति श्रीमत्पौराणिकभट्टसूनु-विद्वन्मुकुटमाणिक्य-तिम्मणभट्टसूनुचन्द्रचूडभट्टविरचितः संस्कारनिर्णयः समाप्तः ॥

1423

Sl. No. 9361 संस्कारकौस्तुभः Ms. No. P. 5055/1

Beginning :

पञ्चम × × तु षड्वात्र आशौचं परिकल्पयेत् ।
षष्ठस्य तु चतूरात्रं पञ्चमे तु त्र्यहंस्मृतम् ॥

इति बहुद्रव्यमुद्दि ष्टैरनादृत चिन्त्य × × × ति वदता स्मृतिसङ्ग्रहकारेण आचार मे × × × प्रबलीकृततदभावाद्वचनानां कण्ठतयैवाप्राण्यमुक्तम् ॥

End :

अन्यत्रापि–

प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखम् ।
न नि × नन्ति राजेन्द्र सुराकुम्भमिवापगाः ॥

स्मृत्यन्तरे –

कायेन वाचा + + + + प्रकृतिस्वभावात् ।
करोमि यद्यत् + + + नारायणायेति समर्पयामि ॥

Colophon :

इति श्रीदक्षिणसमुद्राधीश्वरविश्वनाथमहीपालकुलतिलकस्यासकृदावर्तिततुलापुरुषादिषोडश-दानमहाशनमहाध्वरस्य + + + + + + रायसवेङ्कटाद्रिणा विरचिते स्मृतिकौस्तुभे + + + चतुर्थ प्रकरणं समाप्तम् ॥

1424

Sl. No. 9364 संस्कारनिर्णयः (चन्द्रचूडीयः) Ms. No. P. 3205/2

Beginning :

अथ सीमन्तोन्नयनमुच्यते – सीमन्तोन्नयनमिति कर्म नामधेयम् । तस्य काल उक्तः

सीमन्तोन्नयनं प्रथमगर्भे चतुर्थे मासि । वसिष्ठः–

चतुर्थे सप्तमे मासि षष्ठे × × स्याथवाष्टमे ।
कृष्णाजिनः गर्भलाञ्छनमारभ्य यावनप्रसबस्तदा ॥ (?)

End:

इत्येकादशा × × हुतीर्हुत्वा जयादिप्रतिपद्यते ।
शम्याः परिध्यर्थे – – – – कर्मशेषं समापयेत् ॥

ततोऽधिकममा × × × × × × × मज्जिवेभ्यः परिधिं दधामि ; मैषावधत्तां सर्वं तेन ; इति ऋतोरन्तर्धानभूतमश्मानं निदधाति । तस्य शुभमिच्छता चालीनं न कार्यमि × × × × × ॥

Colophon :

इति श्रीमत्पौराणिकधर्मभट्टसूनु-श्रीमद्विद्वन्मकुटमाणिक्यतिम्मणभट्टसूनु-चन्द्रचूडभट्ट-विरचिते संस्का × × × × × × ॥

1425

Sl. No. 9368 संस्कारप्रायश्चित्तम् Ms. No. P. 5726/143

Beginning :

अथ संस्कारातिप्रायश्चित्तम् । शौनकः–

आरभ्याधानमाचौलान् कालातीतन्तु कर्मणाम् ।
आज्यव्याहृतिभिर्हुत्वा प्रायश्चित्त विधीयते ॥

End :

वैवाहे तु यथाशक्ति आधाने शतभोजनम् ।
सहस्रं भोजयेत्सोमे ब्राह्मणानां शतं पशौ ॥
चातुर्मास्येषु सर्वेषु शतं पर्वणि पर्वणि ॥

Colophon :

1426

Sl. No. 9369 सकलसाररत्नावली Ms. No. P.4990/2

Beginning :

द्यावेश × × खन्यावादम् ।
वृताचार्यहिंस्रमन्त्रप्रयोगं शस्त्राभ्यासं स्या × × श्रे × × पश्चे विधेयम् ॥
स्थिरक्रियामङ्गलपौष्टिकादि × × ह यज्ञादि × परिग्रहश्च ।
नृपाभिषेकाम्बरदूषणानि सिद्ध्यन्त्यहिर्बुध्न्यहयं युतश्च ॥

End :

विक्रान्तो मतिमान् शूरः संग्रामेष्वपराजितः ।
दृढवैरी म × × ाही तुलांशे जायते नरः ॥
कृतघ्नो मत्सरी रूक्षः क्लेशभोगी वसुप्रजः ॥
फलकालपरि ॥

Colophon :

— — —

1427

Sl. No. 9370 सगोत्रनिर्णयः Ms. No. P. 4776/5

Beginning :

सगोत्रान्येदमत्योण्यच्छां मातृवदेनां विभृयात् । सगोत्रां गत्वा चान्द्रयणमुपदिशेत् द्वे ते परिनिष्ठिते । ब्राह्मणी दैन्त्यजैत्रभागिनीगर्भो न दूष्यः; इति काश्यप ; इति विज्ञायते ॥

End :

उत्तमैरुत्तमैस्साधं सम्बन्धानाचरेद्बुधः ।
न निष्ठः कुलमुत्कर्षमवमानसमं त्यजेत् ॥ इति ।
एवं निश्चेतव्यमिति निश्चितं पश्चाद्विपश्चिदपश्चिमानां निर्मत्सराणां सन्तोषाय ॥

Colophon :

— — —

1428

Sl. No. 9371 सगोत्रस्वीकारनिर्णयः Ms. No. P. 8703/7

Beginning :

वैद्यनार्थीये–

क्षेत्रजो गर्हितः सद्भिः तथा पौनर्भवस्सुतः ।
कानीनश्च सहोढश्च गूढजः पुत्रिकासुतः ॥
दत्तोऽपविद्धः क्रीतश्च कृत्रिमो × × त्रिमस्तथा ॥इति॥

अत्र दत्तनिषेधस्स्वसगोत्राभिप्रायः । यदाह शौनकः–

ब्राह्मणानां सपिण्डम्तु कर्तव्यः पुत्रसङ्ग्रहः ।
तदभावे सगोत्रे वा न चान्यत्र तु कारयेत् ॥

Edn :

दत्तस्य परिवेतृत्वमाशौचं दायमेव च ।
गृहीतगोत्रात्सङ्ग्राह्यं श्रौतं स्मार्तं तथैव च ॥ इति ।

तत्सर्वं सगोत्राला ॥

Colophon :

— — —

1429

Sl. No. 9372 सच्चरित्रसुधानिधिः Ms. No. P. 725/3

Beginning

श्रीशं श्रियं च सेनान्यं + + । + + पुनः पुनः ॥
+ + + + + + + + + +

जनकात्मजरघुकर्यै पितरौ स्वौ बहुसंप्रणम्य जगत्प्रभु वीरराघवनामवानिह नैध्रवः कुरुतेऽधुना । सच्चरित्रसुधानिधिं रघुवीर चोदित आदरात् । (?)

आचाराणामपूर्वोक्तैर्मनु तु बोधायनादिभिः । + + + +
क्रियतेऽद्य समारम्भः तत्पीणात् हरिस्स्वयम् ॥

ब्रह्मे मुहूर्ते कर्तव्यं विण्मूत्रोत्सर्जनं ततः ।
द्विशचमनस्यपि निमित्तान्यथ तस्य च ॥

End :

नामपादैः प्रणीतोऽभिगमनादिविधिर्मुदे ।
प्रेमेऽब्दे मासि गानज्ञे सेनातारे प्रवासरे ॥
श्लोकैः कृतो रविचयैः सच्चरित्रसुधानिधिः ॥

Colophon:

— — —

1430

Sl. No. 9376 सच्छूद्राचारनिर्णयः **Ms. No. P. 5256/2**

Beginning :

जयति भुमनजन्मस्थेममोक्षादिलीलं
सहजसकलकल्याणैकतानं महीयः ।
अपि च निखिलहेयप्रत्यनीकं तदेकं
वटदलशयनीयं ब्रह्म लक्ष्मीसहायम् ॥

End :

अमन्त्र्यमुपचारः । पूर्वाह्णः कालः । जातकर्मादिषु निमित्तानन्तरकालः । पृषदाज्येनाग्नौ करणं नेच्छन्ति । तत्र तत्तद्देशाचारश्च प्रमाणम् । अन्ये च विशेषाः देशाचारप्रसाः यथायोग्यं स्वीकार्याः ॥

Colophon :

इति श्रीमता + + देवराजस्य पौत्रेण + + श्रीचिक्कदेवमहाराजेन कृते सच्छूद्राचारनिर्णये शूद्राणां कर्मप्रयोगाधिकारः चतुर्दशः ॥

1431

Sl. No. 9378 सच्छूद्राचारस्मृतिसङ्ग्रहः **Ms. No. A. 205**

Beginning :

सूतसंहितायाम् —

यस्य विज्ञानमात्रेण ब्राह्मणा क्षत्रिया विशः ।

यथार्थं ब्रह्म जानन्ति तन्नुमः परमाद्वयम् ॥

यस्य विज्ञानसम्पन्नाश्शूद्रा अपि च सङ्कराः ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥

पराशरस्मृतौ –

चातुर्वर्ण्यसमाचारं किञ्चित्साधारणं विदुः ।
चतुर्णामपि वर्णानां कर्तव्यं धर्मकोविदाः ॥

End :

तथा वर्णा ज्ञानहीनाः पतन्ति घोराद्घोरं प्राकृतं योनिजातम् ।
तस्माद्ज्ञानं सर्वतो मार्गितव्यं सर्वत्रस्थं चैवमुक्तं मया ते ॥
यद्वै दृष्टं तन्मयं चोपदिष्टं याथातथ्यं तद्विशोको भव त्वम् ॥

Colophon :

इति सच्छूद्रस्य ब्रह्मज्ञाताधिकारः ।
इति सच्छूद्राचारस्मृतिसङ्ग्रहः समाप्तः ॥

1432

Sl. No. 9380 सतीभूषणम् Ms. No. P. 2052

Beginning :

भास्वद्वंशसमुद्भवं सुमनसां ध्येयं हृदा सन्ततं
शुद्धं त्रासविवर्जितं श्रुतिशिखासीमन्तविद्योदितम् ।
आकिञ्चिन्यजुषामयत्नसु × × × ×
× × × × × × × × × ॥
+ + + + + + + +
वासुदेवपदाम्भोजे चैणवृत्तिं विधाय यः ।
कुरुते सकलान् धर्मान् कलयन् कलिनिग्रहम् ॥

End :

श्रुत्वैवं बसवमहीपतिः समस्तान्
सद्धर्मान् धरणिसुपर्ण × स्समुख्यैः ।
सम्पूज्य क्षितिसुरपुङ्गवान् प्रहृष्टा-
रङ्गेणः (?) परिचरणे रता मुदास्ते ॥

सतीभूषणमेतद्धि रचितं हरिशिल्पिना ।
वहन्तु....सुकण्ठे मोदतां पुरुषोत्तमः ॥

Colophon :

इति सतीभूषणे द्वात्रिंशोऽध्यायः ॥

1433

Sl. No. 9382 **सत्तरणतरणिः** Ms. No. A. 18

Beginning:

यशो न माति त्रिजगत्सु यस्य यच्चर्यामुदारामनुकुर्वते नृपाः ।
येनैव कर्णाटवसुन्धरा चिरात् राजन्वती भाति स चामभूपतिः ॥
इह खलु सर्व एवाधुना समुद्रयानगोचराणि शास्त्राणि जिज्ञासन्ते ॥

End :

इति धर्मशास्त्ररहस्यविदां पन्थाः ।
यं श्रीरङ्गेन्द्रनामा + + सम्मतान्यन्वबादीत् ॥१॥
विद्वांसः पारिषद्याः स्मृतिनयनसृतिगं धर्ममावेदयन्ते ।
सोऽसौ सर्वैर्ग्रहीतुं समुचित इति नः सन्मतं स्यात् ॥

Colophon :

इति सत्तरणतरणिः संपूर्णा ॥

1434

Sl. No. 9384 **सदाचारदर्पणम्** Ms. No. C 2396

Beginning :

यः सदागमविज्ञेयो यदर्थं कर्मचोदना ।
यदर्पित कर्मपर्ण तं श्रीमध्वप्रियं भजे ॥
अनुसृत्य सदाचारस्मृतेः [illegible] ।
दैनन्दिनसदाचारदर्पणं क्रियते मया ॥

End :

अथ विधवाधर्मः –

विधवानां व्रतस्थाना यतिवच्छौचमिष्यते ।

मदनपारिजाते–

व्रतोपवासनियमे यदि धर्मो निगद्यते ।
स्नानं त्रिषवणं तासां अवरूणमवं विधिः ॥
तर्पणं प्रत्यहं कार्यं भर्तुः कुशतिलोदकैः ।
तत्पितुस्तत्पितु × × × × ॥

Colophon :

-- -- --

1435

Sl. No. 9385 सदाचारनिर्णयः (एरुम्बिलप्पीयः) Ms. No. P. 7566

Beginning :

अथ सदाचार उच्यते × × × × अभ्यनुज्ञातो यो धर्मः × × × × वर्णधर्मः, आश्रमधर्मः वर्णाश्रमधर्मः, गुणधर्मः निमित्तधर्मः साधारणधर्मश्चेति । तत्र वर्णः नित्यं मद्यं ब्राह्मणो वर्जयेदित्यादि ॥

End :

एकादश्याधिकद्वादशीविषये सूर्योदयानन्तरयोः सत्व एव शिष्टानामाचारदर्शनम् । तदुप- × × × × × तम् । प्रमाणप्रवृत्तिस्तु उक्तप्रकारे वेति ॥

Colophon :

आह्निकं समाप्तम् । इन्द आह्निकं सादित्रदु एरुम्बिलप्पा ॥

1436

Sl. No. 9336 सदाचारसङ्ग्रहः (स्मृतिनवनीतम्) Ms. No. P. 827

Beginning :

धर्मात्मानं प्रणम्याहं धर्मस्य प्रभुमच्युतम् ।
करिष्ये धर्मशास्त्रेभ्यः सदाचारस्य सङ्ग्रहम् ॥

मनुः—

ब्राह्मे मुहूर्ते उत्थाय धर्मार्थावनुचिन्तयेत ।
कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थमेव च ॥

End:

मन्वादिस्मृतिदुग्धाब्धौ सारांशं नवनीतवत् ।
सङ्गृहीतं सतां प्रीत्यै तेन कृष्णः प्रसीदतु ॥
श्रीरामचन्द्रगुरुवर्यकटाक्षितस्सन्
श्रीश्रीनिवास × × र्यकृतात्मबोधः ।
स्मृत्यर्थसारनवनीतमिदं लिलेख
श्रीनारसिंह्मतनयो वृषभाद्रिनाथः ॥

Colophon:

इति स्मृतिनवनीते आ × × × × नाम प्रथमः काण्डः ॥

1437

Sl. No. 9389 सदाचारस्मृतिव्याख्या (कृष्णाचार्यीया) Ms. No. P. 93

Beginning:

श्रीनृसिंहमहं वन्दे सर्वारिष्टविनाशनम् ।
सर्वसम्पत्प्रदं देवं प्रह्लादवरदं विभुम् ॥
नत्वा श्रीमध्वपूर्णेन्दुं तापत्रयनिवारकम् ।
जयतीर्थव्यासतीर्थविजयीन्द्रादिकान् गुरून् ॥
विद्यागुरून् राघवेन्द्रान् × × भक्तानपि स्वयम् ।
स्मृतिमुक्तावलीं कृत्वा तथैवाह्निकसङ्ग्रहम् ।
सदाचारस्मृतिव्याख्यां करिष्यमि यथामति ॥

End:

प्रसादाय कृता व्याख्या सदाचारस्मृतेर्मया ।
श्रीमदानन्दतीर्थीयपादपङ्कजमुत्तमम् ॥
भजामि पुण्डरीकाक्षप्रसादाय विमुक्तये ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यकृतसदाचारस्मृतिटीका कृष्णाचार्यकृता समाप्ता ॥

1438

Sl. No. 9394 सदाचारस्मृतिव्याख्या (तन्त्रदीपिका) Ms. No. C. 1988

Beginning :

सर्वदाभिरतिर्मेऽस्तु श्रीकृष्णचरणद्वये ।
सर्वमङ्गलसम्पत्ति यं नत्वा प्रापिरे परे ॥ १ ॥
+ + + + + + +

अथ परमकारुणिको भगवानानन्दतीर्थमुनिः + ग्रन्थादौ महामङ्गलरूपं भगवन्तं स्तौति-यस्मिन्निति ॥

End:

सदाचारस्मृतिव्याख्या नामतस्तन्त्रदीपिका ।
वेदव्यासेन रचिता मुद्गलाचार्यसूनुना ॥
व्याख्यानमेतन्मम यत्करीषभागेन (?) चन्द्रार्धपरार्धवृत्तिः ।
तद्वत्तथाप्यस्ति कृताणुमात्रमालक्ष्य सन्तः परिमोदयन्तु ॥

Colophon :

इति श्रीमुद्गलतीर्थाचार्यसुत-श्रीहरिदासाचार्यशिष्येण मुद्गलवेदव्यासेम विरचिता तन्त्र-दीपिका समाप्ता ॥

1439

Sl. No. 9395 सदाचारस्मृतिव्याख्या (आह्निककौस्तुभः) Ms. No. C. 2052/2

Beginning :

व्यासं रमापतिं नत्वा गुरुन् परगुरूनपि ।
व्याख्यां करिष्ये प्रमितां सदाचारस्मृतेरहम् ॥
सदाचारस्मृतिव्याख्यारूपेणाह्निककौस्तुभम् ।
विरच्यते स्वधीशुध्यै श्रीनिवासाख्यसूरिणा ॥

End :

अशुद्धमथवान्य × सन्तो मयि दयापराः ।
प्रीतासिमापतव्यास (?) यदि केनापि कर्मणा ॥
कुरु मां मध्वशास्त्रस्य सदावृत्तिरतं हरे ।
वेदव्यासस्य सत्कण्ठे गुर्वाराध्यपदस्तथा ॥
भासतां रत्नमालाभस्त्वयमाह्निककौस्तुभः ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचित-सदाचारस्मृतिविवरणे श्रीमध्वाचार्यपादाराधकेन श्रीनिवासेन विरचिते आह्निककौस्तुभे ब्राह्मणकृत्यजातं समाप्तम् ॥

1440

Sl. No. 9396 **सपत्नीपुत्रदायविधिः** **Ms. No. C· 1427**

Beginning:

पत्नी दुहितरश्चेत्यादौ किंचिद्विचार्यते– किं पत्न्यादिषु अनुक्रान्तेषु सर्वेषु स्वर्यातस्यैकस्यैव प्रत्येकं स्वर्यातस्य पत्नी, स्वर्यातस्य दुहिता, स्वर्यातस्य पितरौ इत्यादि क्रमेण सम्बन्धित्वेनान्वयः ॥

End:

बृहस्पतिः –

भर्तुर्धनहरी पत्नी तां विना दुहिता स्मृता ।
तदभावे भ्रातृसुताः सकुल्या बान्धवास्तथा ॥

विष्णुः –

यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा ।
पौत्रदौहित्रयोर्लोके विशेषो नास्ति धर्मतः ॥ इति ॥

Colophon :

1441

Sl.No. 9397 **सपिण्डीकरणकारिकाः** Ms. No. P. 4175/3

Beginning :

देवं भागं यथा पूर्वे स संज्ञा नाना उपासते ।
समानो मन्त्रः सुहासतीति च पिण्डोपस्थानं ये समानास्समासतः ॥
पितरो यमराज्ये च तेषां लोकास्स्वधा नमः ।
यज्ञो देवेषु कल्पतां ये सजानाः समासतः ॥

End :

उक्त्वा समानतन्त्रेति त्रिभिः पिण्डेषु योजयेत् ।
ये समान इति द्वाभ्यामुपस्थाय ततः परम् ॥
मार्जनादिषु पञ्मन्त्रैः पुनर्दत्तास्तिलाम्बु वा ।
मार्जनादि यद्धर्मो चतुर्थो विनिवर्तते ॥
चतुर्थस्थैव पाथेयं सपिण्डीकरणादनु ॥

Colophon :

— — —

1442

Sl·No. 9399 **सपिण्डीकरणकालनिर्णयः** Ms. No. P. 5723/86

Beginning :

अत्र पुनः सपिण्डीकरणकालः । कात्यायनः—

व्युत्क्रमेण मृतानान्तु सपिण्डीकृतिरिष्यते ।
अन्तर्हिते मृते पक्षात् पुनः कुर्यात्सपिण्डनम् ॥

End :

एतज्ज्येष्ठेन कृतसपिण्डीकरणस्यानुजेन सपिण्डीकरणार्थं पृथगेकोद्दिष्टकरणविषयम् ; मृताहे मातापित्रोरेकोद्दिष्टनिषेधपरञ्च ॥

Colophon :

इति सपिण्डीकरणप्रयोगः ॥

1443

Sl. No. 9407 सपिण्डीकरणनिर्णयः Ms. No. P. 5726/83

(अनुगमनसपिण्डीकरणविधिः)

Beginning :

अनुगमनसपिण्डीकरणकालः -- अनुगमने पत्न्या सह सपिण्डीकरणं कार्यम् । यमः –

पत्न्या चैकेन कर्तव्यं सपिण्डीकरणं स्त्रियः ।
सा मृतापि हि तेनैक्यं याता मन्त्राहुतिर्भवेत् ॥

End :

एकोद्दिष्टं सपिण्डवहिरेको द्विजः पृथक् ।
पित्रर्घ्यमुदकं पिण्डं त्रिषु पैतामहादिषु ॥
मात्रार्घ्यपात्रमुदकं पिण्डं पित्रादिषु त्रिषु ।
ब्राह्मणाश्चैव सम्भोज्य श × × च दक्षिणामिति ॥

Colophon :

इति सहगमने सपिण्डीकरणम् ॥

1444

Sl. No. 9411 सपिण्डीकरणनिषेधनिर्णयः Ms. No. P. 5723/89

Beginning :

अत्र सपिण्डीकरणनिषेधकानि कानिचिद्वचनानि लिख्यन्ते । शातातपः --

× × वैश्च पतितैरष्टाभिः स्त्रीभिरेव च ।
सपिण्डीकरणं कुर्यात् एकोद्दिष्टं समाचरेत् ॥

End :

नारायणं समुद्दिश्य विप्रानष्टौ तु भोजयेत् ।
एकोद्दिष्टविधानेन श्राद्धं वा कारयेद्द्विज ॥ इतिः ॥

अत्रोपकुर्वाणनैष्ठिकानां ब्रह्मचारिणां सपिण्डीकरणं कृताकृतम् ॥

Colophon :

1445

Sl. No. 9417 **समावर्तननिर्णयः** Ms. No. P. 5726/156

Beginning :

अथ समावर्तनकालः –

जन्मतः षोडशे वर्षे काले चैबोत्तरायणे ।
गोदानस्य व्रतं कुर्यात् अधीत्याङ्गैः सहागमम् ॥
न्यायैः विचार्य तस्यार्थं समावर्तनमाचरेत् ॥

End :

विवाहदिवसे कुर्वन् कुर्यात्त्रिदिवसे वने ।
× × × शाकलहोमोस्ति ति × नक्षत्रदर्शनात् ॥
रात्राबेबोद्वहेत्कन्यां न स्नानदिबसे न हि ॥ इति ॥

Colophon :

इति समाबर्तनकालाः ॥

1446

Sl. No. 9419 **समिल्लक्षणम्** Ms. No. P. 4972/1

Beginning :

अश्वत्थसमिधं वापि शमीसमिधमेव वा ।
तदभावे च यच्चान्यः समिधः प्रतपेद्बुधः ॥

End :

पालाशाख्यादिरश्वत्थराम्यौ उ............जाः समित् ।
आपामार्गाश्च दूर्वाश्च कुशाश्चैब परे विदुः ॥
सत्वचः समिधः कार्याः ऋजुः श्लक्ष्णस्समस्तथा ।
शस्ता दशाङ्गुलास्तासु द्वादशाङ्गुलकस्तथा ॥

Colophon :

— — —

1447

Sl. No. 9420 समुद्रयानविचारः Ms. No. B· 904

Beninning :

अथ समुद्रायानविचारप्रारम्भः —

श्रुत्यादिशास्त्रबीजाय सपिण्डैकाक्षरात्मने ।
अभीष्टचिन्तामणये हयास्यब्रह्मणे नमः ॥ १ ॥

\+ + + + + +

कौण्डिन्यवंशजनुषा श्रीमच्छठकोपसूरितनुजनुषा ।
क्रियते देशिकविदुषा दुदोह धर्मप्रकाशिका जीयात् ॥४॥

End :

विबुधानामपि गुरुः यः सर्वज्ञशिखामणिः ।
तेनापि दुर्निरोधोऽब्धा हयास्येन (प्रकीर्तितः ।) प्रदर्शितः ॥
किमन्यैर्बहुभिर्वापि क्रियते बद्धमुष्टिभिः ।
निरुध्यते किं मिलितैः मशकैः मत्तवारणः ॥

Colophon :

इति समुद्रयानविचारः सम्पूर्णः ॥

1448

Si. No. 9421 सरस्वतीविलासः (स्मृतिसग्रहङ्) Ms· No· P·2144

Beginning :

वन्देमहि महीयांसमंसलम्बजटाधरम् ।
यत्कङ्कणक्वणत्काररवः शब्दानुशासनम् ॥ ९ ॥

\+ + + + +

सद्योगिभिर्हृदयपङ्कजमध्यभाग-
संशोधनादि....समुद्धतरक्तभावम् ।
प्रतापरुद्रनृपमवतु दुर्गायदायुगं सरक्तं
रक्तौघमर्दितनुजोः स्थितभवैः ॥ (२)

श्रीवीररुद्रनृपतेः श्रियमातनोतु नीलाद्रिनाथनिजपादसरोजयुग्मम् ।

End :

प्रजारञ्जनशीलस्य नित्यं वृद्धोपसेविनः ।
आयुः प्रजा धनं कीर्तिः × × सिध्यन्त्यसंशयः ॥
अमी ननु मुनीश्वरा मनुवसिष्ठयोगीश्वराः
निबन्धनकृतोऽप्यमी रुचिकुलार्कयोगीश्वराः ।
गजा निगनवत्सरा भवतु वा भवानीपते
स तुष्यतु परां मम स्मृतिनिबन्धवाग्वैखरीम् ॥

Colophon :

इति श्रीगणपति-गौडेश्वर-नवकोटिकर्णाटक कलुवरगेश्वर-यमुनापुराधीश्वर-हुशनसाहित्युरत्प्राणशरणरक्षण-श्रीदुर्गा × × रपुङ्गयम-पवित्र-चरित्रराजाधिराजपरमेश्वर-प्रतापरुद्रमहादेवराज-विरचिते स्मृतिसङ्ग्रहे सरस्वतीविलासे व्यवहारकाण्डे प्रकीर्णकाख्यस्य प × × × × × × स्य विलासः ॥

1449

Sl No. 9424 **सरस्वतीविलासः (स्मृतिसङ्ग्रहः)** **Ms. No. C. 2264**

Beginning :

वागीशाद्याः + + । + + गजाननम् ॥
वन्देमहि महीयांसममलम्बिजटाधरम् ।
यत्कङ्कणक्वणत्काररवश्शब्दानुशासनम् ॥ +
+ + + + +

सकलस्मृतिसमुच्चयमतिगभीरं प्रसन्नतरं नातिविस्तरं प्रबन्धं प्रस्तौति । अत्रेत्थं गमनिका ॥

End :

एवम्भूतं देशं कालं वा यदा स्वदोषेणातिक्रम्य देशान्तरे कालान्तरे वा शंसति तदा स्वपराधानुसारात् दातुमर्हतीति गम्यते । क्वचिद्विशेषे पालकस्य निर्दोषत्वमाह व्यासः –

पालग्राहे ग्रा ॥

Colophon:

प्रथमविलासान्त्यवाक्यं यथा–

इति श्रीवीरश्रीगजपति-गौडेश्वर-नवकोटिकर्णाटकभोगेश्वर शरणागतयमुनापुराधीश्वर + + प्रतापरुद्रदेवमहाराजविरचिते स्मृतिसङ्ग्रहे सरस्वतीविलासे वंशावतरणं नाम प्रथमो विलासः ।

६६ तमे पत्रे–

इति श्रीसरस्वतीविलासे व्यवहारकाण्डे अभ्युपेत्याशुश्रूषाख्यस्य पदस्य विलासः (?) ॥

1450

Sl. No. 9427 सर्वश्राद्धाञ्जलिः Ms. No. P. 7446/19

Beginning :

पित्रोर्दीक्षान्तरे चैव गर्भवान्यदि वा भवेत् ।
प्रसूते वपनं कार्यं तच्छेपं केशधारणम् ॥

End:

पित्र्यर्थमुपदिष्टायां सर्वेषामेकपाणिषु ।
सोमायेत्यादिमन्त्राभ्यां द्वौ द्वौ हुत्वाथ पाणिना ॥

Colophon:

— — —

1451

Sl. No. 9428 सलवणाहुतिनिर्णयः Ms. No. B 780/3

Beginning :

ननु च लवणयुक्तस्य आहुत्यनर्हत्वं हविष्यं स्वाहेत्युत्तरभस्मनि इत्यादिना स्फुटमवगम्यमाने मुधा किमर्थमेवं क्लेशः ; इति चेत् , उच्यते– यत्पूर्वस्यामाहुत्या हूतायामुत्तराहुतिः स्कन्देत् । द्विपाद्भिः पशुभिर्यजमानो व्यृध्येत ॥

End :

ज्वालावैशिष्ट्यतावच्छेदेशः आहुत्यसंसर्गस्य पर्याप्तं भवेद्वा न वा । अत एव उदीचीनमुष्णं भस्मापोह्येत्युक्तमिति न पूर्वोक्तदोषः ; इत्यलमतिविस्तरेण ॥

Colophon :

— — —

1452

Sl. No. 9429 सम्यञ्जनपरिषेचननिर्णयः Ms. No. B. 780/1

Beginning :

आचार्यपूरुषमुखाश्रितसम्प्रदाये
रामानुजप्रवरदर्शनमेव मानम् ।
तान् दण्डवत् प्रणतिपूर्वमिहाथ याचे
मध्यस्थमत्सरिजना इह मा च भूवन् ॥

मनुः—

आर्षं धर्मोपदेशं च + । + स धर्मं वेद नेतरः ॥

End :

कौण्डिन्यान्वयजातेन सरगूरुनिवासिना ।
गोमठं रङ्गदासेन ग्रन्थोऽयं सन्मुदे कृतः ॥
एतावदेतत ज्ञात्वाऽपि न कुर्वन्त्युक्तितच्छलाम् ।
नैवासुरप्रकृतयः प्रभवन्तीत्यतः स माम् ॥

Colophon:

— — —

1453

Sl. No. 9430 सहभोजननिर्णयः Ms. No. P. 4212/2

Beginning :

मात्रा सहोपनयने विवाहे भार्यया सह ।
अन्यत्र सह भुञ्जानः रौरवं नरकं व्रजेत् ॥

End :

कुमारभुक्तकाले तु गायत्रीं समुदीरयन् ।
आचार्यः स्वयमेवान्नं प्राशयेदिति शौनकः ॥

Colophon :

1454

Sl. No. 9433 सापिण्ड्यनिर्णयः (पञ्चमीसप्तमीनिर्णय) Ms. No P 2704/1

Beginning:

अथ पञ्चमीसप्तमीनिर्णयः–

मातृतः पञ्चमादूर्ध्वं पितृतः सप्तमादधः ; इति । मातृतः पञ्चमादित्यत्र प्रथममेव मातृग्रहणं किमर्थं कृतम् ॥

End :

स्वसारं मातरं चैव योद्वहेत्पतितो द्विजः ।

प्रवरमञ्जर्याम् –

पुत्री वा भगिनी स्वस्रा स्नुषा वा मातृवत्तथा ॥

एषा पुरुषजा निन्द्या सा कन्या चाशुभप्रदा ॥

Colophon:

इति पञ्चमीसप्तमीनिर्णयः ॥

1455

Sl. No. 9435 सापिण्ड्यनिर्णयः Ms. No.P. 4360,11

Beginning :

सर्वे समानगोत्राः स्युरिति गाणगारिः कथं ह्याप्रीसूक्तानि भवेयुः ; कथं प्रयाजा इत्यपि नानागोत्रा स्युरिति शौनकस्तन्त्राणां व्यापित्वात् ॥

End :

यत्रोक्तसापिण्ड्यनिवृत्तिपूर्वं यस्यैव कन्या यदि मातृसंज्ञा ।

श्वश्रूस्वसावद्दुहिता स्नुषा वा संज्ञा कदाचिन्न मिथो विवाह्याः ॥

Colophon :

1456

Sl. No. 9440 सामगाह्निकम् Ms. No. P. 4959/3

Beginning :

श्रुतयः स्तुतयो यस्य स्तोतारः सुरभूसुराः ।
यस्याज्ञावशगं विश्वं तं विश्वेश्वरमाश्रये ॥
+ + + + + +
तत्कर्मसुखबोधाय तग्द्रन्थाद्यवलोकनात् ।
क्रियते पद्धतिरियं रम्यपुष्पस्रगुज्ज्वला ॥

End :

यथाकथंचिज्जप्यैषा देवीपरमपावनी ।
सर्वकामप्रदा प्रोक्ता किं पुनर्विधिना नृप ॥ इति ॥

इति गायत्रीकल्पः उक्तः ।

गायत्र्यादीनि जप्यानि जप्या पुण्यानि चोदितः(?) ।
होमं विधाय कुर्वीत कर्म नैमित्तिकं ततः ॥

Colophon :

— — —

1457

Sl. No. 9441 सामान्यविधिनिर्णयः Ms. No. P 1364/4

Beginning :

प्रतिपच्चैत्रमासस्य शुक्लं स्यात् षष्टिना विना (?) ।
परेऽह्नि उदये न स्याद्राज्ञां पूर्वे दिनस्य तु ॥

End :

कुर्यान्नक्तं व्रते नक्त फलं भवति निश्चितम् ।
नक्षत्रदर्शनान्नक्तं गृहस्थस्य बुधैर्युतम् ॥

Colophon :

इति नारायणविरचितायां धर्मप्रवृत्तौ सामान्यतिथिनिर्णयः ॥

1458

Sl. No. 9442 **सायङ्कृत्यम्** **Ms. No. P. 1364/18**

Beginning :

रवेरस्तमयात्पूर्वं घटिकैका यदा भवेत् ।
सायंसन्ध्यामुपस्थाथ कुर्याद्धोमञ्च पूर्ववत् ॥

End :

पादलेशतनुं चैव उच्छिष्टं तोण्डनं तथा ।
कोपं रोषञ्च निर्भर्त्स्यं संयोगे न च दोषभाक् ॥ (?)

Colophon :

— — —

1459

Sl. No. 9443 **सारसङ्ग्रहः** **Ms. No. P. 6880/8**

Beginning :

अथाक्षरारम्भविधिः । विधिरत्र –

जन्मतः पञ्चमे वर्षे प्राप्ते भानौ मृगादिके ।
आरभेताक्षरविधिं शुभे काले यथोदिते ॥

End :

शुभाः केन्द्रत्रिकोणस्थाः न भ्रातृगताः शुभाः ।
सर्वलाभे प्रशस्ताः स्युः अक्षरग्रहणे शिशोः ॥
पर्वाष्टम्यां चतुर्दश्यां अनध्यायन्तु कारयेत् ॥

Colophon :

इत्यादित्यभट्टकृतौ सारसङ्ग्रहे अक्षरारम्भविधिः ॥

1460

Sl. No. 9446 सारसङ्ग्रहस्मृतिः Ms. No. P 5678

Beginning :

यौ वर्णौ × × × × × × × × ।
तेभ्यो वर्गदायश्च तन्नमाम्यद्वयं हरिम् ॥
वन्दे वन्दितचन्द्रं तं मौलिमाणिक्यरञ्जितम ॥

Edn :

वरलक्षणम् । मनुः –

उत्कृष्टायाभिरूपाय वराय सदृशाय च ।
अप्राप्तमपि × × तस्मै कन्यां दद्याद्विचक्षणः ॥

अप्राप्तविवाहाय बालिशायेत्यर्थः ॥

Colophon :

-- -- --

1461

Sl. No. 9447 सालग्रामतीर्थनिर्णयः Ms. No. P. 4212/5

Beginning

सालग्रामशिलाचक्रे द्वे चक्रे द्वारकोद्भवे ।
तुलसीगन्धसंयुक्त पुरुषसूक्तं तु षोडश ॥
घण्टानादं च ताम्रं च गन्धतोयं तु वाऽष्टमम् ।
एतै × संमितं तोयं तीर्थं इत्यभिधीयते ॥

End :

कांस्ये सीसे तथा लोहे मृच्छिलादारुपात्रके ।
सालग्रामशिलावारि सुरापानसमं विदुः ॥

इति पद्मसंहितायाम् ॥

सालग्रामशिलातीर्थं + + । + + हरेत् ॥

Col ophon :

1462

Sl. No. 9449 **सीमन्तप्रकरणम्** **Ms. No. P. 2565/3**

Beginning :

नारदीये–

चतुर्थे मासि षष्ठे वाप्यष्टमे वा तदीश्वरे ।
नलोपपन्ने दम्पत्योश्चंद तारानलान्विते ॥
अपर्वदिवसे कुर्यात् कुजजीवार्कवासरे ।
तीक्ष्णमी (?) सोग्रवर्गेषु पुंभे पुंसज्ञयोदये ॥

End :

चन्द्रताराबलं शस्तं दम्पत्योश्च रवेर्बलम् ।
लग्नादष्टमराशीशः केन्द्रगः शुभवीक्षितः ॥
यदाप्यष्टमगस्योक्तं दोषमाशु व्यपोहति ।
जन्मनाशौ शुभं प्राहुः पात्रोद्वाहप्रवेशनम् ॥

Colophon :

इति सीमन्तप्रकरणम् ॥

1463

Sl. No. 9452 **सुदर्शनकालनिर्णयः** (कालनिर्णयः) **Ms. No. A. 8046**

Beginning :

श्रीकण्ठो वृषभाचलस्थितिरलं कालस्तमोनुज्जगत्-
प्राणानन्तधरावनष्टविलसम्मूर्तिश्चतुर्वर्गदः ।
कालं कालविभागमागमाविधिं सृष्टिं विधत्ते स यः
पायात्तस्य सुदर्शनं स्मृतिपरानामन्दयन् शाश्वतम् ॥

End :

तयोः परेद्युरुदये स्नात्वाऽभ्यवहरेन्नरः ॥ इति ।

तमेवं निर्णिनीषितमर्थं सङ्ग्रहेणानुक्तमप्यसङ्ग्रहमुपसंहरति–

ईदृशं निर्णयं न्यायैः विवरीतुमिहोद्यमः ॥

Colophon :

इति श्रीभारतीतीर्थविरचितः कालनिर्णयः समाप्तः ॥

1464

Sl. No. 9456 **सुदर्शनकालनिर्णयव्याख्या** **Ms. No. P 8116/B**

Beginning :

श्रीकण्ठ इति । वृषभाचलस्थितः – వృషభపర్వతమందు, स्थितः– పునికేగలవాడైన, अलं– మిక్కిలిన్ని , कालं– కృష్ణవర్ణమైనటువంటి ॥

End :

प्रात इति । दैमविषयश्राद्धे– ద్వాదశ్యాదులయందు దేవతలనుద్దేశించిచేసేటబ్రాహ్మణ భోజనము మిక్కిలింన + + + + समयः– కాలము न प्रोक्तः– చెప్పంబడలేదు ॥

Colophon :

– – –

1465

Sl. No. 9458 **सुदर्शनधारणविधिः** **Ms. No. P. 743/13**

Beginning :

× × × × ×

कथमाश्रयणं नृणां कथमाराधनं हरेः ।

श्रीपराशरः –

वक्ष्यामि मुनयस्सर्वे विष्णोराराधनक्रियाम् ।

× × ×

संस्काराः पञ्च कर्तव्याः ब्राह्मणस्य विधानतः ॥

End :

उद्वाहसमये स्त्रीणां पुंसां चैवोपनायने ।

चक्रस्य धारणं प्रोक्तं × × पञ्चायुधस्य च ॥

Colophon :

इति पराशरधर्मशास्त्रे उत्तरखण्डे सुदर्शनधारणविधिर्नाम त्रयोदशोऽध्यायः ॥

1466

Sl. No. 9459 **सुदर्शनपाञ्चजन्यधारणनिर्णयः** **Ms No. P.617/2**

Beginning :

श्रीनिवासब्रह्मतन्त्रपरकालगुरूत्तमैः ।
क्रियते तप्तचक्राङ्कप्रमाणविवृतिस्स्फुटम् ॥

तप्तचक्राङ्कनादिसहितोर्ध्वपुण्ड्रादि × × × परस्परविरुद्धानि बहूनि प्रमाणानि सन्दृश्यन्ते ॥

End :

इत्यादिवचनेषु चोपासनपरित्यगिनो ब्राह्मणस्य न शूद्रजात्याक्रान्तता, न वा सुरापावृता, परन्तु प्रत्यवाय एव यथा तथा पूर्वोक्तताद्दशवचनेष्वपि प्रत्यवायः प्रतीयत इति वक्तव्यं ; तत्तु द्विजस्यावैदिकाङ्कनधारणे तथा भवत्येवेति सर्वमनवद्यम् ॥

Colophon :

इति श्रीमच्छ्रीनिवासब्रह्मतन्त्रपरकालगुरुविरचितसुदर्शनपाञ्चजन्यादिधारणनिर्णयः समाप्तः ॥

1457

Sl. No. 9460 **सुदर्शनपाञ्चजन्यधारणनिर्णयः** **Ms.No. P. 7592**

Beginning :

स्ते असुरा अदेमा इति वै श्रुतिः इत्यादि स्मृतीतिहासपुराणवचनानि सन्ति ; विस्तरभयान्न लिख्यन्ते । अत्रोदाहृतानि वचनानि सच्चरित्ररक्षायां ब्रह्मविद्याविजये प्रमाणसङ्ग्रहे चोदाहृतान्येव ॥

End :

परन्तु प्रत्यवाय एव यथा तथा पूर्वोक्तताद्दशवचनेष्वपि प्रत्यवायः प्रतीयत ; इति वक्तव्यम् । तत्तु द्विजस्यावैदिकाङ्कनधारणे तथा भवत्येवेति सर्वमनवद्यम् ॥

Colophon :

इति श्रीमद्वेदमार्गश्रीमच्छ्रीनिवासब्रह्मतन्त्रपरकालमहादेशिकविरचितः सुदर्शनपाञ्चजन्यादिधारणनिर्णयः समाप्तः ॥

1468

Sl. No. 9462 | सुबोधिनीकारिका | Ms. No. P. 4972/5

(यतिब्रह्मचारिनारायणबलिविचारः)

Beginning :

शौनकोऽहं प्रवक्ष्यामि नारायणबलिं शुभम् ।
चण्डालोदकसर्पेभ्यो ब्राह्मणाद्वैद्युतादपि ॥
दंष्ट्रिभ्यश्च पशुभ्यश्च रज्जुशृङ्गिविषादिभिः ।
देशान्तरमृतानां च हतानामन्यसाधनैः ॥
जीवतां जीवतीनां च नैष्ठिकानां तथैव च ।
यतीनां चैव योगीनां अन्येषां मोक्षकारिणाम् ॥
सर्वपापक्षयार्थाय द्वादशेऽहनि कारयेत् ॥

End :

इति कूर्चं क्षिपेद्दैवे पिण्डार्घ्यांश्च पृथक् पृथक् ।
विशेषश्राद्धधर्मोयं इत्थं दर्शादिषूदितः ॥
अगस्त्यगोत्रसम्भूतलक्ष्मणसूरिसूनुना ।
कारिकेयं सुबोधाख्या कृता तिम्मणशर्मणा ॥
न्यर्मन्थ्य साभार्णवमादिकल्पे कल्पामृतं सामगभूसुरेभ्यः ।
तेनर्पितं स्कन्दवरेण तस्य द्राह्यायणस्याङ्घ्रियुगं नतोऽस्मि ॥
\+ + + + +
द्राह्यायणोक्तगृह्याब्धेः वामनार्कवचोंशुभिः ।
विस्मृतेऽस्मद्बचोहंसान्नतिस्स्यात्कृपया हरेः ॥

Colophon :

१६० तमे पत्रे– इति शौनकादिप्रोक्तगर्भिणीमृतिः समाप्ता ॥

Extra Infomation :

द्राह्यायणीयेऽयं निबन्धः । ग्रन्थेऽस्मिन्– दुर्मरणनिमित्तनारायणबल्यङ्गकलशपूजा, महादानप्रायश्चित्तं, गर्भिणीमृतिः, आतुरस्नानं, पालाशविधिः, सूतिकामरणादि, अग्निमरणविचारः, अग्निविनयः, महत्प्रमं अङ्गिप्रचयनं इत्यते विषयाः प्रसक्ताः उपायताः ॥

1469

Sl. No. 9463 सुवर्णादिपरिमाणनिर्णयः Ms. No. C. 2919/3

Beginning :

अथ मनुस्मृतौ अष्टमाध्याये दण्डप्रकरणे सुवर्णादिपरिमाणमुक्तम् –

लोकसंव्यवहारार्थं याः संज्ञाः प्रतिपादिताः ।
ताम्ररौप्यसुवर्णानां तान्प्रवक्ष्याम्यशेषतः ॥
जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः ।
तस्य षष्ठतमो भागः परमाणुः प्रकीर्तितः ॥

End:

वार्षापणस्तु विज्ञेयः ताम्रिकः कार्षिकः पणः ।
धरणानि दश ज्ञेयः शृतमानन्तु राजतः ॥
चतुस्सौवर्णिको निष्कः विज्ञेयस्तु प्रमाणतः ।
पणानां द्वे शते सार्धे – – – – – – ॥

इत्यादि । उत्तरत्र दण्डविधानमुक्तम् ॥

Colophon:

-- -- --

1470

Sl. No. 9464 सूतकविधैकादशीनिर्णयः Ms. No. P. 5726/55

Beginning :

× स × पसरनुज्ञाना व्रताधि × × यिकारिणी ।
दन्तधावनपू × दिव्रतेप्यस्या न दुष्यति ॥
सूतके मृतके वापि दानार्चनविवर्जितम् ।
एकादशीव्रतं कुर्यात् नित्यं काम्यं च वर्जयेत् ॥

End :

मार्कण्डेयः–

नारी च खल्वनुज्ञाता भर्त्रा पित्र्येन वा सुता ।
निष्फलन्तु भवेत्तस्याः यत्करोति व्रतादिकम् ॥

कात्यायनः–

भार्या भर्तृमृतनैव व्रतादीनाचरेत्सदा ॥

Colophon :

– – –

1471

Sl. No. 9465 सूतकश्राद्धनिर्णयः Ms. No. P. 1364/53

Beginning :

श्राद्धाहे तु क्ष × × दत्ते सुमङ्कल्प्य यथाविधि ।
पादप्रक्षाळनादूर्ध्वं विप्राणां नास्ति सूतकम् ॥

End :

मन्वादौ च युगादौ च ग्रहणे चन्द्रसूर्ययोः ।
स × × × × सर्वासु श्राद्धं पिण्डैर्विना भवेत् ॥
+ + + + + + + + +
आवाहनार्घ्यपिण्डाश्च विकिरोच्छिष्टपिण्डकौ ।
स्व × × ग्नौ करणे सङ्कल्पे सप्त वर्जयेत् ॥

Colophon :

— — —

1472

Sl. No. 9467 सूतिकारजस्वलासंस्कारविधिः Ms. No. P. 8423/9

Beginning :

शौचमृतामामध्ये तु सूतिकां वा रजस्वलाम् ।
प्रथमं स्नापयेच्छुद्धैः पञ्चगव्यैः कुशोदकैः ॥
ततश्च पावमानीभिः यदन्तीत्यादिसप्तभिः ।
यजुस्सामपवित्राभ्यां कया नश्चित्र आभवत् ॥

End :

निमित्तं वरणं होमः पृथक् तत्र विधीयते ।
चितिः कुण्डं सञ्चयश्च सन्ति होमश्च तन्त्रतः ॥

Colophon :

-- -- --

1473

Sl. No. 9469 **सोदकुम्भनित्यश्राद्धविधिः** Ms. No. P. 2584/3

Beginning :

कुर्वीत सोदकं श्राद्धं सोदकुम्भमदैवतम् ।
सङ्कल्पेनास्य विपतं (?) प्रत्यहं त्वाब्दिकावधि ॥
अदैवं पार्वणश्राद्धं सोदकुम्भमधर्मकम् ।
कुर्यात्प्रत्याब्दिकश्राद्धारसङ्कल्पविधिनान्वहम् ॥

End :

ओदने पायसे सूपे घृतपात्रं न च क्षिपेत् ।
यदि निक्षिप्य भुञ्जीत तद्भूतं सुरया समम् ॥
पाणि × × × पात्रं पिण्डहीनं करोति यः ।
उच्छिष्टं तद्भवेदन्नं दाता च नरकं व्रजेत् ॥

Colophon :

-- -- -

1474

Sl. No. 9470 **स्त्रीधनाधिकारिसंग्रहः** Ms. No. C. 1425

Beginning :

दायदशश्लोक्याम्–

अथानपत्यस्त्रीधनविषये–

ब्राह्माद्येष्वसुतार्थमर्हति पतिः तस्यानुजो भ्रातृजः
स्वस्त्रीयः स्वक्रमासुराद्युपयमेष्वस्याः पिताम्बा ततः ।
स्वस्त्रीयः सहजात्मजो दुहितृभृत् पित्रोरभावे क्रमात्

शुल्कं मातृसहोदरी सहजमात्राद्यास्तु कन्याधनम् ॥

End :

तदभावे भर्तुः × × × स्त्रीयो हरति मातुलानी धनं; आतु × × × × रभावे × द्वारेण सम्बन्धिषु त्रिषु प्रथमं स्वस्त्री × हरति मातृष्वसृधनं;, तदभावे स्वस्राः भ्रातुपुत्रो हरति पितृष्वसृधनम्; तदभावे जामाता हरति स्वस्व × धनम् ॥

Colophon :

— — —

1475

Sl. No. 9472 स्त्रीधर्मः Ms. No. P. 4972/2

Beginning :

उपाकर्मणि चोत्सर्गे प्रातः प्रातरथैव च।
चन्द्रसूर्योपरागे च रजोदोषो न विद्यते॥
× × × × या नारी भर्तारं नाभिगच्छति।
सानृता नरकं × × ति विधवा च पुनःपुनः॥

End :

अपृष्ट्वा चैव भर्तारं या नारी कुरुते व्रतम्।
सर्वं तद्राक्षसं गच्छेत् इत्येवं मुनिरब्रवीन्॥

Colophon :

— — —

1476

Sl. No. 9474 स्त्रीधर्मपद्धतिः Ms. No. A. 163

Beginning

मुख्यो धर्मः स्मृतिषु विहितो भर्तृशुश्रूषणं हि
स्त्रीणामेतत् पितुरनुमतं कार्यमित्याकलय्य।
तत्कुर्वाणा भजत वपुषो भर्तुरर्थं हि मातः(?)
कन्या सा मे दिशतु सततं धर्ममार्गप्रवृत्तिम्॥

+ + + + + + + + +

स्त्रीणां धर्माः कतिचन मया प्रायशस्सारभूताः ।
संगृह्यन्ते स्मृतिषु बहुशः तत्र तत्र प्रसिद्धाः ॥

End :

पितृवंश्या मातृवंश्याः पतिवंश्यास्त्रयस्त्रयः ।
पतिव्रतायाः पुण्येन स्वर्गसौख्यानि भुञ्जते ॥

इत्थं त्र्यम्बकयज्वना श्रुतिपुराणोक्तीर्विलोक्याखिलाः
धर्माः स्त्रीविषयाः पुनः कतिपये तत्तद्व्यवस्थान्विताः ।
संगृह्यात्र कृतौ क्रमेण कथिता मात्राज्ञया धीमता
तानाकर्ण्य सदा स्त्रियश्च सकला धर्मे मतिं तन्वताम् ॥

Colophon :

गुरुयज्ञेशकृपया श्रीमत्त्र्यम्बकयज्वना ।
प्रीतये श्रीसिंहस्य कृता स्त्रीधर्मपद्धतिः ॥

1477

Sl. No. 9475 स्त्रीशुद्धिनिर्णयः Ms. No. P. 1364/82

Beginning :

कामतसंसर्गे स्मृत्यन्तरेऽभिहितः —

पञ्चाहे तु चरेत् कृच्छ्रं दशाहे तप्तकृच्छ्रकम् ।
परा × स्त्वर्धमासे स्यान्मासे चान्द्रायणं चरेत् ॥

End :

तदाह मनुः—

मृतो यैः शुद्ध्यते शोद्ध्यं नदी वेगेन शुद्ध्यति ।
रजसा स्त्री मनोदुष्टा सन्यासेन द्विजोत्तमः ॥

Colophon :

1478

Sl. No. 9476 **स्त्रीसंस्कारनिर्णयः** Ms. No. A. 5726/157

Beginning :

याज्ञवल्क्यः —

रुष्णीमेता कृपा स्त्रीणां विवाहस्तु समन्त्रकः ।
एता × जातकर्माणि × × करणान्तमनुः ॥ (?)
अमन्त्रकी तु कार्येयं स्त्रीणामावृदशेषतः ॥ (?)

End :

न च पौनर्भवा दग्धकलङ्कापि प्ररोहति ॥

बोधायनः —

वाग्दत्ता, मनोदत्ता, अग्निं परिगता, सप्तमप × नीता, भूत्वा वा गृहीतगर्भा, प्रसूता चेति ।

Colophon :

इति स्त्रीसंस्कारविषयाणि ॥

1479

Sl. No. 9478 **स्त्रीसपिण्डीकरणनिर्णयः** Ms. No. P. 5726/84

Beginning :

स्त्रीणां सपिण्डीकरणे विशेषमाह —

पत्न्याः कुर्यादपुत्रायाः पतिर्मात्रादिभिस्सह ।
सपिण्डमनुयाने × जनकेन सहात्मजः ॥

End :

मातमहादिभिः कुर्यात् यद्वा पुत्रादिभिस्सह ॥ इति ।
पितामह्यादिभिर्वापि आसुराद्यागतः (?) सुतः ॥

पुत्रिकापुत्रोप्येवमेव गोत्रनिवृत्त्यनुवृत्ती विवाहप्रकरणे वक्ष्यति ॥

Colophon :

— — —

1480

Sl. No. 9480 स्थालीपाकनिर्णयः Ms. No. P. 4776/7

Beginning :

इह तावत् स्थालीपाकनिर्णयः क्रियते। अत्रापस्तम्बः —

एवमत ऊर्ध्वं दक्षिणावर्जं उपोषिताभ्यां पर्वसु कार्यः। पूर्णपात्रस्तु दक्षिणेति। एवं प्रत्यवहन्ति श्रपयित्वेत्यादि सूत्रोक्तप्रकारेणैवार्थः ॥

End :

अत्र वामनः—

उक्तकालव्यतिक्रान्तौ दिवसे यत्र कुत्रचित्।
आगामी पार्वणः पूर्वं स्थालीपाकं समाचरेत् ॥ इति ॥

Colophon :

इति कृतस्थालीपाकनिर्णयः समाप्तः ॥

1481

Sl. No. 9483 स्नानभेदः Ms. No. p. 212/17

Beginning:

मान्त्रं भौमं तथाऽऽग्नेयं वायव्यं दिव्यमेव च।
वारुणं मानसं चैव कापिलं कण्ठमाकटिम् ॥
स्नानानां दशमानामां विधानं कीदृशं वद ॥

End:

प्रातः काले जलैर्युक्तं मध्याह्ने चन्दनायुतम्।
रात्रौ तु रक्षणार्थं तु शुद्धभस्म विधीयते ॥

Colophon :

— —

1482

Sl. No. 9484 स्नानभेदः Ms No. P. 4212/29

Beginning :

आदौ मलापहं प्रश्न सङ्कल्पं तु द्वितीयकम् ।
तृतीयं मृत्तिकास्नानं चतुर्थं प्रोक्षणं भवेत् ॥
पञ्चमं सूक्तपठनं षष्ठमं त्वघमर्षणम् ॥

End :

एवं दशविधं प्रोक्तं सर्वपापक्षयं स्मृतम् ।
सपिण्डीकरणे दाहे सन्ततं ग्रामवासिनाम् ॥
परेऽहनि न गन्तव्यं गन्ता चेन्मरणं भवेत् ॥

इति मनुस्मृतौ ॥

Colophon:

— — —

1483

Sl.No. 9486 स्नानयोग्यजलानि Ms. No. P.5723/14

Beginning :

अथ स्नानार्थजलानि मार्कण्डेयः —

नभोनभस्ययोः मध्ये सर्वा नद्यो रजस्वलाः ।
तासु स्नानं न कुर्वीत देवर्षिपितृतर्पणम् ।
कर्कटे सरितः सर्वाः भवन्तीह रजस्वलाः ॥

End :

पितरः तर्पितास्तेन रुधिरेण जलेन च ॥
अलोमकाण्डस्तिलैः तर्पणं सफलं भवेत् ॥

तत्रस्थ तिलतर्पणविशेषमेतत् । — — — — — — — — मृज्यागसमुखम् ।
जाबालिः

Colophon :

— — —

1484

Sl. No. 9487 स्नानबिधिः **Ms. No. P. 1364/27**

Beginning:

विष्णुः —

उत्तम तु नदीस्नानं तटाकं मध्यमं स्मृतम् ।
कूपस्नानन्तु सामान्यं भाण्डस्नानं वृथा भवेत् ॥

End :

दूरस्थ जलमध्यस्थं धावन्तं धनगर्वितम् ।
उन्नतं बधिरं मूर्खं मन्दकं नाभिवादयेत् ॥

Colophon :

— — —

1485

Sl. No. 9491 स्मार्तनिर्णयपद्धतिः (स्मार्तप्रायश्चित्तम्) **Ms. No. P. 2919/2**

Beginning :

× × × × × × भिमन्त्रयेत् ॥

इत्याश्वलायनश्रौतसूत्रोक्तम् । तत्र समाधिश्रितमौपासनद्रव्याच्छन्दनिर्गमनवैगुण्यमभि मन्त्रणं औपासनद्रव्यस्य शरीरात्प्रच्युतकेशनखामेध्यसाकीटपतन × × × जुहुयात् ॥

End :

प्रायश्चित्तान्यनेकानि तपःकर्मात्मकानि वै ।
यानि तेषामशेषाणां श्रीकृष्णानुस्मरणं परम् ।

\+ + + + + +

दिवाकरेण रचिता स्मार्तनिर्णयपद्धतिः।
गुणगृह्यैर्बुधैः सम्यगादरेण विभाव्यताम् ॥

Colophon :

इति श्रीमत्कालोपनामक-भट्टरामेश्वरभट्टात्मज-महादेवद्विजवर्यसूनुदिवाकरभट्टविरचितं स्मार्तप्रायश्चित्तं समाप्तम् ॥

1486

Sl. No. 9493 स्मार्तपदार्थानुक्रमणिका Ms. No. P. 732

Beginning :

अथातः स्मार्तपदार्थानुक्रमिष्यामः। तत्र प्रथमं मन्त्रपाठक्रमानुसारेण विवाहकर्म ब्रूमहे। ब्रह्मचारी वेदव्रताद्यनुष्ठानसहितमधीत्य मीमांसाया विचारञ्च कृत्वा- ॥

End :

हरीत इन्द्रश्मश्रूणि ताम्बूलश्चावभृतसमद्वयेन वामदेव्येन त्रयस्त्रिंशदिति ब्राह्मणान् भोजयित्वा स्वस्ति चैषां भवति; स्वस्ति चैषां भवति ॥

Colophon :

महाभिषेकविधिः समाप्तः ॥

1487

Sl. No. 9495 स्मार्तप्रदीपिका Ms. No. P. 7018

Beginning :

तृतीये विवादे प्राप्ते अक्षिजन्यां विवाहयेत्न मानुषीं जन्यामादित्य वासरे हस्तार्के वा। पूर्वाह्णे स्नात्वा अलंकृतो ग्रामत्प्रगुर्दाचीं वा × × × एकशाखामर्कयुग्मं प्राप्य त × × नार्यमाचार्यं परिकल्प्य स्वस्तिवाचयित्वाहिरण्येनाभ्युदयिकं कुर्यात् ।

End :

दर्शः संक्रमणं वापि दशाहान्तं समापयेत् (?) ।
तावत्तद्वोदरं तन्त्र समाप्यमिति निश्चयः ॥

भविष्यत्पुराणे –

प्रवृत्ताशौचं तन्त्रे तु यदि दर्शः प्रपद्यते ।
स माधवोदकं पिण्डं स्नानमात्रं समाचरेत् ॥

Colophon :

– –– ––

1488

Sl. No. 9496 **स्मार्तप्रदीपिका** Ms. No. P. 7022/2

Beninning :

× × चेति कर्मषाड्गुण्यदेवताः प्रत्यङ्मुख उपविश्य प्राच्यादि × द्राविलोकपालाना- × × × × ग्निमुप' माधाय चरुतन्त्रिणा होमं कुर्यात् । चक्षुषि आज्येन सूर्यादिनव-प्रधान देवता अष्टावि × संख्याकाः ॥

End :

शिशोः कण्ठे तु तं न्यस्य श्रीरुद्रं प्रार्थयेत्सुधीः ।
मृत्युञ्जय महादेव शरणागत रक्षक ॥
अपमृत्योः शिशुं रक्ष मदभीष्टानि साधय ।
ब्राह्मणाय तु तं दद्यात्सर्वारिष्टं विनश्यति ॥
इत्येवं विधिवत्कृत्वा सर्वेषां सौख्यदं भवेत् ।
समस्तपीडा नश्यन्ति चिन्मात्रकार्या विचारिणी (?)॥

Colophon :

इति श्रीकाण्ठायन-विश्वामित्रगोत्रान्वय-बिन्दुकूरतिरुमलसोम-याजि विरचितायां स्मार्त-प्रदीपिकायां द्वितीयाध्यायः ॥

1489

Si. No. 9497 **स्मार्तप्रायश्चित्तम्** Ms. No. P. 2616

Beginning :

अथ स्मार्तप्रायश्चित्तानि तन्यन्ते । तत्रादावावश्यकविशेषः नित्यप्रायश्चित्तानि च वक्ष्यन्ते । तत्रादौ शौचमाह मनुः– ॥

End :

ओं मही द्यौः पृथिवी च न × × × × ममिरिति अधिश्रितमौपासनद्रव्यं यदि-शब्दयेत् तदा तद्द्रव्यं समोपपाप्मानमित्यनेन मन्त्रेण × × × × × × ।

Colophon :

-- --

1490

Sl.No. 9497 स्मार्तैकादशीनिर्णयः Ms. No. P. 5723/54

Beginning :

अथ स्मार्तैकादशी— अर्धरात्रारुणोदये कालान्वितैकादशी वैखानसपाञ्चरात्रादिवैष्णवागमोक्तदीक्षां प्राप्तस्योक्तगुणसंपन्नस्य पुत्रपौत्रादिफलायासम्पूर्णाय × × × × भवति ॥

End :

या तिथिः सा तु शुद्धा स्यात्सर्वतिथ्योरयं विधिः ।

यत्तु स्कन्दपुराणेऽभिहितम्—

प्रतिप्रसृतयः सर्वाः उदयादुदयाद्रवेः ।
सम्पूर्णा इति विख्याताः हरिवासरवर्जिताः ॥

Colophon :

— — —

1491

Sl. No. 9530 स्मृतिप्रामाण्यनिरूपणम् Ms. No. P. 9331/5

Beginnngi :

अथ स्मृतिकर्ता ऋषिः—

मनुर्बृहस्पतिर्दक्षो गौतमोऽथ यमोऽङ्गिराः ।
योगीश्वरः प्रचेताश्च शातातपपराशरौ ॥

End :

अधीत्य चतुरो वेदान् साङ्गांश्च सपदक्रमान् ।
स्मृतिहीना न शोभन्ते चन्द्रहीनेव शर्वरी ॥

Colophon :

— — — —

1492

Sl. No. 9503 स्मृतिकौमुदि Ms. No. A. 542

Beginning :

सद्यः स्नानं प्रकुर्वीत अन्यथा पतितो भवेत् ॥

अङ्गिराः—

उच्छिष्टोच्छिष्टनान्दर्शश्शुना (?) शूद्रेण वा द्विजः ।
उपोष्य रजनीमेकां पञ्चगव्येन शुद्धयति ॥
श्वानं च शूद्रमुच्छिष्टं अनुच्छिष्टन्तु यः स्पृशेत् ।
स्नानं विधीयते तस्य पाषाणं चालनं विना ॥

End :

विधवागर्भसन्देहे गर्भादौ मध्यमेऽपि वा ।
बन्धुभिस्सह तच्चिन्हं दृष्ट्वा राज्ञे निवेद्य तु ॥
ग्रामस्य पश्चिमे याम्ये दक्षिणस्या चतुष्पथे ।
मन्त्रेणायच्र्य तच्छीर्षं त्रिधा केशान्निधाप्य च ॥

Colophon :

— — —

1493

Sl. No. 9504 स्मृतिकौस्तुभम् Ms. No. P. 428

Beginning :

यत्प्रीत्यै कृतकर्म × × कर्मयुगतेर्भस्तुर्यवर्था श्रुतिः

यस्याज्ञे निगमस्मृती × × प्येतपथार्थान्तरम् ॥

यस्मिन्नुत्तम इत्यनन्यविषयः यस्त्यक्तदोषव्रजः
यो निस्स × × सद्गुणनिधिः तन्नौमि लक्ष्मीपतिम् ॥

\+ + + + + +

सर्वस्मृतिपयोराशेः उद्धृतः स्मृतिकौस्तुभः।
प्रकाशयन् हरेः रूपं प्रहर्षयतु वैष्णवान् ॥

End :

एवंचोक्तानि यानि कर्माणि × + × × × श्रीमदानन्दतीर्थ भगवत्पाद-
× × × × × ।

× × × बुध्यात्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पये तत् ॥

इति सर्वमनवद्यम् ॥

Colophon:

इति श्रीदक्षिणसमुद्राधीश्वरनिश्चनाथमहीपालकुलतिलकस्यासकृदावर्तित + + + वीरभूपालस्य साम्राज्यधुरन्धरेण परार्धा भराभिधानेन रायसवेङ्कटाद्रिणा विरचिते स्मृतिकौस्तुभे आचारप्रकाशे सायाह्न × प्रकाशः।

1494

Sl. No. 9508 स्मृतिकौस्तुभः Ms No. C. 894

Beginning :

× × × × × × × ×
श्रीमत्कृष्णासनाभात् सुकृतपरिणतिः भानुवीरक्षितीन्द्रः ॥ १३ ॥

धृत्वैकं द्वितयं विहाय तिसृभिः प्रोद्यद्विभूतिक्रमः
सारस्यं चतुरोऽपि पञ्च सुदृढं संयम्य षड्वर्जितः।
× × × × × × ×
× × × कुमारवीरनृपतिः पृथ्वीं चिरं रक्षतु ॥

End :

प्रत्यग्रं स्मृतिकौस्तुभाख्यक्रमकं भूयात् पराधीनसात्

मीमांसादलमुक्तिकेसरमिदं विद्वन्मनोद्यत्पदम्
अर्थोद्यत्स्फुठकर्णिकं मुररिपोः पादारविन्देऽर्पितम् ॥
+ + + । + + +
जातः पराधीन मुदे कौस्तुभ एष भूयात् ॥

Colophon :

इति श्रीदक्षिणसमुद्राधीश्वर-विश्वनाथमहीपालकुलतिलकस्यासकृदावर्तितुलापुरुषादि-षोडशमहादानमहाध्वरस्य वीरभूपालस्य साम्राज्यधुरन्धरेण पराधीनापराभिधानेन नारायणवेङ्कटाद्रिणा विरचिते स्मृतिकौस्तुभे प्रायश्चित्तप्रकाशे प्रकीर्णकाख्यं चतुर्थं प्रकरणं समाप्तम् ।

1495

Sl. No. 9509 **स्मृतिकौस्तुभः** Ms. No. C. 104

Beginning :

दध्नोमन्थनकाम्यया व्रजवधूकुम्भे तदा सिञ्चती
सस्नेहं दधि देहि मह्यमधुनेत्युक्ते रमेशे मया ।
ओमित्युक्तिपुरःसरं निजकरे तस्यार्पणं कुर्वती
प्रत्युक्तिः कुरु कार्यमस्तु तमिति श्रीरस्य सा पातु नः ॥
+ + + + + +
अनन्तदेवेन तदाज्ञयाऽथो मुदे हरेः पूर्वनिबन्धरूपम् ।
क्षीराम्बुधिं बुद्धिगुणैः मथित्वा प्रकाश्यतेऽयं स्मृतिकौस्तुभः कलौ ॥

End :

योनन्तदेवकृतमन्थनतन्निबन्ध-
क्षिराब्धजोऽथ सततं हरिणाधृते यः ।
नित्यं निजे हृदि सतां प्रमुदेऽस्तु तस्य
सर्वाब्धिदीधितिरियं स्मृतिकौस्तुभस्य ॥
येनाकारि + + + + + + वाचः श्रमेणामुना ॥

Colophon :

इति श्रीमत्सकलभूमण्डलमण्डनायमान-श्रीबाजबहादुरचन्द्रदेवः × × × × × सन
विद्वद्वर्यापदेवसुतेन अनन्तदेवेन कृते स्मृतिकौस्तुभे संवत्सरकृत्यं समाप्तम् ॥

1496

Sl. No. 9512 स्मृतिकौस्तुभः Ms. No. C.2654

Beginning :

अथ संवत्सरकृत्यम् –

तत्र चान्द्रसंवत्सरस्य चैत्रशुक्लप्रतिपदारम्भः । चान्द्रो × × प्रतिपदर × × × इति दीपिकोक्तेः । सा चोदयव्यापिनी या × × × चैत्रे मासि भगवान् ब्रह्मा ससर्ज प्रथमेऽहनि ॥

End:

एवं कृत्वा महाभागः ब्राह्मणहत्यादिपातकैः × × × × नात्रत्यदेहस्तस्मात्कुरु महाव्रत-मिदम् । मासोपवासव्रतोद्यापनं तु यद्यपि द्वादश्यां विहितं तथापि केनापि कारणेन तत्र असं. × × × ×॥

Colophon:

-- -- --

1497

Sl.No. 9513 स्मृतिचन्द्रिका Ms. No. P.452

Beginning :

अथ विश्वादिजात्यादितो व्यवस्था । तत्र बृहस्पतिः–

ऋणादिकेषु कार्येषु विसंवादे परस्परम् ।

द्रव्यसङ्ख्यां विना देया पुरुषापेक्षया तथा ॥

पुरुषापेक्षयापि वा × × जात्याद्यपेक्षयेत्यर्थः ॥

End :

तेन प्रकीर्णकाख्यपदप्रतिपाद्यं किञ्चिदेवेह प्रतिप × × × × अवशिष्टमिह तत्र तत्र प्रसङ्गादित्यनुसन्धेयम् ॥

End :

इति सर्वविद्याविशारद × × × × × × × × केशवादित्यभट्टोपाध्यायसोमयाजि-विरचितायां स्मृतिचन्द्रिकायां व्यवहारकाण्डं समाप्तम् ॥

1498

Sl. No. 9515 स्मृतिचन्द्रिका **Ms. No. P. 1909**

Beginning :

× × × प्रच्छादयेयुरित्यर्थः । बान्धवा इति बहुवचनं बन्धूनां मन्त्रानुगमनं कृत्वा कृत मिति ज्ञापयितुम् ॥

End:

× × × × इत्यसौ पिण्डान् दत्वा शेषेण बलिं दद्यात् । यः कश्चिदित्यादि प्रचोदयादित्यन्तं उक्त्वा स्नात्वा गृहमागत्य त्रिरात्रमाशौचं कुर्यात् ।

चतुर्थेऽहनि सम्प्राप्ते पुण्याहं वाचयेत्ततः ।
एवङ्गुणेत्यादि तिथौ मम इ × × × ॥

Colophon:

— — —

1499

Sl. No. 9516 स्मृतिचन्द्रिका **Ms. No. P. 2237**

Beginning :

उक्तमाह्निके नित्यश्राद्धम् । अधुना तत्प्रसङ्गात् श्राद्धप्रकरणमारभ्यते । तत्रादौ श्राद्ध-महिमा । तत्र सुमन्तुः—

श्राद्धात्परतरं नान्यत् श्रेयस्करमुदाहृतम् ।
तस्मात् सर्वप्रयत्नेन श्राद्धं कुर्याद्विचक्षणः ॥

End:

तथा च स एव–

वृषवृश्चिककुम्भेषु सि × × × था रविः।
एतद्विष्णुपदं नाम विषुवादधिकं फलम् ॥

कन्यायां मिथुने मीने धनुष्यपि रवेर्गतिः।
षडशीतिमुखाः प्रोक्ताः षडशीतिगुणाः फलैः॥

इति। प्रथमश्लोकश्चैवंयोजनवृषवृश्चिककुम्भसिंह ॥

Colophon :

— — —

1500

Sl·No· 9535 स्मृतिचन्द्रिका Ms· No· A· 427/2

Beginning :

एवमृत्विजि मृतेऽप्यूह्यम्। अत एव नारदः —

ऋत्विजां व्यसनेऽप्येवमन्यत्कर्म च निस्तरेत्।
लभेत दक्षिणाभागं स तस्मा···सङ्कल्पितम् ॥

अन्यशब्दार्थः पूर्ववदिहापि द्रष्टव्यः ॥

End :

तस्मादस्माभिः प्रागेव प्रसङ्गादस्मिन् काण्डे सदाचारकाण्डे चाभिहितमित्युपरम्यते। तेन प्रकीर्णशाख्यपद्धतिपाद्यं किञ्चिदत्रेह प्रतिपादितम्। अवशिष्टमिह तत्र प्रसङ्गादुक्तमनुसन्धेयम् ॥

Colophon :

इति सकलविद्याविशारद-श्रीकेशवादित्यभट्टोपाध्यायसूनु-याज्ञिक-देवणभट्टोपाध्याय-सोमयाजिविरचितायां स्मृतिचन्द्रिकायां व्यवहारकाण्डः समाप्तः ॥

1501

Sl. No. 9541 स्मृतिदर्पणम् Ms. No. P. 694/6

Beginning :

मन्दत्रिवरातपरपस्तम्बाङ्गिरोव्यासवसिष्ठशंसाः।
संवर्तशातातपविष्णुगार्ग्यसुमन्तकात्यायनकाश्यपाश्च ॥

End :

श्राद्धे तु तन्मासि मृतस्य दर्शे
श्राद्धे सपिण्डीकरणोदकुम्भे।
नवाधिमासः परिबर्जनीयो
नित्येषु गत्यन्तरवर्जितेषु ॥
श्राद्धानि कुर्यादुभयत्र पित्रो-
रुत्सर्जनोपाकरणे परैव।
दैवानि तद्वच्च घमर्षणादि-
त्येकैव पूर्वाणि परत्र कुर्यात् ॥
कारुर्यथा यः कुरुतेतितप्य-
सम्भाजसम्यग्वितत्तं विशुद्धिम्।
स्मृतिस्तथा तं स्मृतिरत्नमेनत्
संगृह्य तेनैव विसोमयाजी ॥

Colophon :

इति स्मृतिदर्पणं नाम संग्रहः समाप्तः ॥

1502

Sl. No. 9551 स्मृतिदर्पणपेटिका (स्मृतिदर्पणमणिपेटिका) Ms. No. P. 4674

Beginning

शुक्लाम्बरधरं + + । + + शान्तये ॥
त्रि × × × यश्च सर्वाः सूर्योदयादोदयमेति सा।
शुद्धातिथिस्स्यादितरश्च सर्वाः प्यूनाश्च त × × धिकाश्च वि× : ॥
× × × × × × × ×
त्रिंशन्मुहूर्ताः × × घटिकामिताः (?)।
मुहूर्तो द्वादशास्त्रियं (?) ते तु त्रिंशदहोरा × ×

End :

ननु पूर्वदिनेऽप्यपरदिनेऽपि यद्यप्यपराह्णव्याप्तिर्न स्यात् तदा + तदा पूर्वं तदभावे परा ग्राह्येत्याह । त्रिमुहूर्तगास्तमये नो चेत् परैवे × × × तेत ॥

Colophon :

श्रीमन्महीशूरदेश + + प्रक्रियाकौमुदीपूर्णचन्द्रदळपति महाराजदेवराजरक्षितेन केशव-कविना निर्मिता स्मृतिदर्पणमणिपेटिका संपूर्णा ।

1503

Sl. No. 9554 स्मृतिनवनीतम् (सदाचारसंग्रहः) Ms. No. P. 9182/1

Beginning:

प्रणम्य यादवाद्रीशं श्रियं गुरुपरम्पराम् ।
तत्कृपालब्धधीर्वक्ष्ये सदाचारस्य संग्रहम् ॥
आचारकाण्डः प्रथमः × × सम्यगीरिताः ।
मन्वादिधर्मशास्त्राणि समालोड्य सतां मुदे ।
क्रियते श्रीनिवासेन नवनीताख्यसङ्ग्रहः ॥
धर्मात्मानं × × × सदाचारस्य संग्रहम् ॥

End :

पुंसां प्रक्षाळनं युक्तं पुण्यैर्हरिकथामृतैः ।
येत्विदं धारयिष्यन्ति धर्मशास्त्रमतन्द्रिताः ॥
इह लोके सुखं प्राप्य ते गच्छन्ति त्रिविष्टपम् ॥

Colophon :

इति स्मृतिनवनीते प्रायश्चित्तकाण्डः समाप्तः ॥

1504

Sl. No. 9555 स्मृतिप्रकाशः (विद्यारण्यस्मृतिः) Ms. No. P 3026/2

Beginning :

स्त्रीणां द्रव्यनिर्णयः—

अथ स्त्रीणां स्वपुरुषार्थसाधनाधिकारनिर्णयप्रमाणान्युच्यन्ते । तत्र × × मं श्रुतिमाह— ब्राह्मणोऽस्य मुखमासीदित्यादीनि ब्राह्मणग्रहणमुत्तमजात्युपलक्षणार्थम् ॥

End :

यदीयमनुमितिः ततस्त्वं गृहान् गच्छ; मदीयान्यथा × × तान्याह- पत्नी गृहस्य पतिरीश्वरः; आसः अस्याः तथा गच्छ; गत्वा च वशिनी स्वामिनी × त्वा वितथं यज्ञ वक्तव्यमावदशेसि (?) अभिमुखेन वदेदिति भावः ॥

Colophon :

इति विजयनरसिंहासनस्थ-श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीमद्विद्यारण्य-श्रीचरणैः कृतं विज्ञानेश्वराद्क्रियाख्यानेषु निर्णीत सकलस्मृतिसारं सङ्गृह्य स्मृतिप्रकाशाख्यं स्त्रीद्रव्योद्धारप्रकरणं समाप्तम् ॥

1505

Sl. No. 9 56 स्मृतिभास्करः (भास्करधर्मशास्त्रम् शुद्धिमयूखः) Ms. No. P. 751

Beginning :

स्त्रीणां द्रव्यनिर्णयः —

अथ स्त्रीणां स्वपुरुषार्थसाधनाधिकारनिर्णयप्रमाणान्युच्यन्ते । तत्र प्रथमं श्रुतिमाह—'ब्राह्मणोऽस्य मुखमासीत्'; इत्यादिः । ब्राह्मणग्रहणमुत्तमजात्युपलक्षणार्थम् । स्मृतिश्च —

'व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह ।
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः ॥

धर्मशास्त्रानुसारेणेति । × × × × × × × × × × ॥

End :

पूषा त्वा, पूषा- आदित्यः, त्वा— इतः प्रदेशात् अग्निसमीपं नयतु × × × प्रवहणं यदीयमनुमितिः । ततस्त्वं गृहान् गच्छ— मदीयान्यथागता + + तथा गच्छ; गत्वा च वशिनी स्वामिनी भूत्वा वितथं यज्ञ तदीय वक्तव्यं आवदासीः— अभिमुखी न वदेरिति भावः ॥

Colophon :

इति श्रीविजयनगरसिंहासनस्थ-श्रीमद्विद्यारण्यश्रीचरणैः कृतं विज्ञानेश्वरादिव्याख्यानेषु निर्णीतं सकलश्रुतिस्मृतिप्रकाशाख्यं स्त्रीद्रव्योद्धारप्रकरणं समाप्तम् ॥

1506

Sl. No. 9560 **स्मृतिभास्करः** **Ms. No. P. 1624/2**

(भास्करधर्मशास्त्रम् श्राद्धमयूखः)

Beginning :

तिथेर्मयूखं प्रतिपाद्य सम्यगारभ्य धामाथ × × ।
श्राद्धं वदत्यत्र स नीलकण्ठः सम्प्रेरितः श्रीभगवत्सवित्रा

End:

सङ्कल्प्य पिण्डं × स्य एकोद्दिष्टं श्राद्धं कुर्यात् । सर्वत्र जीवच्छ्राद्धे प्रेतशब्दोच्चारणं नास्ति । अत्रोक्तजलधेनुविधिः विष्णुधर्मोत्तरे –

जलधेनुं प्रवक्ष्यामि प्रीयते दत्तयाऽनया ।
यया देवो हृषीकेशः सर्वेशः सर्वभावनः ॥
× × दूर्वा × × × × × ॥

Colophon :

-- -- --

1507

Sl. No. 9561 **स्मृतिभास्करः** (भास्करधर्मशास्त्रम्, शुद्धिमयूखः) **Ms. No. P. 1823/1**

Beginning :

यो लीलया सन्तनुतेऽत्रविश्वं तत्पालयत्यात्मनि विश्वरूपे ।
लयं नयत्याशु च पूर्णरूपः शिवं तनोत्वाशु रविर्ममासौ ॥

श्रुतिस्मृतीर्वीक्ष्य पुराणजातं तत्तन्निबन्धानपि सन्निबन्धान् ।
श्रीशङ्करस्यात्मजनीलकण्ठो द्रव्यादिशुद्धिं विवृणोति सर्वाम् ॥

End :

एतत्पूर्णसंवत्सरकपरमिति केचित् । तत्रापि मूलं मृग्यम् । अत्र पितरि मृते न × × बं श्राद्धं न कुर्यादिति निषिध्यते । अन्यमृतौ तु कुर्यादिति तु निष्प्रत्यूहम् । सामान्य-वाक्यप्राप्तमेवानूद्यते इति दिक् ॥

Colophon :

इति श्रीमीमांसकशङ्करभट्टात्मज-भट्टनीलकण्ठेन .... भास्करे शुद्धिमयूखः ॥

1508

Sl. No. 9562 स्मृतिभास्करः Ms. No. P. 2502

[भास्करधर्मशास्त्रम्] (समयादिव्यवहारान्तपञ्चमयूखाः)

Beginning:

यो लीलया सन्तनुतेऽत्र विश्वं
तत्पालयत्यात्मनि विश्वरूपे ।
लयं नयत्याशु च पूर्णरूपः
शिवं तनोत्वाशु रविर्ममासौ ॥

श्रुतिस्मृतीर्वीक्ष्य पुराणजातं × × × × × × ।
× × नीलकण्ठः तिथ्यादिकृत्यं विवृणोति सर्वम् ॥

विजातीयानप्याह याज्ञवल्क्यः —

प्रवराः साक्षिणो ज्ञेयाः श्रौतस्मार्तक्रियापराः ।
यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः ॥
+ + + + + +

नारदः —

अनिर्दिष्टस्य साक्षित्वे स्वयमेवेति यो वदेत् ।
स्वय × × × षाक्षेषु × × × ॥

Colophon :

१९२ तमे पत्रे —

इति सकलशास्त्राभिज्ञ-भट्टाभिधनारायणसूरिसूनु-मीमांसक-शङ्करभट्टात्मज-नीलकण्ठकृते भास्करे नीतिमयूखः ॥

1509

Sl. No. 9563 स्मृतिभास्करः (भास्करधर्मशास्त्रम्) Ms. No. C. 2792
(नीतिव्यवहारदानमयूखाः)

Beginning:

देवर्षिरक्षसङ्घानामवाङ्मनसगोचरम् ।
प्रत्यक्षमपि तीर्थानां सर्वदानमुपास्महे ॥
पितृसाहित्यसंसिद्धिहेतुमुक्त्वाथ तत्सुतः ।
नीलकण्ठः प्रकुरुते राजनीतिं नृपाः × × ताम् ॥

End :

नवग्रहदक्षिणादानमन्त्रः पूर्वमेवोक्तः । मात्स्ये—

× × भूता × × × पूजनीयासि रोहिणि ।
सर्वतीर्थमयी यस्मादतश्शान्तिं प्रयच्छ मे ॥

इति कपिलायाः ॥

Colophon :

इति श्री + + गर्गुरुभट्टनारायणसूनुपराजितशिरोरत्नमीमांसकशङ्करभट्टात्मज-भट्टनीलकण्ठकृते भास्करे दानमयूखस्समाप्तः ॥

1510

Sl. No. 9569 स्मृतिभास्करः (भास्करधर्मशास्त्रम्) Ms. No. p. 105/1
(प्रतिष्ठामयूखः)

Beginning :

महोमहस्समाराध्य जलोत्सर्गमथोक्तवान् ।
प्रतिष्ठां सर्वदेवानां नीलकण्ठो वदत्यसौ ॥

तत्र तत्कालः विष्णुधर्मोत्तरे—

चैत्रे वा फल्गुने वाऽपि ज्येष्ठे वा माधवे तथा ।
माघे वा सर्वदेवानां प्रतिष्ठा शुभदा सिते ॥

End :

जीर्णोद्धारविधानं च नृपराष्ट्रविवर्धितम् ।
तदत्राधिष्ठितान् देव प्रोद्धरामि तवाज्ञया ।।

इति देवस्य जीर्णदोषं श्रावयित्वा शिल्पियुत: साङ्गं सिद्धं कल्पयित्वा,

× + + + + +

अस्माकं सकुटुम्बानां सुप्रीतो भव सर्वदा ।। इति ।।

Colophon :

× × इति × × × × श्रीमहाराजाधिराजपूजितसरस्वत्यां × × कमल-मीमांसक-शंकरभट्टात्मज- भट्टनीलकण्ठभट्टेन कृते × × प्रतिष्ठामयूखे × × म: समाप्त: ।।

1511

Sl. No. 9574 स्मृतिभास्कर: Ms. No. C. 2999

(भास्करधर्मशास्त्रम्) (समयमयूखान्त:)

Beginning :

यो लीलया संतनुतेऽत्र विश्वं तत्यालयत्यात्मनि विश्वरूपे ।
लयं नयत्याशु च पूर्णरूपं शिवं तनोत्वाशु रविर्ममाद्य ।।
श्रुती: स्मृतीर्वीक्ष्य पुराणजातं तत्तन्निबन्धानपि सन्निबन्धान् ।
श्री शङ्करस्यात्मजनीलकण्ठो द्रव्यादिद्धिं विवृशुणोति सर्वाम् ।।

End -

त्रिदण्डैकदण्डाभिप्रायेण व्यवस्थात्परे। सामान्यतो निषिद्धस्य व्यामत्राक्येनोपसंहार इत्यन्ये। वस्तुतस्तु × × दीनि वचनानि महानिबन्धेषु न दृश्यन्ते ।

Colophone :

इति कलिबर्ज्यनिर्णय: । इति मीमांसकशङ्करभट्टात्मज-भट्टनीलकण्ठेन कृते भास्कराख्ये निबन्धे समयमयूख: ॥

Extra Information :

अत्रसमयमयूखमात्रमस्ति ।।

1512

Sl. No. 9578 स्मृतिमञ्जरी Ms. No. P. 5833/2

Beginning :

× × × × मकरकृतेरित्याहुः। एके श्रुतिनिदर्शनोऽत्र। तथा च। × न्द्रो यतीन् सालावृकेभ्यः प्रायच्छत्। × × × × × प × व्यं प्रायश्चित्तं प्रयच्छदिति॥

End :

कार्तिक्या शुक्लपक्षे तु तदा दीपावली भवेत्।
स्नानं सुमङ्गलैर्युक्तं महापातकनशनम ॥ ६ ॥
द × (?) र्द सङ्गमादूर्ध्वं प्रतिपद्यां न कारयेत्।
× × × दीपावलीं समाचरेत्॥

Colophon :

२७तमेपत्रे—

इति भट्टमाधवात्मज-गोविन्दराजोच्चारितायां स्मृतिमञ्जर्यां महापातकप्रायश्चित्तानि॥

1513

Sl. No. 9579 स्मृतिमिमांसा Ms. No. C. 1023

Beginning :

श्रीमन्नारायणं नत्वा जगतामादिकारणम्।
संक्षेपस्मृतिमीमांसां करोमि बुधतुष्टये॥
रङ्गनाथाख्यविबुधः रङ्गनाथपुरे स्थितः॥

तत्र तावत् धर्मशास्त्रप्रणेतारः —

भृग्वङ्गिरो गौतमश्च व्यासश्चात्रिश्शुक्रस्तथा।
वासिष्ठ-दक्ष-संवर्त-शातातप-पराशराः॥

\+ + + + +

तत्रादौ धर्मदेशानाह मनुः –

सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् ।
तद्देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥

End :

सपिण्डीकरणं नैव मृतानां ब्रह्मचारिणाम् ।
दाहादिषोडशश्राद्ध × × यथास्मृति ॥
द्वादशेऽहनि संप्राप्ते कृत्वा नैव तु पार्वणम् ।
नाराय × × × × × ॥

Colophon :

— — —

1514

Sl No. 9581 | स्मृतिमुक्ताफलम् (श्राद्धकालप्रायश्चित्तकाण्डाः) | Ms. No. P. 158

Beginning :

व्यासः–

ततः सन्तर्पयेत् देवान् ऋषीन् पितृगणांस्तथा ।
आदौ ओंकारमुच्चार्य नामान्ते तर्पयामि च ॥
देवान् ब्रह्मऋषींश्चैव तर्पयेदक्षयोदकैः ।
तिलोदकैः पितॄन् भक्त्या स्वतन्त्रोक्तविधानतः ।
यज्ञोपवीती देवानां निवीती ऋषितर्पणे ॥
प्राचीनावीती पित्र्ये तु स्वेन तीर्थेन भावितः ॥

चन्द्रिकायां सार्धयामादूर्ध्वं मध्याह्नः । तत्र माध्याह्निकानन्तरं नित्यतर्पणं कुर्यात् । तच्च देवर्षिपितृतर्पणमिति माधवीये ॥

End :

ब्रह्महत्या-सुरपान-स्वर्णस्तेयेषु ज्ञानतः ।
कृतेषु निष्कृतिर्नास्ति विहितान् मरणादृते ॥
यः कामतो महापापं नरः कुर्यात् कथञ्चन ।
न तस्य निष्कृतिः दृष्टा भृग्वग्निपतनादृते ॥

इति । स्मृत्यन्तरे × × × × × × × × × × ॥

Colophon :

— — —

1515

Sl. No. 9582 स्मृतिमुक्ताफलम् (आचारकाण्डः) Ms. No. P. 489

Beginning :

भवकोदण्डदळनं भवबन्धविमोचनम् ।
दशकण्ठरिपुं वन्दे दशस्यन्दननन्दनम् ॥
वैद्यनाथाध्वरी नाम दासो वाधूलवंशजः ।
स्मृतिमुक्ताफलं नाम कुरुते सारसंग्रहम् ॥

End :

अथानुक्तः आचामनादिः साधारणो धर्मः तत्तदवसरे वक्ष्यते । व्यासः–
मोक्षाश्रमं यश्चरते यथोक्तं शुचिः सुसङ्कल्पितबुद्धियुक्तः ।
अनिन्धनं ज्योतिरिव प्रशान्तं स ब्रह्मभावं श्रयते द्विजातिः ॥ इति ॥

Colophon :

इति वैद्यनाथदीक्षित-विरचिते स्मृतिमुक्ताफले वर्णाश्रमधर्मनिरूपणं नाम प्रथमः परिच्छेदः ॥

1516

Sl. No. 9583 स्मृतिमुक्ताफलम् (प्रायश्चित्तकाण्डः) Ms. No. P. 1039/2

Beginning :

श्रीरामचरणाम्भोजलीनमानसषट्पदः ।
वैद्यनाथाध्वरी प्रायश्चित्तं सङ्गृह्य भाषते ॥

प्रायश्चित्तकाण्डमारभ्यते ॥

End :

अर्वाक्तु × × × ×या: पडब्दं कृछ्रमाचरेत् ।
प्रत्याम्नायो गवां देयस्सार्शीतिधनिनां गतम् ॥
तथाष्टादशलक्षाणि गायत्र्यास्सञ्जपेद्बुधः ॥

Colophon :

इति वैद्यनाथदीक्षितविरचिते स्मृतिमुक्ताफले प्रायश्चित्तनिरूपणं नाम षष्ठः परिच्छेदः ॥

1517

Sl. No. 9584 स्मृतिमुक्ताफलम् (आशौचान्तः) Ms. No. P.1069

Beginning :

दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च ।
प्रेतपिण्डक्रियावर्जमाशौचे विनिवर्जयेत् ॥

End :

आशौचान्ते कृतस्नानः स्वस्तिवाचनपूर्वकम् ।
ब्राह्मणान् भोजयेत्तत्र शुद्धये विष्णुतुष्टये ॥ इति ॥

Colophon :

इति वैद्यनाथदीक्षितविरचिते स्मृतिमुक्ताफले आशौचनिरूपणं नाम तृतीयः परिच्छेदः ।
आशौचनिर्णयः समाप्तः ॥

Extra Information :

ग्रन्थेऽस्मिन् आशौचकाण्डान्तो भागश्चकास्ते ॥

1518

Sl. No. 9586 स्मृतिमुक्ताफलम् (वर्णाश्रमधर्मकाण्डाः) Ms. No. P. 2170/1

Beginning :

अङ्के विहारिणमनुक्षणमद्रिजायाः तं केवलं कलभसन्निभमाश्रयामः ।
नित्यं य एव बहुभिः निजसेवकानां प्रत्यूहपुञ्जकवलैः परितोषमेति ॥

\+ + + + +

वैद्यनाथाध्वरी रामभट्टो नापूरवंशजः ।

स्मृतिमुक्ताफलं नाम कुरुते सारसङ्ग्रहम् ॥

End :

योगाश्रमं यश्चरते यथोक्त शुचिः सुसङ्कल्पितबुद्धिमुक्तः ।

अनिन्धनं ज्योतिरिव प्रशान्तं स ब्रह्मभावं श्रयते द्विजातिः ॥ इति ॥

Colophon :

इति श्रीवैद्यनाथदीक्षितविरचिते स्मृतिमुक्ताफले वर्णाश्रमधर्मनिरूपणं नाम प्रथमः परिच्छेदः ॥

Extra Infomation :

अत्र वर्णाश्रमधर्मकाण्डमात्रमास्ति ॥

1519

Sl. No. 9589 स्मृतिमुक्ताफलम् (श्राद्धकाण्डः) Ms. No. P. 2273/2

Beginning :

अथ श्राद्धकाण्डम्–

सीतारामपदाब्जेन वैद्यनाथविपश्चिता ।

स्मृतीनां सारमालोच्य श्राद्धकाण्डो विरच्यते ॥

स्नात्वा कर्माणि कुर्वीतेति स्मरणात् स्नातस्यैव प्रायश्चित्तकर्मण्यधिकारात् वारुणस्नाने अशक्तः मुमूर्षुः बाह्यादिस्नानमाचरेत् ॥

End :

ब्रह्मसमः– ब्रह्मप्राप्तिः परमं फलं प्रोक्तमित्यर्थः । हारितः –

कालेऽन्यगते पात्रे विडीना (?) प्रतिपादितम् ।

प्राप्नोत्यन्तं तथा दत्तं × यत्रोपतिष्ठते ।

यन्नाम्ना पानयेत् पिण्डं तदन्नं ब्रह्म शाश्वतम् ॥

Colophon:

इति वैद्यनाथविरचिते स्मृतिमुक्ताफले श्राद्धनिरूपणं नाम चतुर्थः परिच्छेदः ॥

1520

Sl. No. 9590 **स्मृतिमुक्ताफलम्** (आशौचकाण्डः) Ms. No. P. 2273/3

Beginning :

अथ आशौचप्रकरणम् । तत्र शङ्खः–

दानं प्रतिग्रहो होमः स्वध्यायः पितृकर्म च ।
प्रेतपिण्डक्रियावर्ज्यं आशौचे विनिवर्तयेत् ॥ इति ॥

आशौचशब्दार्थः स्मृतिचन्द्रिकायामभिहितः – सपिण्डजनने मरणे वा यदप्राय × × × × न्यं दानादिकर्म स्वयोग्यतापादकं पापविशेषात्मकं वा आशौचशब्देनोच्यते इति ॥

End :

एतत् सपिण्डविषयम् –

आरम्भात् प्राक् परं स्नायान् तस्या श्शुद्धिर्भवष्यति ।
सर्वेषां च सपिण्डानां दहनाद्येव योषिताम् ॥

इति स्मरणात् ॥

Colophon :

इति वैद्यनाथाध्वरिणा सङ्गृहीते स्मृतिमुक्ताफले आशौचकाण्डः समाप्तः ॥

1521

Sl. No. 9591 **स्मृतिमुक्ताफलम्** (तिथिनिर्णयकाण्डः) Ms. No. P. 2273/12

Beginning :

अथ कालो निरूप्यते– स च कर्मण्यङ्गभूतः । तदाह गर्गः–

तिथिनक्षत्रवारादिसाधनं पुण्यपापयोः ।
प्रधानगुणभावेन स्वातन्त्र्येण न ते क्षमाः ॥

इति । व्यासोऽपि–

यत्तिथौ यत्र नक्षत्रे वारे यत्र च यद्यथा ।
विहितं वा निषिद्धं वा फलकः निषिद्धं भजेत् ॥

End :

बवादिकरणानां तिथ्यर्थं परिमितत्वेन दिनद्वयव्यापित्वसन्देहाभावात् उदयेऽस्तमये वा यस्मिन् दिने करणसद्भावः तस्मिन्नेव दिने कर्मानुष्ठेयम् । सङ्क्रान्तिग्रहणकालः नैमित्तिकस्नानादि प्रकरणे निरूपितः ॥

Colophon :

इति वैद्यनाथदीक्षितविरचिते स्मृतिमुक्ताफले कालनिरूपणं नाम पञ्चमः परिच्छेदः ॥

1522

Sl. No. 9606 स्मृतिमुक्ताफलम् श्राद्धकाण्डानुक्रमणी) Ms. No. P. 8592/2

Beginning :

१. सर्वप्रायश्चित्तम्

२. नामकीर्तनादिफलम् ।

३. उत्क्रान्तिगोदानजप्यानि दक्षिणे कर्णे जप्यौ ॥

४. वारादिदोषस्य दानम् ॥

End :

श्राद्धदेशे प्रकल्प्यद्रव्याणि ।

श्राद्धे देयपुष्पाणि ॥

श्राद्धे वर्ज्यानि पुष्पाणि ।

श्राद्धे प्रदेयं चन्दनम् ।

श्राद्धे वर्ज्यचन्दनम् । प्रमेयम् ३२८ ॥

Colophon :

— — —

1523

Sl. No. 9607 स्मृतिमुक्ताफलम् (वैद्यनाथीयः (?)) Ms. No. P. 2171

Beginning :

× × × × × × ।

सिन्धुस्नानं प्रकुर्वीत गङ्गास्नानफलं भवेत् ॥

सङ्ग्रहेऽपि –

× × मजा कृष्णचतुर्दशी या
तस्याश्च पर्यांशक एव युक्तः ।
स्नात्वा समुद्रेषु तदेव पापं
निहन्ति जन्मान्तरसञ्चितं यत् ॥

End :

सायमर्घ्यं प्रकुर्वीत तिष्ठन्नेव द्विजोत्तमः ।
आसीनो यदि वा कुर्यात् क्षिप्रमात्मा विनश्यति ॥

पुलस्यः–

आसीनो यदि मोहे वा × चरेद्विजः ।
प्रज्ञाहानिर्यशोहानिः वीर्यहानिर्भवेद्ध्रुवम् ॥

Colophon :

इति आह्निकम् ॥

1524

Sl. No. 9608 **स्मृतिमुक्ताफलम्** (वात्स्यश्रीनिवासाचार्यीयः) Ms. No. P. 3151

Beginning :

कल्याणाद्रिमहाधीरः कल्याणगुणवारिधिः ।
कल्यणरामः कृपया कल्याणानि करोतु नः ॥
राजाधिराजवेषाय राजत्कोदण्डबाहवे ।
राजीवचारुनेत्राय रामभद्राय मङ्गलम् ॥

श्राद्धकाण्डः सङ्गृह्यते– मुख्यस्नाने अशक्तः मुमूर्षुः × × × कुर्यात् ॥

End:

प्राजापत्येन शुद्धः स्यात् ज्ञातिगोत्रे न दोषकृत् ।
श्वशुरस्य गुरोर्वापि मातुलस्य महात्मनः ।
ज्येष्ठभ्रातुश्च पुत्रस्य ब्रह्मनिष्ठस्य योगिनः ।
एतेषां श्राद्धशेषान्नं भुक्त्वा दोषं न विन्दति ॥

ब्राह्मे मुहूर्ते चोत्थाय पादौ प्रक्षाळ्य वाग्यतः ।
आचम्य च हरिं स्मृत्वा सर्वव्यापिनमीश्वरम् ॥

End :

निरन्तरं रत्नशास्त्रे सदाभ्यासं करोति यः ।
स श्रियं लभते कीर्तिं तस्य वृद्धिस्सदा भवेत् ॥

\+ + + +

रङ्गनाथेन रचितः स्मृतिसारस्य संग्रहः ॥

Colophon :

इति स्मृतिसारसङ्ग्रहे सर्वसङ्ग्रहकांण्डस्समाप्तः ॥

Extra Infomation :

क्षयमासे चित्रभानौ शाके देवयुगे रवौ ।
चन्द्रेण सहिते वर्षे श्रीरङ्गपुरवासिना ॥

रङ्गनाथेन रचितः स्मृतिसारस्य संग्रहः ।
दुर्मुख्यब्दे शकाख्येऽष्टपञ्चसप्तेन्दुसंज्ञिके ॥

आषाढे ह्यधिकेमासे कृष्णपक्षे तु मङ्गले ।
वारे चतुर्दशदिने श्रीनिवासतनूभुवा ॥

रङ्गनाथेन लिखितं पुस्तकं त्रिदमादशशत् ॥
सम्पूर्णमगमच्चास्मिन् हिने ग्रन्थो विधेर्बलात् ॥

इति ग्रन्थसमापनकालनिष्कर्षोऽन्ते चोट्टङ्कितः ।

ग्रन्थेऽस्मिन्– आह्निकम्, पूर्वापरप्रयोगविचारः, प्रायश्चित्तविषयः, तद्विभागविचारः, रत्नपरीक्षणविचारः इत्येते मुख्या अंशाश्च विस्तृताः ॥

1541

Sl. No. 9661 **स्मृतिसारसमुच्चयः** Ms. No. P. 5982/7

Beginning:

अन्वा × क स्मृतिषु व्याख्यातृप्रतिपत्तये ।
स्मृतिसारं तु वक्ष्यामि सुखानुष्ठानसिद्धये ॥

संवर्तः –

स्वभावाद्यत्र विचरेत् कृष्णसारः शुभो मृगः ।
धर्मक्षेत्रं तु विज्ञेयं द्विजानां धर्मसाधनम् ॥

End :

तत्रायं विशेषः–

बहुपत्न्येकपक्षे तु ज्येष्ठां चेत् पूर्वमारणी ।
तां दहेदग्निहोत्रेण पुनराधाय चान्यया ॥
कनिष्ठा तु मृता पूर्वं दहेन्निर्मन्थ्य वह्निना ।
निर्मन्थ्यं चैव सावासा न हि ते सूतिकातनोः ॥

Colophon :

इति उभयविवाहसंसर्गनिर्णयविधिः । इति स्मृतिसारसमुच्चय समाप्तः ॥

1542

Sl. No. 9664 **स्मृतिसिन्धुः** Ms. No. A. 185

Beginning :

श्रीमत्कृष्णपदाब्जेन श्रीनिवासविपश्चिता ।
स्मृतीनां सारमालोक्य स्मृतिसिन्धुर्वितन्यते ॥

स्नात्वा कर्माणि कुर्वीतेति स्मरणात् , स्नातुश्चैव प्रायश्चित्तादिकर्माणि अधिकारात् वा सुमस्नानेन (?) अशक्तो मुमूर्षुः नाद्यादिस्नानमाचरेत् ॥

1528

Sl. No. 9618 स्मृतिरत्नाकरः (सदाचारसङ्ग्रहः) Ms. No. P. 1047

Beginning :

वर्णाश्रमाणां धर्माणां व्यवस्थार्थं युगे युगे ।
लीलयैव गृहीतेच्छावपुषे विष्णवे नमः ॥
यत्प्रेष्या ब्रह्मरुद्राद्याः यदीयाज्ञा श्रुतिस्मृती ।
यः प्रभुः जगतां तस्मै परस्मै हरये नमः ॥
सर्वान्तर्यामिणे + + । + + नमो नमः ॥
अतो वचनरत्नानामाकरोयं तदुज्जलः ।
स्मृतिरत्नाकरो नाम वक्ष्यते स्मृतिसङ्ग्रहः ॥

End:

चतुर्णामाश्रमाणामहन्यहनि नित्यशः ।
विध्युक्तकर्म कर्तव्यं कामसङ्कल्पवर्जितम् ॥
वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः ।
तद्धि कुर्वन् यथाशक्ति प्राप्नोति परमां गतिम् ॥

Colophon : ....

इति श्रीहारीतकुलतिलकस्य सरस्वतीवल्लभापरनामधेयस्य श्रीवेङ्कटनाथस्य वैदिकसार्वभौमस्य कृतिषु स्मृतिरत्नाकरे सदाचारसङ्ग्रहः समाप्तः ॥

1529

Sl. No. 9624 स्मृतिरत्नाकरः (आचारकाण्डः नृसिंहभारतीयः) Ms. No. P. 5085

Beginning :

इदानीं प्रतिपदादितिथयो × × दर्शान्ताः पूर्णमासान्ता वा तिथयः प्रतिपदादयः

विहरिष्ये यथान्यायं श्रुतिस्मृतिवचोबलात् ।
व्रतारम्भे निशापूजा या तिथिः पूर्णसंज्ञिता ॥

End :

देवागारं यथाकार्यं वा × मन्येन मार्जनम् । इति ।
नारीकेलतृणैर्वापि पर्णैः कदुर्गैरपि ॥
देवशालामयशालां नारी संमार्जयेत् सदा । इति ॥

Colophon :

इति श्रीनृहिंभारतीविरचिते स्मृतिरत्नाकरे आचारकाण्डः समाप्तः ॥

1530

Sl. No. 9626 स्मृतिशास्त्रम् Ms. No. P. 6810/2

Beginning :

अथ माध्याह्निकविधिरुच्यते– ग्रामात्प्राच्यामुदीच्यां वा नदीतटाकाद्युदकं प्राप्य तटं प्रक्षाल्य तलेदर्भान्निधाय पूर्ववच्छौचाचमनं कुर्यात् ॥

End :

स विप्रो शूद्र एव स्यात् इत्युक्तं मनुरब्रवीत् ॥

स्मृतिसङ्ग्रहे–

शूद्रान्नं शूद्रसम्पर्कं मासमेकं निरन्तरम् ।
इह जन्मनि शूद्रत्वं मृतः श्व...... ॥

Colophon :

३० तमे पत्रे–

इति स्मृतिशास्त्रे मातृश्राद्धविधिः ॥

1531

Sl. No. 9628 स्मृतिशेखरः Ms. No. A. 561

Beginning :

निरुपमसुखरूपं निर्गताशेषतापं
निखिलनिगमगेयं नीलकण्ठाभिधेयम् ॥
निगलितविधि × शि × रश्शोभिताङ्गं
– – – – – – ॥

सत्पूज्यः पुरुषोत्तमः पितृपिता यस्याकरोत्पण्डितः

काव्यं सार × × × × लसद्ग्रन्थं कविप्रार्थितम् ॥

मीमांसाद्वयशब्दतर्ककलितालङ्कारपारंगतः

दृष्टान्नादनहृष्टपुष्टजनताभीष्टाय × × × ॥ २ ॥

End :

सञ्चितं यद्गृहस्थस्य पापमामरणान्तिम् ।

निर्दहिष्यति तत्सर्वमेकरात्रोषितो द्विजः ॥

इति रात्रिभोजनानन्तरकर्तव्यमाह दक्षः ।

कृत्वा चैवं ततः स्वाध्याय च समाचरेत् ।

प्रदोषपश्चिमे यामे वेदाभ्यासेन यापयेत ॥

यावच्चायं शयानो हि ब्रह्मभूयाय कल्पते ॥ ॥

Colophon :

समाप्तिमगमत् ॥

1532

Sl. No. 9640 स्मृतिसङ्ग्रहः (विद्यारण्यीयः) Ms. No. A. 613/2

Beginning :

श्रीमद्वेङ्कटनाथाय वेणुनादविनोदिने ।

वेदातीताय वेद्याय वेद्याय च नमो नमः ॥ १ ॥

यो वर्णैरिज्यते नित्यैः कर्ममिश्चोदिते निजैः ॥

तेभ्यः पवर्गदेयाश्च तन्नमामियियं (?) हरिम् ॥ २ ॥

\+ + + +

मन्वाद्यनेकस्मृतिषु वचनानि निबन्धृभिः (?)

लिखितानि समुध्दृत्य वक्ष्यते स्मृतिसंग्रहः ॥ ४ ॥

End :

तेन सर्वापरपक्षश्राद्धकरणासमर्थस्यापक्षकं महालयश्राद्धं त्रयोदश्यां कर्तव्यमित्युक्तं भवति ; पञ्च पञ्चनखा भक्ष्या इत्यादिवाक्यवत् । अथ मघात्रयोदशिश्राद्धमाह वृद्धवसिष्ठः मघायां कुर्वता ॥

Colophon : — — —

1533

Sl. No. 9641 स्मृतिसङ्ग्रहः (ताम्रपर्णिश्रीनिवासाचार्यीयः) Ms No. P. 4006

Beginning:

श्रीमदानन्दतीर्थार्यतीर्थाम्बोधिं विमथ्य यः ।
ददौ ज्ञानामृतं मह्यं तं तीर्थार्यगुरुं भजे ॥
व्यासं मरकतश्यामं स्वयं प्रीतिपतिं हरिम् ।
मत्वा मन्वादिका × × क्रियते स्मृतिसङ्ग्रहः ॥

End :

एतदनुपनीतबालसगोत्रविषयम् ।
सायंतन्यपरत्र चेन्मृततिथिः सोप्याब्दिको मासिके
सा ग्राह्यान्यप ह्न्ययो यदि तदा यत्राधिका सा मता ।
तदा
तुल्या चेदुभयापराह्णसमये पूर्वा न चेत्तद्वयोः
पूर्वेव तिसृमूर्तगास्तसमये नो चेत्परैवोचिता ॥

Colophon :

-- -- --

1534

Sl. No. 9643 स्मृतिसङ्ग्रहः (गङ्गाधरीयः) Ms. No. P. 373-1

Beginning :

श्रीमन्नृसिंहविभवे गरुडध्वजाय
तापत्रयोपशमनाय भवौषधाय ।
× × ण्णाग्निवृश्चिकजलाग्निभुजंग ×
× × × × × ॥
× × × × × × × ।
× × × × × × श्वरम् ॥
स्मृतिसङ्ग्रहवाराशिं करोमि विधिसिद्धये ।
वचनन्यायमार्गेण क्रमः कृत्स्नविनिर्णये ॥

मुनिर्यदाम्तविच्चापि किं पुनर्मादृशो जनः ॥

End :

समुद्रे समतां याति तद्वद्राज्ञां समागमः ।
यथाऽग्नौ संस्थितं चैव शुद्धिमायाति काञ्चनम् ॥
एवं घनागमास्सर्वे शुद्धिमायान्ति राजनि ॥ इति ॥

Colophon :

इति स्मृतिसंग्रहः समाप्तः ॥

आश्वलायनसूत्रेण ऋक्शाखापारगेण च ।
नारायणसुपुत्रेण नरसिंहात्मजेन च ॥
भरद्वाजकुले जातं गगाधरविपश्चिता ।
संगृह्य स्मृतिकाराणां नत्वा च लिखितं त्विदम् ॥

1535

Sl. No. 9645 स्मृतिसंग्रहः Ms. No. P. 2071/7

Beginning :

एवं कालोचितं नित्यं कमभिश्चान्वितानिशम् ।
तेभ्योपवर्गदो यश्च तन्ममापि ॥
वचनानि पदद्भिः (?) ।
लिखितानि समुद्धृत्य वक्ष्यते मृतिसंग्रहः ॥

End :

संगममुपलक्षणमिति माधवः ।
वासांसि वाससी वा सः यो न दद्यात् स्वपैतृके ।
सप्तजन्म भवेन्नग्नो पितृवस्त्रापहारकः ॥

Colophon :

-- -- -

Extra Information :

ग्रन्थोऽस्मिन्– शौचविधिः, दन्तधावनम्, आचमनस्नानसंध्याजपविधिः, तुलसीमणिधारणम्, रुद्राक्षधारणम्, आमलकादिस्नानक्रमः, अक्षयविशेषः, तिलतर्पणम्, स्नानभेदप्रभेदाः, वस्त्रनिष्पीडन

क्रमः, अस्पृश्यस्पर्शः, ब्रह्मयज्ञकालः, पंचमहायज्ञविधिः, मृताहनिर्णयः, मृताहपरिज्ञानम्, ज्ञातीनां मृताहकालः, एकोद्दिष्टकालः, नग्नश्राद्धम्, सपिण्डीकरणम्, उत्कर्षापकर्षणम्, व्युत्क्रम-सापिण्ड्यम्, अनुगमसापिण्ड्यम्, स्त्रीसपिण्डीकरणम्, यतिविषयः, श्राद्धाधिकारिणः, अशक्त-विषयः, बहुपुत्रविषयः, श्राद्धसाङ्कर्यम्, पुनस्संस्कारकालः, पैतृमेधिकप्रयोगः, आशौचविषयः, सपिण्डीकरणनिर्णयः– इत्येते विषयास्सन्ति ॥

1536

Sl. No. 9653 — स्मृतिसारः — Ms. No. A. 531

Beginning :

अपुत्रायास्सपत्नीजः श्राद्धं कुर्यात्स्वमातृवत् ।
पार्वणोक्तविधानेन पितामह्यादिभिस्सह ॥

अत्र स्वमातृमरणे महालयाष्टकादौ ×× सपत्नीमातॄणां एकोद्दिष्टविधानं प्रागुक्तम् । अत्र प्रजापतिः ॥

End:

अष्टोत्तरसहस्रं वा शतमष्टाधिकं च वा ।
अष्टाविंशतिरष्टौ वा एकैकस्य यथाक्रमम् ॥

Colophon:

समाप्तिमगमदयं ग्रन्थः ॥

1537

Sl. No. 9654 — स्मृतिसारदर्पणम् — Ms. No. P. 4535/1

Beginning

ध्यायेन्नीलोत्पलश्यामं रामं राजीवलोचनम् ।
जानकीलक्ष्मणोपेतं जटामकुटमण्डितम् ॥
चैत्रमासे जगद्ब्रह्म ससर्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रन्तु तथा सूर्योदये सति ॥ १ ॥

End :

माधवीये मरीचिः–

मातुलैक्याद्-द्विपितृकौ भ्रातरावन्यगोत्रजौ ।
विवाहं सूतकं तत्र त्रिरात्रं मृतकं तयोः ॥

इति द्विः ॥

Colophon :

इति दत्तप्रकरणं समाप्तम् ॥

1538

Sl. No. 9655 स्मृतिसारसङ्ग्रहः (ब्रह्मानन्दीयः) Ms. No. P. 2513

Beginning :

प्रणम्य चरणौ गुरोः श्रुतिपुराणमुख्योदितं
प्रमाणसि × × × विचिन्त्य संगृह्यते ।
सतां विशयशातनोद्गतहृदःप्रचारे चिरं
प्रतीचिमुख × × तत्सदसि वादिमोहाय च ॥

बाहुल्याच्च प्रमाणानां मुखपाठो हि दु × × ।
× × तेऽतत्संकोच्य सशतार्धशतत्रयम् ॥

End :

अतः प्रयोजनाभावात् द्वैतं न प्रतिपाद्यते ।
अनुवदद्वैतमद्वैतं प्रतिपादयति श्रुतिः ॥ इति ॥

इति ब्रह्मात्मैक्यतात्पर्यवचनानि ॥

सत्यबोधसुखपूर्णलक्षणं तत्त्वमर्थविभवं सनातनम् ।
मत्स्वरूपमशुभापहं शुभं भक्तिगम्यममलं सदा नुमः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीमच्छिवकाशीविश्वेश्वरमणिकर्णिकातीरस्थ-श्रीजयकृष्णानन्दपादपद्माराधक-श्रीवेङ्कटकृष्णानन्दशिष्येण बालब्रह्मानन्दसूरिणा विरचिते स्मृतिसारसंग्रहे उत्तरार्धं समाप्तम् ॥

1539

Sl. No. 9656 स्मृतिसारसङ्ग्रहः (ता ॥ श्रीनिवासीयः) Ms. No. C. 1010

Beginning :

श्रीमदानन्दतीर्थार्य × × × × × ।
× × × × × तीर्थार्यगुरुं भजे ॥
व्यासं मरकत × × × × × × × ।
× × × × वक्ष्यते स्मृतिसङ्ग्रहः ॥

End :

एत × × × गृहस्थस्य द्विगुणं ब्रह्मचारिणः
वानप्रस्थस्य त्रिगुणं यतीनां तु चतुर्गुणम् ॥
स्त्रीशूद्रप्रभृतीनां तु यावद्गन्धक्षयो भवेत् ।

मृताशौचे—

लिङ्गे चकं गुदे चैकं तिस्रः सव्ये करे मृदः ।
क × × × × × ॥

Colophon :

— — —

1540

Sl. No. 9657 स्मृतिसारसंग्रहः (गङ्गाशास्त्रीयः) Ms. No. C. 1019

Beginning :

संस्मृत्य गोपालपदाम्बुजद्वयं
प्रीत्या बुधानां स्मृतिसारसङ्ग्रहः ।
श्रीरङ्गनाम्नीं नगरीमधिष्ठितो
रङ्गाभिधानो विलिखामि साम्प्रतम् ॥

Colophon :

प्रमोदूत धनुरंशुक्ल प्रथमायां गुरोर्दिने ।
रचितः श्राद्धकाण्डोऽयं वात्स्यश्रीवाससूरिणा ॥

1525

Sl. No. 9609 स्मृतिमुक्तवली Ms. No. P. 2191

Beginning :

× × स्वशाखायामानाम्नानं कर्म शाखान्तराधिकरणन्यायेन × न्तरादुपहृत्यानुष्ठेयमि-त्याह कात्यायनः—

यन्नाम्नानं स्वशाखायां परक्य (?) मविरोधि च ।
विद्वद्भिस्तदनुष्ठेयं अग्निहोत्रादिकर्मसु ॥

× × × × स्मृतिरत्नावल्यां कालद्रव्यसंपत्तेः ।

End :

अन्यगोत्राय यो दत्तः स एव जनकस्य च ॥
गोत्रे न विवहेत्कन्यां तत्पु × × × ॥
दातृगोत्रसमुद्भूता दत्तगोत्रसमुद्भवः ॥
उद्वहेत्पञ्चमीं षष्ठीमित्युवाच बृहस्पतिः ।
स्मृतिमुक्तावलीनामश्रीकृष्णार्येण संस्मृता ॥

Colophon :

— — —

1526

Sl. No. 9612 स्मृतिरत्नम् Ms. No. P. 4036

Beginning :

हारिते—

ऋतुपक्षे तु पूर्वे तु वारे क्रूरे व्रतं स्मृतम् ।
स्नात्वा दैवतमादाय देवताभ्यो निवेदयेत् ॥
अपूपं लवणं मुद्गं गुडमिश्रं तथा हविः ।
दद्याद्ब्राह्मणपत्नीभ्यो निशि भोजनमेव च ॥
चतुर्थेऽहनि कर्तव्या कन्नुशान्तिस्तु यत्नतः ॥

End :

यावदन्नमनुतिष्ठिनं (?) तावत्पात्रं न धारयेत् ।
उद्दिष्टान्नं त्यजेत्पात्रं राजसं हविरुच्यते ॥

संवर्तः–

अङ्गुष्ठना तर्जनी चैव मध्यमा च तृतीयका ।
तिस्रश्चाङ्गुलयः प्रोक्ताः प्रशस्ताः पात्रधारणे ॥

Colophon :

इति गोविन्दाचार्यसुत श्रीनिवासाचार्यविरचिते स्मृतिरत्ने तृतीयं प्रकरणम् ॥

1527

Sl· No. 9616 स्मृतिरत्नकोशः (दत्तात्रेयीयः) Ms· No P·4813

Beginning :

वन्देऽहं हरिममलं सत × × दानन्दविग्रहोल्लसितं ।
सकलकलासारनिधिं दत्तात्रेयाख्य × खिललो × × ॥
× × विबुधकृतं संग्रहमुद्धत्य धर्मशास्त्राणाम् ।
दत्तात्रेयविपश्चिच्चक्रे स्मृतिरत्नकोशमखिलार्थम् ॥

End :

यवस्यात्सर्षपैः षड्भिः गुञ्जा स्यात्त्रिभिर्यवः ।
गुञ्जाभिः × भिश्चैको माषकः परिकीर्तितः ॥
तैः षोडशैः कर्षकस्तु पलं कर्षचतुष्टयम ॥

Colophon :

इति सुवर्णादिपरिमाणं समाप्तम् । इति स्मृतिरत्नकोशे × × द्वादशकोशः ॥
माधवमुखविबुधकृतं सङ्ग्रहमुध्दत्य धर्मशास्त्राणाम ॥
दत्तात्रेयविपश्चिच्चक्रे स्मृतिरत्नकोशमखिलार्थम् ॥
इति स्मृतिरत्नकोशस्समाप्तः ॥

End :

अथ कालादर्शकारश्च –

नित्यस्य चोदकुम्भस्य नित्यमासिकयोरपि ।
प्रत्याब्दिकस्य चालभ्ययोगेषु निहितस्य तु ॥
सम्पाते देवताभेदाः श्राद्धयुग्मं समाचरेत् ॥

इति दर्शमासिकयोरपात्येतन्मा च मासिक ॥

Colophon :

— —

1543

Sl. No. 9666 स्मृत्यर्थसागरः Ms. No. P. 3362/28

Beginning:

श्रीनृसिंहं मध्वगुरुं श्रीव्यासं नौमि सद्गुणम् ।
सत्सुखस्वात्मरूपं तं शुभकर्मफलप्रदम् ॥
कलौ प्रवृत्ते बौद्धादिमतं रामानुजं तथा ।
शके ह्येकोनपञ्चाशदधिकाब्दसहस्रके ॥
निराकर्तुं मुख्यवायोस्सन्मतस्थापनाय च ।
+ + + +
सन्नुत्य कुर्मस्तत्तुष्ट्यै स्पष्टं स्मृत्यर्थसागरम् ॥

End :

निनेतारमन्वास्य प्रकीर्णकेशा ज्ञातयोऽन्त्यालभेरन् अपसव्यं कृत्वेति । प्रवृत्ताग्रा छिन्नाग्राः । घटस्फोटाभावे पतितं ज्ञात्वापि बान्धवानां धर्माधिकाराभावात् अवश्यं घटस्फोटाशौचादिकं कार्यम् ॥

Colophon :

इति स्मृत्यर्थसागरे आशौचनिर्णयाख्यः द्वितीयस्तरङ्गः ।
छलारिश्रीनृसिंहेन कृते स्मृत्यर्थसागरे ।
स्यादाशौचतरङ्गोऽयं श्रीमध्वपतितुष्टिदः ॥

1544

Sl. No. 9670 **स्मृत्यर्थसारः** (श्रीधरीयः) Ms. No. P. 3966

Beginning :

× × × × प्रकीर्णेष्वनेकधा।
अनुष्ठानोपकारार्थं स्मृतिच्छिद्रं प्रयत्नतः ॥
पुराणन्यायमीमांसो × × × ×
× × × लोल्लटाद्यैश्च भाषितम् ।
मन्वाद्यनेकस्मृतिषु व्याख्यातृप्रतिपादितम् ।
स्मृत्यार्थसारं वक्ष्यामि सुखानुष्ठानसिद्धये ॥

End :

अथ कृच्छ्रचान्द्रायणादिसाधारणधर्माः– त्रिकालं द्विकालं स्नानम् । सप्तकुच्छ्रे सत्कृते। सर्वस्नाने मार्जनम् । अघमर्षणं तर्पणं कृत्वोत्तीर्य घृतमन्त्रैः सावित्र्या उपस्थानम् । ततः पुण्यां गायत्रीं वा अष्ट × × × × ॥

Colophon :

इति स्मृत्यर्थसारे चान्द्रादिकृच्छ्रातिकृच्छ्रलक्षणम् ॥

1545

Sl. No. 9671 **स्मृत्यर्थसारः** Ms. No. C. 108

गणेशं ब्रह्मविष्ण्वीशावाङ्गीनालोकयन् (?) गृहान् ।
दुर्गामम्बादिकां बन्दे व्याख्यातृंश्च सदा गुरून् ॥
श्रीकण्ठः श्रीकराचार्यैः श्रुतिस्मृतिपुराणगैः ।
स्मृतिशास्त्रेष्वनेकेषु विप्रकीर्णेष्वनेकधा ॥

End :

इदं स्मृत्यर्थसारं तु मूलासरणेहेतुना ।
नावमान्यं सतां मूलं पश्यन्त्येव बहुस्मृताः ॥

इदं स्मृत्यर्थसाराख्यं नागविष्णवार्यसूनुना ।
यज्वना श्रीधरार्येण श्रुतिस्मृतिविदा कृतम् ॥
धर्मशास्त्रं पठन् शृण्वन् श्रावयन् धारयन्नपि ।
आयुः प्रजां श्रियं कीर्तिं धनं पुण्यं च विन्दति ॥

Colophon :

इति श्रीविश्वामित्रमहामहेश्वरनागविष्णुभट्टोपाध्यायसूनुना यज्वना श्रीधराचार्येण कृते स्मृत्यर्थसारे प्रायश्चित्तप्रकरणं समाप्तम् ।'

1546

Sl. No. 9673 स्मृत्यर्थसारः (ब्रह्मतन्त्रस्वामीयः) Ms. No. C. 2741

Beginning :

श्रीरङ्गमङ्गलमहोत्सववर्धनाय
वेदान्तपान्थपरमार्थसंवर्तनाय ।
कैङ्कर्यलक्षणमोक्षलक्ष्मणो
रामानुजो विजयते यतिराजराजः ॥

End :

ऊर्ध्वपुण्ड्रधरो विप्रो सर्वलोकेषु पूजितः ।
विमानं वरमारुह्य यायाद्विष्णोः परं पदम् ॥
धारयेदूर्ध्वपुण्ड्रं तु त्रिसन्ध्यासु द्विजोत्तमैः ।
सर्वपापविशुध्यर्थे मि × × × ॥

Colophon :

इति श्रीस्मृत्यर्थसारे ब्रह्मतन्त्रेण विरचिते ऊर्ध्वपुण्ड्रधारणं तृतीयं प्रकरणम् ॥

1547

Sl. No. 9674 स्वसूत्रालाभकर्तव्यनिर्णयः Ms. No. P. 8423/2

Beginning :

स्वसूत्रेणैव कर्तव्या संस्कारादिक्रियाखिला ।
नान्यसूत्रेण कर्तव्या नरकायुपदेशतः ॥
न लभ्यते स्वसूत्रे चेत् प्रयोक्ता वा न दृश्यते ।
स्वशाखेणैव सूत्रेण प्रेतकर्माखिलं चरेत् ॥

End :

इति वृद्धमनुप्रोक्तनिषेधो ब्रह्मचारिणाम् ।
प्रतोद्देश्ये तर्पणे स्यात् न तु दर्शादितर्पणे ॥

Colophone :

इति कर्तृनिरूपणम् ॥

1548

Sl. No. 9675 हयग्रीवावतारनिर्णयः Ms. No. P. 1908/8

Beginning :

हयग्रीवावतारदिनं कथ्यते । तदुक्तं कल्पतरौ –

श्रावण्यां श्रवणे जातः पूर्वं हयशिरो हरिः ।
जगाद सामवेदं तु महाकल्मषनाशनः ॥

End:

अङ्गानि पूर्वमभ्यर्च्य तत एवाह्वयैर्यजेत् (?) ।
प्रज्ञा मेधा हयौ पूर्वं स्मृतिर्मेधा हयौ ततः ॥

Colophon :

-- -- --

1549

Sl. No. 9677 हरिदिनतिलकम् (एकादशीनिर्णय) Ms. No. P. 9102/12

Beginning :

नित्ये काम्ये च धर्मे नियमगुणविधिप्राप्तमार्गे निजानां
आज्ञानुज्ञाक्रमे तद्विरहणमुपधीकृत्य गोपायते यः ।
तस्मिन् कस्मिंश्चिदाद्ये हरिदिनतुलसीद्वादशीभिः प्रसाद्ये
भद्राणामेकसेतौ भवतु भगवति श्रीसखे भावना नः ॥

End :

आतिष्ठेताभियुक्तस्मृतिषु विधिवलात् श्राद्धमन्यन्निषिद्धं

प्राक्सामान्यापवादात् ऋतुगतिनियतिः सन्ततिस्थापनार्था ।

एकैकात्यन्तवृत्या त्विह तु नृषु चतुर्भुक्तिवर्जं त्विहोक्तं

श्रेयस्सिद्ध्यै स्वतः श्रीहरिदिनतिलकं शैवभूभृत्प्रसादात् ॥

(वेङ्कटेशेन पुंसाम् ॥)

Colophon:

समाप्तम् ॥

1550

Sl. No. 9679 हरिदिनतिलकव्याख्या Ms. No. A· 714

Beginning :

श्रीरङ्गेश्वरकल्मषवेदमकुटीसूर्याह्वयस्तत्प्रिया-

स्नेहख्यापितसर्वतन्त्रमहितस्वातन्त्र्यसन्त्राणकृत् ।

श्रीमद्वेङ्कटशैलशेखरहरेर्घण्ठावतारो गुरुः

श्रीमान्नः कविवादिपञ्चवदनो बोधाय बोभूयताम् ॥

\+ + + + + + +

तत्र भवान्, भगवतो वृषगिरिधुरीणस्य घण्टावतारः श्रीरङ्गनाथदत्तवेदान्ताचार्यपदालंकृतः ॥

End :

हरिदिनतिलकेऽस्मिन् भावितं यद्यदुक्तं-

गुरुकुलतिलकेन श्रीमता तत्र तत्र ।

इह यदि विपरीतं चेद्यन्मया प्रोक्तमासीत्

तदुपजनितमन्तुं (?) क्षन्तुमर्हन्ति सन्तः ॥

स्वोक्तार्थेषु क्वचिदपि मया वैपरीत्यं प्रमादात्

बालेनेह प्रकलितमपि श्रीत्रयीमौलिसूरिः ।

क्षान्तिं कुर्यान्मयि × × × × ×

— — — — — — — — — ॥

Colophon :

इति हरिदिनतिलकव्याख्या समाप्ता ॥

1551

Sl.No. 9680 हरिवासरनिर्णयः Ms. No. P. 4212/38

Beginning :

अथ हरिवासरनिर्णयः–

एकादश्याः प्रान्त्यभागः द्वादश्याः पूर्वमेव च ।

एवं मिलित्वा भागचतुष्टयं कृत्वा तत्र प्रथमभागे यावन्त्यो घटिकाः एकादशीरात्रौ गताः ताः विहाय सूर्योदयानन्तरं × × भवेत् ॥

End :

ಮೊದಲು ಪಾಲಿನಲ್ಲಿ ಏಕಾದಶೀದಿನ ರಾತ್ರಿ ಮೊದಲು ಪಾಲಿನಲ್ಲಿ ಸಂದಷ್ಟು ಹೋಗಲಾಗಿ ದ್ವಾದಶೀದಿನ ಉದಯಾನಂತರದಲ್ಲಿ ಮೊದಲು ಪಾಲಿನ ಶೇಷ ಎಷ್ಟು ಗಳಿಗೆ ಉಳಿತದೆ ಅಷ್ಟು ಗಳಿಗೆ ಹರಿವಾಸರ ಮಾಡೋದು ॥

Colophon :

— —

1552

Sl. No 9681 हिरण्य-तीर्थश्राद्धसङ्ग्रहः Ms No. P. 1940/12

Beginnngi :

हिरण्यश्राद्धे–

सङ्कल्पं सूक्तपठनं द्विजनेमास्तथैव च ।
भाजनासादनं चैव अग्नौ करणमेव च ॥
आवाहनार्घ्यं विकिरं प्रदक्षिणपितृस्तुतिः ॥

End :

स्वधोच्यतामग्नौ करणं सङ्कल्पे सप्त वर्जयेत् ।
तीर्थश्राद्धे गयाश्राद्धे देवश्राद्धे महालये ।
पूर्वेद्युः श्राद्धभोक्तृत्वे परेऽहनि न दोषभाक् ॥

Colophon :

1553

Sl. No. 9684 होमद्रव्यप्रमाणम् Ms. No. P.3924/7

Beginning :

कर्षमात्रं घृतं होमे शुक्तिमन्त्रे पयस्स्मृतम् ।
उक्तानि पञ्चगव्यानि तत्समानि मनीषिभिः ॥
तत्समं मधुदुग्धानामक्षमात्रमुदीरितम् ।
दधि प्रसृतिमात्रं स्यात् लाजास्स्युर्मुष्टिसम्मिताः ॥

End :

अनुक्तमपि यद्द्रव्यं कर्तव्यं श्रुतिचोदितैः ।
आमाषात्पलपर्यन्तं वित्तशाठ्यं न कारयेत ॥

Colophon :

— — —

1554

Sl. No. 9687 होमाधिकारियनिर्णयः Ms. No. P. 5726/69a

Beginning :

अथ होमकर्तृनिरूपणम्—

होमे मुख्यो यजमानः पत्नीपुत्रश्च कन्यका ।
ऋत्विक् शिष्यो गुरुर्भ्राता भागिनेयः सुतापतिः ॥

End :

पत्युः प्रेते प्रतिनिधिः पित्रा वा ऋत्विजैस्सह ।
स्वामिनो × दैवताय आपस्तम्बानुभाषणम् ॥
फलप्रतिनिधित्वस्य दूषणं न हि × र्मणः ॥

Colophon :

1555

Sl. No. 9688 **होमनियमाः** Ms No. P. 7777/27

Beginning :

सर्वसस्याश्रया भूमिः सर्वतीर्था बसुन्धरा ।
सर्वयज्ञकृता धारा किमर्थं स्थण्डिलं कृतम् ॥१॥
वृत्रासुरमहादैत्यशक्रवज्रनिपातिनः ।
× × × × × दतर्थं स्थण्डिलं कृतम् ॥ २ ॥

End :

विवाहे चौलसीमन्ते स्वाध्यायव्रतकर्मणि ।
× × × नगोदानसमये आज्यसंस्कारमर्हति ॥८॥
एकशय्यासनं वस्त्रं एकपात्रन्तु भोजनम् ।
एकत्र मङ्गलस्नानं दम्पत्योः पञ्चरात्रकम् ॥ ९ ॥

Colophon :

— — —

1556

Sl.No. 9689 **होमवैकल्यप्रायश्चित्तम्** Ms. No. P. 3646/17

Beginning :

होमकर्मणि सर्वेषां वैकल्यं मुनिना कृतम् ।
प्रायश्चित्तं गौतमेन कर्मणां परिपूर्तये ॥

End :

पूर्वदत्ताञ्जलीन् पिण्डान् पुनरित्याह गौतमः ।
एवमुक्तं गौतमेन द्विजानां कर्मसिद्धये ॥

Colophon :

— — —

APPENDIX II

INDEX OF AUTHORS

(Numbers agaist the authors refer to the sereial number of Ms.)

APPENDIX-III

INDEX OF PUBLEISHERS

(The nubers in front of the publisher refers to the Serial number of Ms)

9708	Albenian Press, Madras. Te Script	1910
9721	,,	,,
9729	,,	,,
9745	,,	,,
9759	,,	,,
9763	,,	,,
9777	,,	,,
9778	,,	,,
9779	,,	,,
9799	,,	,,
9803	,,	,,
9843	,,	,,
9889	,,	,,
10183	,,	,,
10189	Mangalavilasa Mudra-ksarasala, Kumbhakonam. Gr. Script	1904
10200	,,	,,
10203	,,	,,
10300	Ed: Prof. Hṛṣī-keśaśāstry, Sanskrit Coliege. Calcutta. Pub:iatic As Society of Bengal Pr : Vidyartans Pre , Calcutta. Dn. Script,	1993
10332	Sri Venakateswara Mudrnalaya, Bombay.	
10333	,,	,,
10357	Encyclopedia Prss, 148 Cornwallis Street, Clcutta.	1851
10369	,,	,,
10377	,,	,,
10384	,,	,,
10394	,,	,,
10396	,,	,,
10380	Bombay	
10505	Ed : Sreeyukta.Nava-candra Siromani, Pr : Jnanartnaksara Press, Calcutta. Dn. Script.	1887
10514	Albenian Press, Madras. Te Script.	
10579	Bombay	
10584	,,	
10601	,,	
10609	,,	
10617	,,	
10620	,,	

10621 Anadasram Press, 1907
Poona, Dn. Script
10632 Bobay.
10648 ,, ,,
Albenian Press, 1892
Madras. Te. Script
10654 ,, ,,
10656 ,, ,,
10660. ,, ,,
10775 Ed : Jeevanandavidya
Sagara Bhattacarya, 1802
Pr: Saraswati Preess,
Calcutta.
10802 Albenian Press 1910
Madras,
10837 ,, ,,
11197 Karnataka Book Depot 1888
Prss, Dharvada. Kan Script
11203 ,, ,,
11204 ,, ,,
11216 Ed: Dharmādhikārai,
Chakravarti Iyengar,
Pr: Vidyatarangini Press,
Mysore. Te. Scaipt.
11248 Sri Venkatesvara Mudra-
laya, Bobay.
11314 ,, ,,
11332 Albenian Press,
Madras. Te. Script.
11533 Ed: Jeevanada Vidyasagara 1892
Bhattacarya,
Pr: Saraswati Press,
Calcutta 1892
11546 ,, ,,
11549 ,, ,,
11559 ,, ,,
11564 ,, ,,
11566 ,, ,,
11568 ,, ,,
11575 ,, ,,
11580 ,, ,,
11582 ,, ,,
11585 ,, ,,
11587 ,, ,,
11598 Sadvidyamandira Mudra- 1890
sala, Tripliene,
Madras. Te Scaript.
11600 Bomby
11601 Albenian Press, 1910
Madras.
11606 Bomby
11633 ,,
11635 ,,
11637 ,,
11645 Geettha Press, Sam. 2018
Gorakh Pur.
11649 Sri Venakatesvara
Mudranlaya, Bombay.
11762 Ed: Jevana Vidyasagar 1892
Bhattacarya,
Pr: Saraswati Press,
Calcutta.
11768 ,, ,,
11791 Albenian Press, 1910
Madras. Te Script.